मजंतिपद्मानिकदाविकासं मियागतेभर्तरिकिंकरोति ॥
रात्रौचनित्यंविरहाऽऽकुलाका सूर्योदयेरोदितिचक्रवाकी॥३॥
संतश्चलुब्धाश्चमहर्षिसंघा विप्राःकृषिष्ठाःखलुमाननीयाः ॥
किंकिंसमिच्छंतितथैवसर्वे नेच्छंतिकिंमाधवदाघयानं ॥४॥
कःखेचरतिकारम्या काजघ्याकिंविभूषणं ॥
कोवंद्यःकीदृशीलंका वीरमर्कटकंपिता ॥ ५ ॥
केभूषयतिस्तनमंडलानि कीदृग्युमाचंद्रमसःकृतःश्रीः ॥
किमाहसीतादशकंठनीता हा रामहादेवरतातमातः ॥ ६ ॥
रवेःकवेःकिंसमरस्यसारं कृषेर्भयंकिंकिमुशंतिभृंगाः ॥
खलाद्भयंविष्णुपदंचकेषां भागीरथीतीरसमाश्रितानां ॥ ७ ॥
किंकुर्वंत्युषसिद्विजाःप्रतिदिनंकेमाननीयाःप्रभोः
कावासाहंसकीनिशामुसततंद्योःकीदृशीवर्तते ॥
कुत्राऽऽस्तेनधुनारिकेरजफलैकैःप्राप्यपासाशमः
संध्यावंदनमाचरंतिविबुधानारीभगांतर्जलैः ॥ ८ ॥
किंतृष्णाकारिकीदृग्रथचरणमहोरौतिकःकाऽब्धिकांचिः
कोऽपस्मारीभुजंगेकिमुकलिशमनंत्वार्यसंबोधनंकिं ॥
कासुंदर्यामपांदुःकथमचलभूतःकाचसंभुक्तिधरभ्रे
बीजंकिंकाऽवनीजारमणमतिहराहेमसारंगलीला ॥ ९ ॥

---

(४) संतःमानं, लुब्धाःधनं, महर्षिसंघाःवनं, विप्राःदानं; कृषिष्ठाःघनं, माननीयाः यानंइच्छंति. सर्वेपिमाधवेवैशाखेदाघःऊष्मातर्गमनंयानगमनंनेच्छति (५) खेकःचरति, विःपक्षी, रम्या-रमा, जघ्या-स्रक्. विभूषणं-कटकं. वंद्यः-पिता. लंका-वीरमर्कटैर्हनुमदादिभिःकंपितानाशितेत्यर्थः(६) हाराःस्तनमंडलानिभूषयंति उमा-महादेवरता, तमातः राश्रितः (अयमयोगोविचारणीयः) सीताकिमाह-हाराम, हादेवर, हातात, हामातः (७) रवेःसारं-भा कांतिः कवेःसारं-गीः समरस्यसारं-रथीयोरथा. कृषेःभयंईतिःअनावृष्ट्यादिः भृंगाःकिंउशंतिइच्छंति-रसं खलाद्भयंकेषां-आश्रितानां विष्णुपदंकेषां-भागीरथीतीरसमाश्रितानां. (८) उषसिद्विजाःप्रतिदिनंकिंकुर्वंति-संध्यावंदनं. एवमग्रेप्यूह्यं. (९) किंतृष्णाकारि-हेम. रथचरणं-सारं अराभिःसहितं. कोरौति-गर्ला मशककंठः रौतिगायति. अब्धिकांचिः-इलापृथ्वी. अपस्मारी-लालालालावान्. भुजगेकिं-गरंविषं. कलिशमनं-सामसार्थं (तद्व्रतिलोके,) आर्यसंबोधनं-हे. सुंदर्याका- हेलालीला. इंदुः-मलीमलवान्कलंकीति-

कोनिर्दग्धस्त्रिपुररिपुणाकश्चकर्णस्यहंता
नद्याःकूलंविघटयतिकःकःपरस्त्रीरतश्च ॥
कःसन्नद्धोभवतिसमरेभूषणंकिंकुचानां
किंदुःसंगाद्भवतिमहतांमानपूजापहारः ॥ १० ॥
सीमंतिनीषुकाशांता राजाकोऽभूद्गुणोत्तमः ॥
विद्वद्भिःकासदावंद्या अत्रैवोक्तंनबुध्यते ॥ ११ ॥
कंसंजघानकृष्णः काशीतलवाहिनीगंगा ॥
केदारपोषणरताः कंबलवंतंनबाधतेशीतं ॥ १२ ॥
युधिष्ठिरःकस्यपुत्रो गंगावहतिकीदृशी ॥
हंसस्यशोभाकावाऽस्ति धर्मस्यत्वरितागतिः ॥ १३ ॥
लंकाभूपनिशाचरोरघुपतिंयुद्धेकथंदृष्टवान्
दीनंपातिपितेवयःपशुपतिःकस्तस्यवाहःप्रियः ॥
केनाऽपूर्वफलंनरैःसुकृतिभिःकस्मिन्स्थलेभुज्यते
जारायेभुवितानमशास्तिकतमोह्येषामिहैवोत्तरं ॥ १४ ॥
कापांडुपत्नीगृहभूषणंकिं कोरामशत्रुःकिमगस्त्यजन्म ॥
कःसूर्यपुत्रोविपरीतपृच्छा कुंतीसुतोरावणकुंभकर्णः ॥ १५ ॥
करोतिशोभामलकेस्त्रियाःको दध्यानकांताविधिनाचकोक्ता ॥
अंगेतुकस्मिन्दहनःपुरारेः सिंदूरबिंदुर्विधवाललाटे ॥ १६ ॥
भोजनांतेचकिंपेयं जयंतःकस्यवैसुतः ॥
कथंविष्णुपदंप्रोक्तं तक्रंशक्रस्यदुर्लभं ॥ १७ ॥

यावत् अचलमृग-संवृद्धिः-साग अगे वृक्षेःसहित. अमेर्बीज-रं, अवनिजासीतातन्नमणोरा-मस्तन्मनिहरा-हेमसारंगलीलाहेम्नःसुवर्णस्यसारंगोमृगस्तस्यलीला. (१०) त्रिपुररिपुणाकेनिर्दग्धः- मारःमदनः एवमग्रेपि. दुःसंगात्महतांकि-मानपूजापहारःमानपूजयोः अपहारःनाशः. (११) सीमंतिनीषुकाशांता.-सीता. एवमग्रेपिचरणाद्यंताक्षरयोर्मेलनेनोत्तरं. (१२) कृष्णःकंपुरुषंसंजघानमारितवान्-कंसं. एवमग्रेपि. (१३) चतुर्थपादस्थपदद्वयेणप्रश्नत्रयस्योत्तरं. (१४) अत्रपादाद्याक्षरद्वयविपर्यासेनउत्तरं. यथालंका-भूपेइत्यत्रकालमित्यादि उत्तरार्धेकनेत्यस्यसुखेनेत्यर्थः (१५) अत्रचतुर्थपादस्थैःपंचभिः पदैरुत्तरं. रावणेनसहितःकुंभकर्णः इयंविपरीतपृच्छा. (१६)चतुर्थपादस्थसिंदूरबिंदुरित्यादिपदत्रयेणोत्तरं. (१७) तक्रमित्यादिपदत्रयेणप्रश्नत्रयस्योत्तर.

क्वसतिलघुजंतुःकिंनिदानंहिवांते
झटितिवदपशुंकंलंबकंठंवदंति ॥
प्रसवसमयदुःखंवेत्तिकाकामिनीनां
तिलतुषपुटकोणेमक्षिकोऽप्रसूता ॥ १८ ॥
गच्छंतिकाऽजिवन्हौहुतनिजतनवःकाभिनत्तिस्वकूलं
किंस्याद्योज्यंविकल्पेक्रकचनखचयैःकिंनृसिंहेनभिन्नं ॥
कीदृग्दित्याःप्रसूतिःकिमनलशमनंकानृपैःपालनीया
कोवंद्यःकःप्रमार्ष्टित्रिभुवनकलुषंस्वर्धुनीवारिपूरः ॥ १९ ॥
कःप्रार्थ्यतेमदनविव्हलयायुवत्या
भातिक्वपुंड्रकमुपैतिकथंचताऽऽयुः ॥
काऽनादरोभवतिकेनचरज्यतेऽसृजं
घ्राह्याऽस्थ्निकिंफलमुदाहरनालिकेरं ॥ २० ॥
कस्यमरौदुरधिगमः क.कमलेकथयविरचिताऽऽवासः ॥
कैस्तुष्यतिचामुंडा रिपवस्तेवदकुतोभ्रष्टाः ॥ २१ ॥
पृथ्वीसंबोधनंकीदृक् कविनाप्तिःकीर्तितं ॥
केनेदंमोहितंविश्वं प्रायःकेनाऽऽप्यतेयशः ॥ २२ ॥

---

(१८) तिलतुषेत्यादिपदचतुष्टयेनप्रश्नचतुष्टयस्योत्तरं. (१९) आजिवन्हौसंग्रामाग्नौहुतनिजतनवस्त्यक्तनिजदेहाःकगच्छंति—स्वःस्वर्गं. स्वकूलंकाभिनत्ति—धुनीनदी. विकल्पेकिंयोज्य—वा इत्यव्ययं. क्रकचनखचयैःकरपत्रसदृशनखसमूहैःनृसिंहेनाकिंभिन्नं.—रिपूरःरिपोःउरःस्थलं. दित्याःप्रसूतिःकीदृक् -स्वर्धुनी स्वःस्वर्गंधुनयतीतिस्वर्धुनी. धूञ्कंपनेइतिचौरादेःअचइरितिऔणादिकइप्रत्ययः धूञ्प्रीञोरितिनुगागमः अनलशमनं—वारि नृपैःपालनीया—पूः वंद्यः- अःविष्णुः त्रिभुवनकलुषंस्वर्धुनीवारिपूरःप्रमार्ष्टि. (२०) ना, अलिके, अरं, इतिआद्यप्रश्नत्रयस्यत्रीण्युत्तराणि. रंके, अलिना, नालिकेरं इतिउत्तरार्धेस्थप्रश्नोत्तराणि. अलिके भाले, अरं शीघ्रं. रंकेक्षुद्रे ग्राह्येअस्थियस्यैवंविधं. (२१) अत्रप्रश्नार्थकसर्वनामवाचकशब्दस्योत्तरं. यथा मरौमरुदेशेकस्यदुरधिगमःदुःखेनप्राप्तिः उ॰कस्यउदकस्य. एवंकः ब्रह्मा. कैःमस्तकैः, कुतःपृथिव्याः(२२) पृथ्वीसंबोधनं- कौ, इना कामेन. कविनायशःआप्यते.

कुत्रोदेत्युदयाचलस्यतरणीरम्भागतिःकस्यवे
काम्याभांतिचकिंकरोतिगणकोयष्टिविधृत्यैतिकः ॥
कस्मिन्नुजायतिजंतवोनचकदासूतेचकाकःप्रियः
शृंगाऽग्रेतुरगस्यभानिगणयत्यंधोऽन्ध्रिवंध्यासुतः ॥ २३ ॥
विवाहेपुरंध्रीजनैर्लिप्यतेका नकेमानमायांतिगर्वोन्नताका ॥
धनेवारिधौरामतःकंपतेका हरिद्रादरिद्राःसरिद्रावणश्रीः।२४॥
कस्तूरीजायतेकस्मा त्कोहंतिकरिणांशतं॥
किंकुर्यात्कातरोयुद्धे मृगात्सिंहःपलायनं ॥ २५ ॥
अम्यत्स्त्रीस्पृहयालवोजगतिकेपश्यामगम्याचका
कोधातुर्दशनेसमस्तमनुजैःकामार्ग्यतेऽहर्निशं ॥
दृष्ट्वैकांयवनेश्वरोनिजपुरेपद्मानमांकामिनीं
मित्रंप्राहकिमादरेणसहसायारानदींदंशमा ॥ २६ ॥
कस्मिन्नुशेतेमुरारिःकनुखलुवसतिर्वायसीकोनिषेधः
स्त्रीणांरागस्तुकस्मिन्कनुखलुसितिमाशौरिसंबोधनंकिं ॥
सबुद्धिःकाऽहिमांशोर्विधिहरवयसांचाऽपिसंबुद्धयःका
मूलेलुब्धःकथंवाकुरुकुलहननंकेनतत्केशवेन ॥ २७ ॥
पुंसःसंबोधनंकिंविदधतिकरिणांकेरुचोऽम्भोद्विषत्किं
काशून्यातेरिपूणांनरवरनरकंकोऽवधीद्रामकंकिं ॥
केवावर्षासुनस्युर्विसमिवहरिणांकिंविदीर्णनखाग्रे
विंध्याद्रिःकंावसर्पन्नविघटयतितरून्नर्मदावारिपूरः ॥ २८ ॥

---

(२१) अत्रशृंगाग्रेइत्यादिभिरष्टभिःपदैःक्रमेणाष्टावुत्तराणि.यथा-उदयाचलस्यकुत्रकस्मिन्नुप्रदेशेतरणिःसूर्यःउदेति- शृंगाग्रे. एवमग्रेप्यूह्यं (२४)अत्रचतुर्थपादस्यचतुर्भिःपदैःक्रमेणचत्वारिउत्तराणि.(२५)अत्रचतुर्थपादस्यैस्त्रिभिःपदैस्त्रीण्युत्तराणि.(२६) अत्रपूर्वार्धस्थप्रश्नचतुष्टयस्यचतुर्थपादस्थयारानदींदंशमाइत्येतानिचत्वारिउत्तराणि.यारा: जारा:उत्तरार्धस्थरंचमप्रश्नस्यहेमित्रऐतादृशींदीपकलिकामयाकदापिनदृष्टेत्यर्थंकयारानदींदंशमेतिवाचनीभावयाउत्तरं.(२७)मुरारिःकेउदकेशेते. वायसीवसतिःशवे. निषेधः-न.स्त्रीणांरागःनवे. सितिमाश्वेतत्वक- शकेयवनविशषे. शौरिसंबोधनं- केशव. आहिमांशोःसूर्यस्यसंबुद्धिः- इन. विधिहरवयसांसंबुद्धयःक्रमेण- क, ईश, वे. लुब्धःकथंमूले- नेति. (२८) कंचिद्राजानंप्रतिकवेरुक्तिरियं पुंसःसंबोधनं—नः करिणांरुचःशोभाःकेबिंदवस्ति.—मदाः, अम्भोद्विषत्.—वारि. रिपूणांशून्याका-पूःनगरी, नरवरेतिसंबोधनं नरकंअसुरंकःअवधीत्.-

बहिर्लापिका.

श्री ॥ किमिच्छतिनरःकाश्यां भूपानांकोरणेहितः ॥
कोवंद्यःसर्वदेवानां दीयतामेकमुत्तरं ॥ १ ॥
विराजराजपुत्राऽरे यन्नामचतुरक्षरं ॥
अर्धवस्तुशत्रूणा मुत्तरंतवमंदिरे ॥ २ ॥
कःखेभातिहतोनिशाचरपतिःकेनांऽबुधौमज्जति
कःकीदृक्तरुणीविलासगमनेंकिंकार्यतेसज्जनैः ॥
पत्रंकिंनृपतेःकिमर्जुनधनुःकोरामरामाहरो
मत्प्रश्नोत्तरमध्यमाऽक्षरपदंयत्तत्त्वाशीर्वचः ॥ ३ ॥
मामेवसंतसमयेवदकिंतरूणां किंक्षीयतेविरहिणामुरगःकिमेति ॥
किंकुर्वतेमधुलिहोमधुपानमत्ताः कीदृग्वनंमृगगणास्त्वरितंत्यजंति॥४॥

अःविष्णुः रामकंरमणीयंकिं- नर्म. वर्षासुकेनस्युः —दावाः विसमिवहरिणाकिंवि-
दीर्णं-- रिपूरःहिरण्यकशिपोरुरःस्थलं. विंध्याद्रेःकोविसर्पन्-नर्मदावारिपूरः

---

(१)उ० मृत्युजयः अत्रपूर्वार्धस्थप्रश्नद्वयस्यपदद्वयेनोत्तरं, उत्तरार्धस्थप्रश्नस्यएकप-
देनोत्तर. (२) वयःपक्षिणस्तेषांराजागरुडस्तद्वाजःविष्णुस्तत्पुत्रोमदनस्तच्छत्रुःशिवस्तस्य
चतुरक्षरंनाममृत्युजयइति. तदर्धमृत्युरितितवशत्रूणांमंदिरे उत्तरमर्धंजयइतितवमंदिरेपस
त्वितिकस्यचित्पुरुषस्यराजानंप्रत्याशीर्वादः

(३) प्रश्नोत्तराणि --

घ हे शः रा मे ण, मै ना कः, मं थ रं, रु चि रं, सा रं गः, मां जी वं, रा व णः.	एतदुत्तरमध्यमाक्षरघटितंवाक्यं (हेमेनाथ-चिरजीव) इतिराजानंप्रत्याशीर्वचनं. सारंगोगजः

(४) अत्रदुःखेनघनवन्हिनाविकलं व्याकुलमित्यर्थकेन (दवविकलं) इतिसमुदितो-
त्तरेप्रथमाद्यक्षराणामंत्यासरेणयोजनेपूर्वेषांचतुर्णांप्रश्नानामुत्तराणिभवंति. यथा प्रथमे
किंभवतीतिप्रश्नेदलमिति. एवमेवोत्तरत्रवविदित्यत्रपवयोःसावर्ण्यात् (वलं, विलं) इति
कलंमव्यक्तमधुरं इति.

भागीरथीकथंभूता कामिनीमाहकिमियं ॥
एकमेवोत्तरंदेहि शास्त्रलौकिकभाषया ॥ ५ ॥
बुधःकीदृग्वचोभूते कोरोगीकश्चनास्तिकः ॥
कीदृक्चंद्रंनमस्यंति किंसूत्रंपाणिनेर्वद ॥ ६ ॥
किंत्राणंजगतांनपश्यतिचकःकेदेवताविद्विषः
किंदातुःकरभूषणंनिरुदरःकःकिंपिधानंदृशां ॥
केखेखेलनमाचरंतिसुदृशांकिंचारुताभूषणं
बुध्यान्ब्रूहिविचार्यसूक्ष्ममतिमंस्त्वेकंद्वयोरुत्तरं ॥ ७ ॥
गतासाकिंस्थानंपथिसहतयाकास्थितवती
नृपेणेत्थंपृष्टासखिचतुरदूतीस्थितवती ॥
विलोक्याऽलंकारंनिजमथचशाकंनरपतिं
निराकांक्षंचक्रेकथयकथमेतत्प्रभवति ॥ ८ ॥
गतक्लेशाऽऽयासाविमलमनसःकुत्रमुनय
स्तपस्यंतिस्वस्थाःसुररिपुरिपोःकाचदयिता ॥
कविमेयःकिंस्यान्नवलघुयुतैरष्टगुरुभि
र्बुधावृत्तंवर्णैःस्फुटघटितबंधंकथयत ॥ ९ ॥

---

(५) मलापहाइत्युत्तरं. (६) अर्थवद्धातुरप्रत्ययःप्रातिपदिकं. बुधःकीदृक्वचो-भूतेअर्थवत् एवमग्रेपि. (७) अंधः अन्नं, दृष्टिहीनश्च. दानवाः दैत्याः दानवारिव दानो-दकमित्यर्थः तमःराहुः अधकारश्च. वयः पक्षिणः तारुण्यंच. एतानिचत्वारिउत्तराणि-प्रत्येकंप्रश्नद्वयस्य. (८) कश्चिद्राजाकांचिन्नायिकांस्वगृहमानयत्. ततश्चतद्भर्तारमागतं-दृष्ट्वातांस्वगृहं प्रापयितुंदूतीमाज्ञापयतिस्म. साचदूतीतांस्वगृहंप्रापय्यपुनाराजनिकटेआ-गत्यस्थितवतीतांप्रत्याहराजा. साकिंस्वस्थानंगता ! गतवत्यातयासहपथिमार्गेकास्थि-तवती. एवंराज्ञापृष्टाचतुरादूतीस्थितवतीसतीनिजमलकारंपोहोचीतिभाषाप्रसिद्धं तथाशा-कंमेथीतिभाषाप्रसिद्धंशाकविशेषंचअवलोक्यतावन्मात्रेणैवनरपतिंनिराकांक्षमुत्तरविषये आकांक्षारहितंचक्रे. एतदलकारशाकावलोकनंकथंप्रभवतिराज्ञोनैराकांक्ष्यसंपादनेकथं-समर्थंभवतीतिकथयेतिकविप्रश्नः. अत्रप्रथमप्रश्नस्यप्राप्तेत्यर्थंकंपोहोचीतिभाषयोत्तरं. द्वि-तीयप्रश्नस्यतुअहमासमित्यर्थंकंभाषयामेथीत्युत्तरमितितात्पर्यंबोध्यं. (९) मुनयःकुत्र-तपस्यंतीतिप्रश्नेशिखरिणिपर्वतेइत्युत्तरं. सुराणांरिपुर्हिरण्यकशिपुस्तस्यरिपुर्विष्णुस्तस्यद-यिताकेतिप्रश्नेलक्ष्मीरित्युत्तरं. कविमेयःकवीनांप्रियंवृत्तंकिमितिप्रश्ने शिखरिणीत्युत्तरं.

उरसिमुरभिदःकागमकमालिंगिताऽऽस्ते
सरसिजमकरंदाऽऽमोदितानंदनेका ॥
गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यै
र्गुरुभिरपिकलाकाछंदसांवृत्तिरस्ति ॥ १० ॥
नीचेषुयावनीवाणी काकःस्याच्छुभदोवने ॥
शंभोरावरणांकिंकं भजंतेव्याधयोजनं ॥ ११ ॥
कोनयतिजगदशेषं क्षयमथबिभरांबभूवकंविष्णुः ॥
नीचःकुत्रसगर्वः पाणिनिसूत्रंचकीदृक्षं ॥ १२ ॥
श्लाघतेखलःकस्मै सुभिक्षंतंकिमुच्यते ॥
लादेशानांनवानांच तिङांकिंनामकथ्यतां ॥ १३ ॥
सततंश्लाघतेकस्मै नीचोभुविकिमुत्तमं ॥
कर्तर्यपिरुचादीनां धातूनांकिंपदंभवेत् ॥ १४ ॥
कःकर्णाऽरिपितागिरींद्रतनयाकस्यप्रियाकस्यतुक्
कोजानातिपरेंगितंविषमगुःकुत्रोदभूत्कामिनां ॥
भार्याकस्यविदेहजातुदतिकाभीमेन्द्रिहनिश्चक
स्तन्मत्युत्तरमध्यमाऽक्षरपदंसर्वार्थसंपत्करं ॥ १५ ॥

---

(१०) मुरभिदःविष्णोरुरसिआलिंगितामालक्ष्मीः अलिनीभ्रमरी. मालिनी. इतित्रीण्युत्तराणिक्रमेण. (११) अर्थे, लाभः, अजिनं., अर्थेलाभोजिनं, इतिचतुर्णां-प्रश्नानांचत्वारिउत्तराणि. (१२) यमः, अगंपर्वतं, धने, यमोगंधने. इतिचत्वारिउत्तरा-णिक्रमेणज्ञेयानि. (१३) परस्मै, पदं, परस्मैपदं. इतित्रीण्युत्तराणि. (१४) आत्मने, पदं, आत्मनेपदं. इतित्री ण्युत्तराणि.

(१५) उत्तराणिः—

वा स वः
ह र स्य.
न्हु स्व स्य.
म ति मान्.
म न सि.
रा म स्य.
कु स्तु तिः
अ र्थं गः

एतन्मध्यमाक्षरैःसंजातंपदंवाक्यं. (सरस्वति नमस्तुभ्यमिति.) अत्रतुकुआगमोन्हुस्वस्यपि-तिकृतितुगितिसूत्रेणविहितः अत्रविषमाःपंचबा-णोयाणायस्येतिविषमगुःकामः

सूर्यवर्णनं.

श्री०॥ रवेरेवोदयःश्लाघ्यः कोऽन्येषामुदयग्रहः ॥
नतमांसिनतेजांसि यस्मिन्नभ्युदितेसति ॥ १॥
खद्योतोद्योतनेतावद्यावन्नोदयतेशशी ॥
उदितेतुसहस्रांशौ नखद्योतोनचंद्रमाः ॥ २ ॥
तस्यैवाऽभ्युदयोभूया द्भानोर्यस्योदयेसति ॥
विकासभाजोजायंते गुणिनःकमलाकराः ॥ ३ ॥
कैरानप्रसार्यरविणा दक्षिणाऽऽशाऽवलंबिना ॥
नकेवलमनेनाऽऽत्मा दिवसोऽपिलघूकृतः ॥ ४ ॥
नमीलनायपद्मानां मुद्रयायाऽल्पतेजसां ॥
तमसामवकाशाय व्रजत्यस्तमसौरविः ॥ ५ ॥
करस्फोटोंऽबरत्याग स्तेजोहानिःसरागता ॥
वारुणीसंगताऽवस्था भानुनाऽप्यनुभूयते ॥ ६ ॥
यत्पादाःशिरसानकेनविधृताःपृथ्वीभृतांमध्यत
स्तस्मिन्भास्वतिराहुणाकवलितेलोकत्रयीचक्षुषि ॥
खद्योतैःस्फुरितंतमोभिरुदितंताराभिरुज्जृंभितं
घूकैरुत्थितमाःकिमत्रकरवैकिंकिंनकैश्चेष्टितं ॥ ७ ॥
पूर्वाण्हेप्रतिबोध्यपंकजवनान्युत्सार्यनैशंतमः
कृत्वाचंद्रमसप्रकाशरहितंनिस्तेजसंतेजसा ॥
मध्यान्हेसरितांपयःप्रविततैरापीयदीप्तैःकरैः
सायान्हेरविरस्तमेतिविवशःकिनामशाश्वतंभवेत् ॥ ८ ॥
क्षेपांक्षोभांकृत्यमसभमुपन्दत्याऽनुसरितां
मताप्योर्वीकृत्स्नांतरुगहनमुच्छोष्यसकलं ॥
कसंप्रत्युष्णांशुर्गतइतितदन्वेषणपरा
स्तैडिद्दीपाऽऽलोकैर्दिशिदिशिचरंतीहजलदाः ॥ ९ ॥

---

१ ज्योतिरिंगणः (काजवाइतिलोके.) २ सूर्ये. ३ किरणान्. पक्षेहस्तान् ४ दक्षिण-दिक्. पक्षेदक्षिणायाःआशास्पृहा. ५ आकाशं पक्षेवस्त्रं. ६ वरुणदिक्. पक्षेमद्यविशेषः ७ किरणाः चरणाश्च. ८शैलानां. राज्ञांच. ९सूर्ये. १०पक्षे.११दिवाधैः१२उत्थिताःजिह्वया. १३ निशासंबंधि. १४ रात्रिं १५कृत्वा. १६तडिदेवदीपस्तस्याऽऽलोकःप्रकाशस्तैः

चंद्रवर्णनं.

श्री० ॥ आलोकवंतःसंत्येव भूयांसोभास्करादयः ॥
चंद्रमाएवतुप्रावि ग्रावकर्पणिकर्मठः ॥ १ ॥
नक्षत्राणिबहूनिसंतिपरितःपूर्णोदयाम्बरे
किंतैःशांतिमुपैतिदीर्घतिमिरंकिंवाऽधिरुज्जृंभते ॥
किंस्यादार्तचकोरपारणविधिर्भ्रांतःसुधादीधिते
तन्नूनंभुवनैकतापशमनःश्लाघ्यस्तवैवोदयः ॥ २ ॥
निष्पीडितोयद्यपिदैवयोगा न्निशाकरश्चाऽपिविधुंतुदेन ॥
तथाऽपिपीयूषविशेषवर्षी सुधाकरःकैरवकाननेषु ॥ ३ ॥
वक्रोऽस्तुबाल्येतदनुप्रवृद्धः कलंकवानस्तुजडोऽस्तुचंद्रः ॥
महेशमौलौचपदंदधातु जायेतवंद्योविविधोपकारात् ॥ ४ ॥
तारागणाश्चंद्रमसंभजंते नजातुर्नाथंनलिनाऽऽकराणां ॥
एतावतातस्यकिमस्तिहानि र्ज्ञातातयोरंतरमेषलोकः ॥ ५ ॥
किमत्रेर्नोपुत्रःकिमुनहरचूडामणिरसौ
नकिंहंतिध्वांतंजगदुपरिकिंवानवसति ॥
यदेतस्यांतःस्थाविलसतिलघुर्लक्ष्मकणिका
विधातुर्दोषोऽयंनतुगुणनिधेस्तस्यकिमपि ॥ ६ ॥
मारस्यमित्रमसिकिंचसुधामयूख
शंभावपिप्रणयितांप्रकटीकरोषि ॥
विश्वासपात्रमसियद्द्विषतोस्तयोर
प्येतत्त्वमेवप्रकृतिशुद्धतनोश्चरित्रं ॥ ७ ॥
यस्योदयेनैवदिशांप्रसाद स्तापाऽपनोदोऽत्रिजगत्त्रयस्य ॥
चकोरचंचूपुटपारणेतु चंद्रस्यतस्याऽस्तिकियान्प्रयासः ॥ ८ ॥
श्मोतापालतलाऽनलैःकवलिताकंठस्थहालाहलै
रालीढाऽभ्रजटाऽटवीविलुठितैरांशीविषाणांगणैः ॥

---

१ प्रकाशवंतः २ बहवः ३ पाषाणः ४ समर्थः ५ समुद्रः ६ राहुणा. ७कुमुदवनेषु. ८ नलिनाऽऽकराणांनाथंसूर्यं ९ अपकारं. १० लांछनं. ११ मदनस्य. १२ प्रीतिं. १३ तापिता. (मुकली.) १४ जटारूपावटवीअरण्यंतस्मिन्विलुठितैः १५ सर्पाणां.

छन्नामलामिराहताऽस्थिपटलैःछिन्नाऽऽईषर्माबरैः
स्तीयांमुंचतिमाधुरींहरशिरोरत्नंकिमिंदोःकला ॥ ९ ॥
ततःकुमुदनाथेन कामिनीगंडपांडुना ॥
नेत्राऽऽनंदेनचंद्रेण माहेंद्रीदिगलंकृता ॥ १० ॥
पश्योदेतिवियोगिनीदिनमणिश्चंडीशचूडामणि
स्तारामौक्तिकहारनायकमणिःशृंगाररक्षामणिः ॥
मौढाऽनंगभुजंगमस्तकमणिःकंदर्पसीमंतिनी
कांचीमध्यमणिश्चकोरपरिचर्चितामणिश्चंद्रमाः ॥ ११ ॥
ओकाशवापीसितपुंडरीकं शाणोपलंमन्मथसायकानां ॥
पश्योदितंसादरमायताक्षि संध्यांऽगनाकंदुकमिंदुबिंबं ॥१२॥
ॐ कारोमदनद्विजस्यगगनक्रोडैकदंष्ट्रांऽकुर
स्तारामौक्तिकशुक्तिरंधतमसस्तंबेरमस्यांऽकुशः ॥
शृंगाराऽर्गलकुंचिकाविरहिणीमर्मच्छिदाकर्तरी
सायंवारवधूनखक्षतमियंचांद्रीकलाराजते ॥ १३ ॥
कृष्णवर्णात्त्वदयंसितदीप्ति दुर्धियःकिलकलंकिनमाहुः ॥
कृष्णवर्णसमुदीरणमात्रा देवयद्गलतिदस्यकलंकः ॥ १४ ॥
कलानिधरवेरेयंसमुपलभ्यरूपस्वयं
दिनांऽतसमयेऽस्पृशत्सपदिपद्मिनीरागवान् ॥
येवांऽन्यकरसंगमान्मुकुलितेतिपूर्वांऽऽकांतिं ॥
समीक्ष्यजहसुःस्त्रियोध्रुवमभूदतःपांडुरः ॥ १५ ॥
दैवाद्यद्यपितुल्योऽभूद्भूतेशस्यपरिग्रहः ॥
तथाऽपिकिंकपालानि तुलांयांतिकलानिधेः ॥ १६ ॥
अहोनक्षत्रराजस्य साऽभिमानंविचेष्टितं ॥
परिक्षीणस्यवक्रत्वं संपूर्णस्यसुवृत्तता ॥ १७ ॥

---

१ छेदयुक्ता. २ विरहिणीकपोलवत्पांडुरेण. ३ प्राचीदिक्. ४ विरहिणीनांसूर्यवत्तापकः ५ आकाशएववापीतस्याःश्वेतकमलं. ६ शाणपाषाणः शस्त्रादितीक्ष्णीकरणार्हः पाषाणइतियावत्. (साहाणइतिलोके.) ७ वराहः ८ उद्घाटनसाधनं (किल्लीतिलो.) ९ अवेःसूर्यात्. १० पतिः ११ पूर्वंयदाकृतिःस्वरूपंयस्यतथाविधः प्रथमंपद्मिनीदर्शनेनविकृताकृतिपश्चात्तन्मुकुलीभावेननिराशतयाविकारापगमेनस्वरूपविपरिवर्तिमापन्नइत्यर्थः १२ कैरविण्यः १३ कपालरथीनिः

हरमुकुटेसुरतटिनी निकटस्थितिलाभतोद्विजेंद्रेण ॥
अपिगरलंफणिफूत्कृति रीक्षणतीक्ष्णाऽऽशुशुक्षणिःक्षांतः॥१८॥
शिरसाधार्यमाणोऽपि सोमःसौम्येनशंभुना ॥
तथाऽपिकृशतांयाते कष्टःखलुपराऽऽश्रयः ॥ १९ ॥
नयनमसिनार्दनस्यशंभो र्मुकुटमणिःसुरशांत्वमाविदेवः ॥
त्यजसिनमृगमात्रमेकमिंदो चिरमिहयेनकलंकिनंवदंति॥ २० ॥
वरमेकाकलारम्या ययाऽधःक्रियतेभवः ॥
बव्हीभिरपिकिंताभिः कलंकोयासुदृश्यते ॥ २१ ॥
क्षीणःक्षीणःसमीपत्वं पूर्णःपूर्णोऽतिदूरतां ॥
उपैतिमित्रात्चंद्रो युक्तंतन्मलिनात्मनः ॥ २२ ॥
शुक्लेपक्षेशीतरश्मिर्बलीयान् नमाधान्यंतारकायास्तुदृष्टं ॥
शक्त्यायुक्तेविद्यमानेऽपिकांते नमाधान्यंयोषितांक्वाऽपिदृष्टं ॥२३॥
उच्चैःस्थानकृतोदयैर्बहुविधैर्ज्योतिर्भिरुद्यत्प्रभैः
शुक्राद्यैःकिममीभिरत्रवितथांमोदंदधानैरपि ॥
यावल्लोकतमोऽपहेनभवताल्लक्ष्मीर्नविस्तार्यते
तावच्चंद्रकथंप्रयातिपरमांवृद्धिंसरत्नाकरः ॥ २४ ॥
आस्तेविधुःपरमनिर्वृतएवमौलौ शंभोरितित्रिजगतीजनचित्तवृत्तिः ॥
अंतर्निगूढनयनाऽनलदाहदुःखं जानातिकःपरमृतेबतशीतरश्मेः ॥ २५ ॥
दोषाकरोऽपिकुटिलोऽपिकलंकितोऽपि
मित्राऽवसानसमयेविहितोदयोऽपि ॥
चंद्रस्तथाऽपिहरवल्लभतामुपैति
नैवाऽऽश्रितेषुमहतांगुणदोषशंका ॥ २६ ॥
आननानिहरिणीनयनाना मद्भुतानिचसमीक्ष्यजगत्यां ॥
लज्जयैवघनमंडललीनो मंदमंदमहहेंदुरुदेति ॥ २७ ॥
वीथीषुवीथीषुविलासिनीनां मुखानिसंवीक्ष्यशुचिस्मितानि ॥
जालेषुजालेषुकरंप्रसार्य लावण्यभिक्षामटतीवचंद्रः ॥ २८ ॥

---

१ तृतीयनेत्रस्थितवह्निज्वालाभिः २ षोडशोभागः चतुःषष्टिकलानामन्यतमाच. ३ रुद्रः संतापश्च. ४ सूर्यात्. पक्षेमित्रात्. ५कलंकिनः ६ नक्षत्रैः ७ गुरुः ८ दोषारात्रिस्तस्याःकरः पक्षेदोषाणामाकरःखनिरित्यर्थः ९ सूर्यास्तसमये पक्षे मित्रव्यसनकाले. १० स्त्रियमिवतां. ११ सौंदर्यस्वमिलाषावना.

मेघाऽन्योक्तयः

श्री०॥ गर्जन्नंबुदरातितचकतिकाकूलेनाऽनकश्चित्
वर्षाकालमपेक्ष्यदानसमयेकोऽन्यर्थविपत्तेमुखे ॥
पश्चात्पांकुरतामुपैतिलघुतामप्येतिमूर्खस्ततः
श्रीमद्रामनृपालशेखरविभोदातांकिर्यान्वारिद: ॥ १ ॥
मुंचमुंचसलिलंदयानिधे नाऽस्तिनाऽस्तिसमयोविलंबने ॥
अद्यचातककुलेमृतेपुन र्वारिवारिधरकिंकरिष्यसि ॥२॥
वितरवारिदवारिदवातुरे चिरपिपासितचातकपोतके ॥
मचलितेमरुतिक्षणमन्यथा क्वचभवान्क्वपयःक्वचचातकः॥३॥
त्वमेवचातकाऽऽधार इतिकेषांनगोचरः ॥
किमंभोदवदाऽस्माकं कार्पण्योक्तिंप्रतीक्षसे ॥ ४ ॥
एकस्यतस्यमन्ये धन्यामभ्युन्नतिंजलधरस्य ॥
विश्वसशैलकानन माननमवलोकतेयस्य ॥ ५ ॥
मौवृषेण्यस्यमौलिभ्यं दोषःकोऽभीष्टवर्षिणः ॥
शारदाऽभ्रस्यशुभ्रत्वं यदकुत्रोपयुज्यते ॥ ६ ॥
जलधरजलभरनिकरै रपहरपरितापमुद्धतंजगतः ॥
नोचेदपसरदूरं हिमकरकरदर्शनंवितर ॥ ७ ॥
चातकःस्वाऽनुमानेन जलंप्रार्थयतेऽबुदात् ॥
सत्वोदारतयासर्वां प्लावयन्त्यंबुनामहीं ॥ ८ ॥
शैलेयेषुशिलातलेषुचगिरेःशृंगेषुगर्तेषुच
श्रीखंडेषुबिभीतकेषुचतथापूर्णेषुरिक्तेषुच ॥
स्निग्धेनध्वनिनाऽखिलेऽपिजगतीचक्रेसमंवर्षतो
वंदेवारिदसार्वभौमभवतोविश्वोपकारिव्रतं ॥ ९ ॥
अयिजलदनदास्यसि कतिचित्त्वंचातकायजलकणिकाः ॥
तदयमचिरेणभविता सलिलांजलिदानयोग्यस्ते ॥ १०॥
आसन्नावंवियाच्ञातु चातकाऽमूर्खिमाऽकुरु ॥
तावंतोऽपिनयामेघ नमुक्तावारिबिंदवः ॥ ११ ॥

---

१ कृष्णता २ दावानलपीडिते. ३ पात्रौ. ४ शरत्कालिकस्य. ५ सविनयार्थ.

अमुंकालक्षेपंनयनयनघनंभीषणमुखैः
किमेभिर्निर्घोषैःसृजसिनितरांकारिसलिलं ॥
अयेपथ्याऽपथ्यानकलयसितन्वीव्यतिकर
ज्वलद्दावज्वालावलिजटिलमूर्तेर्विटपिनः ॥ १२ ॥
शोषंगतेसरसिकैरवकमंजरीणां मंतस्तितैमिशुभतिवापविशीर्णदेहः॥
आत्राऽतरेयदिनवारिदवारिपूरैः राक्षावयेस्तदनुर्किमृतमंडनेन॥१३॥
आपोविमुक्ताःकचिदापएव कचिन्नकिंचिद्गरलंकचित्व ॥
यस्मिन्विमुक्ताःप्रभवंतिमुक्ताः पयोदतस्मिन्विमुखःकुतस्त्वं ॥१४॥
दैवदहनजटालज्वालजालाऽऽहतानां
परिगलितलतानांम्लायतांभूरुहाणां ॥
अयिजलधरशैलश्रेणिशृंगेषुतोयं
वितरसिबहुकोयंश्रीमदस्तावकीनः ॥ १५ ॥
शृण्वन्पुरःपरुषगर्जितमस्यहंत
रेपांथविव्हलमनानमनागपिस्याः ॥
विश्वाऽतिवारणसमार्पितजीवनोऽयं
नाऽऽकर्णितःकिमुसखेभवताऽम्बुवाहः ॥ १६ ॥
नोपेक्षानचदाक्षिण्यं नप्रीतिर्नचसंगतिः ॥
तथाऽपिहरतेतापं लोकानामुन्नतोघनः ॥ १७ ॥
धीरध्वनिभिरलंते नीरदमेमासिकोगर्भः ॥
उन्मदवारणबुध्या मध्येजठरंसमुच्छलति ॥ १८ ॥
नाऽहंजलदकदाचि चातकइवजीवनंयाचे ॥
अहमस्मिनीलकंठ स्तुष्येऽहंशब्दमात्रेण ॥ १९ ॥
जलदःसमुद्रसेवा माचरतिसमग्रभुवनभरणाय ॥
कुरुतेतामपिहतमति राग्मंभरिरनिशमौर्वाग्निः ॥ २० ॥

---

१ व्योमोत्थितैर्कोलाहलैः २ तीव्रं, ३ व्याप्तदेहस्य, ४ वृक्षस्य, ५ मत्स्यविशेषः ६ शोभया, ७ दावाग्निः ८ म्लानिंप्राप्नुवतां, ९ पर्वतश्रेणिषु १० मत्तहस्तिबुध्या, ११ बहुगर्जनंकरोति, १२ मयूरः १३ समुद्रसेवां, १४ मंदमतिः १५ स्वोदरपूरकः १६ अहोरात्रं, १७ वाडवाग्निः

वाय्वन्योक्तयः

श्लो० ॥ हेमांभोरुहपत्तनेपरिमलस्तोमोवसंतानिल
स्तत्रत्यैरिवयामिकैर्मधुकरैरारब्धकोलाहलः ॥
निर्यातस्त्वरयाथजन्मिपतितःश्रीखंडपंकद्रवे
लिप्तेकेरलकामिनीकुचतटेखंजःशनैर्गच्छति ॥ १ ॥
लतांपुष्पवतींस्पृष्ट्वा स्नातश्चमहार्णवे ॥
पुनस्तत्स्पर्शभीत्येव वायुर्यातिशनैःशनैः ॥ २ ॥
वायुरेवमहाभूतं वदंतुनिखिलाजनाः ॥
आयुरेवैषभूताना मितिमन्यामहेवयं ॥ ३ ॥
अलिपटलैरनुयातां सत्त्दयत्दयज्वरंविलुंपंतीं ॥
मृगमदपरिमललहरीं समीरकिंपामरेषुरेकिरसि ॥ ४ ॥
येजात्यालघवःसदैवगणनांयातानयेकुत्रचित्
पद्भ्यामेवविमर्दिताःप्रतिदिनंभूमौविलीनाश्चिरं॥
उत्क्षिप्ताश्चपलाशयेनमरुतापश्यांऽतरिक्षेसखे
तुंगानामुपरिस्थितिंक्षितिभृतांकुर्वंत्यमीपांसवः ॥ ५ ॥

सिंहान्योक्तयः

श्लो० ॥ क्षुत्क्षामोऽपिजराकृशोऽपिशिथिलप्रायोऽपिकष्टांदशा
मापन्नोऽपिविपन्नदीधितिरपिप्राणेषुगच्छत्स्वपि ॥
मत्तेभेंद्रविभिन्नकुंभदलनग्रासैकबद्धस्पृहः
किंजीर्णंतृणमत्तिमानमहतामग्रेसरःकेसरी ॥ १ ॥
स्वल्पस्नायुवसाऽवशेषमलिनंनिर्मांसमप्यस्थिगोः
श्वालब्ध्वापरितोषमेतिनतुतस्यक्षुधःशांतये ॥
सिंहोजंबुकमंकमागतमपित्यक्त्वानिहंतिद्विपं
सर्वःकृच्छ्रगतोऽपिवांछतिजनःसत्वाऽनुरूपंफलं ॥ २ ॥
सिंहःशिशुरपिनिपतति मदमलिनकपोलभित्तिषुगजेषु ॥

---

१ कुसुमपालैः २ इत्यनिशेव महाभूतमिति, ३ वायुरित्यत्रवाशब्दस्यैवकारार्थकत्वादेक भूतानामायुरेवेतिभावः, ४ क्षुधयाकृशः ५ क्षीणतेजाः ६ बलानुरूपं.

प्रकृतिरियंसत्ववतां नखलुवयस्तेजसोहेतुः ॥ ३ ॥
एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ॥
स्वप्नेऽप्येवंविधाभिमानो मृगेंद्रस्यनजायते ॥ ४ ॥
मृगेंद्रंवामृगाऽरिंवा क्षुद्रंव्याहरतांजनः ॥
तस्योभयमपिश्लाघ्यं क्रीडादलितदंतिनः ॥ ५ ॥
मृगेभ्योरक्ष्यतेक्षेत्रं नरैस्तृणमयैरपि ॥
सिंहाऽऽक्रांतंपुनर्मूढ नहयैर्नचदंतिभिः ॥ ६ ॥
हरिरलसविलोचनःसहेलं बकमवलोक्यपुनर्जगामनिद्रां ॥
अधिगतपतिविक्रमाऽस्तभीति र्ननुवनिताऽस्यविलोकनंचकार ॥ ७ ॥
एकाकिनिवनवासि न्यराजलक्ष्मण्यनीतिशास्त्रज्ञे ॥
सत्वोच्छ्रितेमृगपतौ राजेतिगिरःपरिणमंति ॥ ८ ॥
नाऽस्योच्छ्रायवतीतनुर्नदशनौनोदीर्घदीर्घाःकराः
सत्यंवारणनैषकेसरिशिशुस्त्वाडंबरैःस्पर्धते ॥
तेजोबीजमजेयमस्यहृदयेन्यस्तंपुनर्वेधसा
तादृक्तादृशमेवयेनसुतरांभोज्यंपशुंमन्यते ॥ ९ ॥
येनाऽनर्गलबालकेलिकलितमत्यैःप्रकादंबिनी
धाराधोरणिधौतधातुपुपुराशैलैःधुलीलायितं ॥
सोऽयंशृंगनिपातभग्नचरणःस्कारस्फुरत्फेरवी
फूत्कारैःकुपितोऽयखादतिमुहुःपाणींमृगग्रामणीः ॥ १० ॥
अनिशंमतंगजानां बृंहितमाकर्ण्यतेयथाविपिने ॥
मन्येतथानजीवति गर्जेद्रपलकवलनःसिंहः ॥ ११ ॥
एकेनाऽपिसुपुत्रेण सिंहीस्वपितिनिर्भयं ॥
सहैवदशभिःपुत्रैः भारंवहतिरासभी ॥ १२ ॥
किमपेक्ष्यफलंपयोधरान् ध्वनतःप्रार्थयतेमृगाधिपः ॥
प्रकृतिःखलुसामहीयसः सहतेनाऽन्यसमुन्नतिंयया ॥ १३ ॥

---

१ परिवारहीनः २ राजचिन्हरहिते. ३ बलोन्नते, ४ शुंडादंडः ५ नूतनमेघमाला. ६ पर्वतश्रेणी. ७ करिगर्जितं. ८ हस्तिमांसग्रासकः ९ गर्दभी. १० शब्दानुकुर्वतः ११ स्वभावः १२ उत्कर्षं.

उत्तुंगशैलशिखरस्थितपादपस्य
काकोऽपिपक्कफलमाप्नुभतेसपक्षः ॥
सिंहोबलीगजविदारणदारुणोऽपि
सीदत्यहोतरुतलेखलुहीनपक्षः ॥ १४ ॥
जीर्णोऽपिक्रमहीनोऽपि कृशोऽपियदिकेसरी ॥
तथाऽपियूथनाथस्य शंकाऽऽतंकायकल्पते ॥ १५ ॥
खनन्नाखुबिलंसिंहः पाषाणशकलाऽऽकुलं ॥
प्राप्नोतिनखभंगंवा फलंवामौषिकंलभेत् ॥ १६
एण.क्रीडतिमूषिकश्चखनतिद्वीपीचगर्वायते
क्रोष्टाक्रंदतिवल्गतेचशशकोवेगाद्द्रुतंधावति ॥
निःशंकंकरिपोतकस्तरुलतामुन्मोटतेलीलया
हंहोसिंहविनात्वयाऽद्यविपिनेकीदृग्दशावर्तते ॥ १७ ॥
यस्याऽवंध्यरुषःप्रतापवसतेर्नादेनधैर्यंद्रुता
शुष्यंतिस्मसदप्रवाहमभितःसद्योऽपिदिग्दंतिनां ॥
दैवात्कष्टदशावशंगतवतः सिंहस्यतस्याऽधुना
कर्षंत्येवकरेणकेसरसटाभारंजरत्कुंजराः ॥ १८ ॥
नाऽभिषेकोनसंस्कारः सिंहस्यक्रियतेवने ॥
विक्रमार्जितसत्वस्य स्वयमेवमृगेंद्रता॥ १९ ॥
दिगंतेश्रूयंतेमदमलिनगंडाःकरटिनः
करिण्यःकारुण्याऽऽस्पदमसमशीलाःखलुमृगाः ॥
इदानींलोकेऽस्मिन्ननुपमशिखानांपुनरयं
नखानांपांडित्यंप्रकटयतुकस्मिन्मृगपतिः ॥ २० ॥
नयत्रस्थेमानंदधुरतिभयभ्रांतनयना
गलद्दानोद्रेकभ्रमदलिकदंबाःकरटिनः ॥
लुठन्मुक्ताहारेभवतिपरलोकंगतवतो
हरेरद्यद्वारेशिवशिवशिवानांकलकलः॥ २१ ॥
वेतंडगंडकंडूति पांडित्यपरिपंथिना ॥

१ पराक्रमरहितः २ सफलकीपरय. ३ वृद्धगजाः ४ गजाः ५ स्थितिं. ६ सिंहस्य. ७ क्रोष्टूनां. ८ मत्तगजानां ९ वैरिणा.

हरिणाहरिणाऽऽलीषु कथ्यतांकःपराक्रमः॥२२॥
यद्यपिचदैवयोगा त्सिंहःपतितोऽतिदुस्तरेकूपे ॥
तदपिचवांछतिसततं करिकुंभविदारणंमनसि ॥ २१ ॥

गजान्योक्तयः

श्री॥दानाऽर्थिनोमधुकरायदिकर्णतालैर्दूरीकृताःकरिवरेणमदांऽधबुध्या॥
तस्यैवगंडयुगमंडनहानिरेषा भृंगाःपुनर्विकचपद्मवनेवसंति ॥ १ ॥
नीवारप्रसवाऽग्रमुष्टिकवलैर्योवर्धितःशैशवे
पीतंयेनसरोजपत्रपुटकेहोमाऽवशेषंपयः ॥
तपश्चान्मदमंथराऽलिवलयव्यालिप्तगंडंगजं
साऽऽनंदंसभयंचपश्यतिमुहुर्दूरेस्थितस्तापसः ॥ २ ॥
कर्णेचामरचारुचचुकलिकाकंठेमणीनांगणः
सिंदूरप्रकरःशिरःपरिसरेपार्श्वांतिकेकिंकिणी ॥
लब्धश्चेन्नृपवाहनेनकरिणावन्येनभूषाविधि
स्तत्किंभूधरधूलिधूसरतनुर्मान्योनवन्योगजः ॥ ३ ॥
कौलिकुरुष्वपरिभुंक्ष्वसरोरुहाणि
गांहस्वशैलतटनिर्झरिणीपयांसि ॥
भावाऽनुरक्तकरिणीकरलालितांऽग
मातंगमुंचमृगराजरणाऽभिलाषं ॥ ४ ॥
पीतंयत्रहिमंपयःकवलितायस्मिन्मृणालांऽकुरा
स्तापाऽऽतैर्ननिमज्ज्ययत्रसरसोमध्येविमुक्तःश्रमः ॥
धिक्तस्यैवजलानिपंकिलयतःपाथोजनिमघ्नतः
कूलान्युत्खनतःकरींद्रभवतोलज्जाऽपिनोजागरा ॥ ५ ॥
रेवावारिणिवारणेन्द्रविपुलेराजीवराजीरजः
पुंजाऽऽपिंजरितोर्मिणिप्रविगलद्दानांऽबुगंधोत्कटे ॥

---

१ मृगपंक्तिषु. २ दानोदकार्थिनः ३ प्रफुल्लकमलवने. ४ तृणधान्यानि. ५ क्रीडां.
६ मज्जनंकुरु. ७ तटानि. ८ नर्मदोदके.

पीतंयेनमृणालिरिक्तमसकृद्वांऽतरालस्थितं
कौपंसोऽपिपपौगजोहतविधे:कोगोचरेनाऽऽगत: ॥ ६ ॥
तापेनाऽपगतस्तृषानचकशापीतानधूलीतनौ
नंस्वच्छंदमकारिकंदकवल:कानामकेलीकथा ॥
दूरोत्क्षिप्तकरेणहंतकरिणास्पृष्टानवापद्मिनी
प्राऽऽरब्धोमधुपैरकारणमहोझंकारकोलाहल: ॥ ७ ॥
लुलायेगोमायौमृगपरिषदिश्वापदकुले
करिष्यन्कार्पण्यंकिमिहमहिमानंगमयसि ॥
निमग्न:पंकेऽस्मिन्ननुभवकरींद्राऽधिपदशा
मभद्रंभद्रंवाविधिलिखितमुन्मूलयतिक:॥ ८ ॥
नाऽभूवन्भुवियस्यकुत्रचिदपिस्पर्धाकरा:कुंजरा:
सिंहेनाऽपिनलंघिताकिमपरंयस्योद्धतापद्धति: ॥
कष्टंसोऽपिकर्दर्थ्यतेकरिवर:स्फाराऽऽरवै:केरवै
रापातालगभीरपंकपटलीमग्नोऽद्यभैयोद्यम: ॥ ९ ॥
भोभो:करींद्रदिवसानिकियंतितावदस्मिन्मरौसमतिवाहयकुत्रचित्त्वं॥
रेवाजलैर्निजकरेणुकरप्रयुक्तै र्भूय:शमंगमयिताऽसिनिदाघदाहं॥१०॥
नगृण्हातिग्रासंनचकमलिकजल्किनिजले
नपंकैर्वाऽऽल्हादंव्रजतिबिसभंगार्धशबलै: ॥
ललंतीप्रेमार्द्रामपिविषहतेनाऽन्यकरिणीं
स्मरन्दावभ्रष्टांस्वदयदयितांवारणपति:॥ ११ ॥
पादाघातविचूर्णितावसुमतीत्रासाऽऽकुला:पक्षिण:
पंकांकानिसरांसिगंडकषणक्षोदक्षता:शाखिन: ॥
प्राप्यैतत्करिपोतकैर्विधिवशाच्छार्दूलशून्यंवनं
तत्तन्नामकृतंविशृंखलधियावक्तुंनयत्पार्यते ॥ १२ ॥
गलेपाशस्तीव्रश्चरणयुगलेगाढनिगडौ
दृढंस्कंधेबंध:शिरसिसृणिपात:खरतर: ॥
नर:स्कंधारूढोवतरमणयोग्येऽपिविषये
नजानीमोऽत्यर्थंद्विरदवदकस्मात्तवमद: ॥ १३ ॥

१ कुपसंबधि. २ महिषे, ३ मृगधूर्तके. ४ धिकृक्रियते, ५ हनप्रयत्न: ६ मरुदेशे.
७ पापय. ८ (अदूरांतलो०)९ अंकुशपात:

कौपिपयसिलघीयसि तापेनकरःप्रसारितःकरिणा ॥
सोऽपिनपयसाल्लिप्तो लाघवमात्मापरंनीतः ॥ १४ ॥
कौपंवारिविलोक्यवारणपतेकिंविस्मितेनाऽऽस्यते
प्रायोभोजनमस्यसंप्रतिभवांस्तत्पीयतामादरात् ॥
उन्मज्जच्छफरीपुलिंदललनापीनस्तनास्फालन
स्फारीभूतमहोर्मिनिर्मलजलादूरेऽधुनानर्मदा ॥ १५ ॥
नोमन्येदृढबंधनात्क्षतमिदंनैवांऽकुशाऽऽघातनं
स्कंधाऽऽरोहणताडनात्परिभवंनैवाऽन्यदेशागमं ॥
चिंतांमेजनयंतिचेतसियथास्मृत्वास्वयूथ्यावने
सिंहत्रासितभीतभीरुकलभायास्यंतिकस्याऽऽश्रयं॥१६॥
पत्युर्यत्पतिताऽवशेषकवलग्रासेनवृत्तिःकृता
पीतंयच्चकराऽवगाहकलुषंतत्पीतशेषंपयः॥
प्राणान्पूर्वतरंविहायतदिदंप्रामंकरिण्याफलं
यद्बंधव्रणकातरस्यकरिणःक्लिष्टंनदृष्टंमुखं ॥ १७ ॥
यदिमत्तोऽसिमतंगज किममीभिरसारसरलतरुदलनैः॥
हरिमनुसरखरनखरं व्यपनेष्यतितेसकरटकंडूतिं ॥१८॥
कलभतवांऽतिकमागत मलिमेनंमाकदाप्यवज्ञासीः ॥
अपिदानसुंदराणां द्विपवर्याणामयंशिरोधार्यः ॥ १९ ॥
गिरिगह्वरेषुगुरुगर्वगुंफितो गजराजपोतनकदाऽपिसंचर ॥
यदिबुध्यतेहरिशिशुःस्तनंधयो भवितांकरेणुपरिशेषितामही॥२०॥
लीलामुकुलितनयनं किंसुखशयनंसमातनुषे ॥
परिणामविषमहरिणा करिनायकवर्धतेवैरं ॥ २१ ॥

मृगान्योक्तयः

श्री० ॥ दूर्वाऽकुरतृणाऽऽहारा धन्यास्तातवनेमृगाः॥
विभवोन्मत्तचित्तानां नपश्यंतिमुखानियत् ॥ १ ॥
एणीगणेषुगुरुगर्वनिमीलिताक्षः

---

१ पार्श्व. २ शबरस्त्री. ३अप्रकर्तृत्वेनपथ्यामानेवान्वयः ४ करिशावकाः ५ सिंह. हरिणीसंघेषु.

किंकृष्णसारखलुखेलसिकानने ऽस्मिन् ॥
सीमांमिमांकलयभिन्नकरींद्रकुंभ
मुक्तामयींहरिविहारवसुंधरायाः ॥ २ ॥
अयिकुरंगितपोवनविभ्रमा दुपगता ऽसिकिरातपुरीमिमां ॥
इहनपश्यसिदारयमारय घसपिबेतिशुकानपिजल्पतः ॥ ३ ॥
तृणमुखमपिनखलुत्वां त्यजंतिहेहरिणवैरिणःशबराः॥
यशसैवजीवितमिदं त्यजयोजितशृंगसंग्रामः ॥ ४ ॥
छित्वापाशमपास्यकूटरचनांभंक्त्वाबलाद्वागुरां
पर्यंताऽग्निशिखाकलापजटिलान्निःसृत्यदूरंवनात् ॥
व्याधानांशरगोचरादतिजवेनोत्प्लुत्यधावन्मृगः
कूपांऽतःपतितःकरोतिविमुखेकिंवाविधौपौरुषं ॥ ५॥
इहकिकुरंगशावक केदारकलममंजरींत्यजसि ॥
तृणधन्वातृणबाण स्तृणघटितःकपटपुरुषोऽयं ॥ ६ ॥
त्यक्तंजन्मघनंतृणांऽकुरवतीमातेवमुक्तास्थली
विश्रांतिस्थितिहेतवोनगणिताबंधूपमाःपादपाः ॥
बालाऽपत्यवियोगकातरमुखीत्यक्ताऽर्धमार्गेमृगी
मृग्यंतःपदवींतथाऽप्यकरुणाव्याधानमुंचंतिमां ॥ ७ ॥
वसंत्यरण्येषुचरंतिदूर्वां पिबंतितोयान्यपरिग्रहाणि ॥
तथाऽपिवध्याहरिणानराणां कोलोकमाराधयितुंसमर्थः ॥ ८ ॥
रोमंथमाचरयमंथरमेत्यनिद्रां मुंचश्रमंतदनुसंचरयेयथेच्छं ॥
दूरेसपामरजनोमुनयःकिलैते निष्कारणंहरिणपोतबिभेषिकस्मात् ॥९॥
यद्वक्त्रंमुहुरीक्षसेनधनिनांब्रूषेनचाटून्मृषा
नैषांगर्वगिरःशृणोषिनचतान्प्रत्याशयाधावसि ॥
कालेबालतृणानिखादसिपरंनिद्रासिनिद्राऽऽगमे
तन्मेब्रूहिकुरंगकुत्रभवताकिंनामतप्तंतपः ॥ १० ॥
नाऽत्रव्याधशराःपतंतिपरितोनैवाऽत्रदावानलो
नाऽप्युच्चावचभीतिरस्तिकुहचिन्नोवागुराभंगुरा ॥

१ जानीहि. २ सिंहविहारस्थानस्य. ३ हरिणि. ४ तपोवनभ्रांत्या. ५ मृगबंधिनां.
६ उड्डीय. ७ चर्वितस्यपुनश्चर्वणं (रंवथ इतिलो०,

पर्यालोच्यकुरंगकेनविहितोनक्षत्रनाथाऽऽश्रयो
नोजानातियदत्रदास्यतिविधिःस्वर्मानुदंतव्रणं ॥ ११ ॥
अपेत्याधःकरधृतशरःपार्श्वतोजालमाला
पृष्ठेवन्हिर्दहतिनितरांसन्निधौसारमेयाः ॥
एणीगर्भादलसगमनाबालकैरुद्धपादा
चिंताऽऽविष्टावदतिहिमृगंकिंकरोमिक्वयामि ॥ १२ ॥
मध्येज्यात्रुटिताशरासनमहोभग्नंदवाग्नेर्भया
न्निर्यातःशबरःशुनासहगतोदग्धाश्चपाशास्ततः ॥
मेघस्तत्रसमागतोवर्षवशात्तेनाऽतिशांतंवनं
श्रीकृष्णस्यकृपालवोयदिभवेत्कःकंनिहंतुंक्षमः ॥ १३ ॥

करभान्योक्तयः

वपुर्विषमसंस्थानं कर्णज्वरकरोरवः ॥
करभस्याऽशुगत्यैव छादितादोषसंहतिः ॥ १ ॥
कुमुदशबले फुल्लाऽम्भोजे.सरोभिरलंकृता
मरकतमणिश्यामांशष्पैर्विहायवनस्थलीं॥
स्मरतिकरभोयद्रुक्षाणांचरन्मरुधन्वनां
परिचयरतिःसादुर्वारानसागुणवैरिता ॥ २ ॥
करभदयितेयोऽसौपीलुस्त्वयामधुलुब्धया
ऽप्यपगतघनच्छायस्यक्तोनसादरमीक्षितः ॥
चलकिसलयःसोऽपीदानींमरूढनवांऽकुरः
करभदयितावृंदैरन्यैःसुखंपरिभुज्यते ॥ ३ ॥
चिंतांमुचगृहाणपल्लवमिदंप्लक्षस्यशाल्मस्यवा
गांगस्याऽस्यजलस्यचंद्रवपुषोगंडूषमेकंपिब ॥
जीवन्द्रक्ष्यसिताःपुन.करभहेदासेरकीयाभुवो
रम्याःपीलुशमीकरीरबदरीकूजत्कपोताऽऽकुलाः ॥ ४ ॥
रूक्षंवपुर्नचविलोचनहारिरूपं
नश्रोत्रयोःसुखदमारटितंकदाऽपि ॥

---

१ अधाम: २ उष्ट्रस्य ३ शीघ्रगमनेन, ४ बालतृणैः ५ पीलुवृक्ष, ६ पल्लवाः ७ नेपतीतिलोके

इत्थंनसाधुनवाकिंचिदिदंचसाधु
तुच्छैरतिःकरभकंटकिनिम्बुभेयत् ॥ ५ ॥
दुष्मापमंबुपवनःपरुषोऽतितापी
छायाभृतोनतरवःफलभारनम्राः ॥
इत्थंसखेकरभवच्मिभवंतमुच्चैः
कासंगतिःखलुमरौरमणीयताया: ॥ ६ ॥
करभदयितेयत्तत्पीतंसुदुर्लभमेकदा
मधुवनगतंतस्याऽलाभेविरौषिकिमुत्सुका ॥
कुरुपरिचितैःपीलोःपत्रैर्धृतिंमरुगोचरे
जंगतिसकलेकस्याऽवामिःसुखस्यनिरंतरं ॥ ७ ॥

रासभान्योक्तिः

रेरेरासभवस्त्रभारवहनात्कुपासमश्नासिकिं
राजाऽश्वाऽवसथंमयाहिचणकाऽभ्यूषान्सुखंभक्षय ॥
सर्वाश्पुच्छवनोहयाइतिविदंत्यत्राऽधिकारेस्थिता
राजातैरुपदिष्टमेवमनुनेसत्यंतटस्थाःपरे ॥ १ ॥

वृषभान्योक्तयः

नाऽस्यभारग्रहेशक्ति नंचवाहगुणःक्वचित् ॥
देवाऽगारेबलीवर्द स्तथाऽप्यश्नातिभोजनं ॥ १ ॥
अंनसिसीदतिसैकतवर्त्मनि प्रचुरभारभरक्षपितोदके ॥
गुरुभरोद्धरणोद्धुरकंधरं स्मरतिमारथिरेषधुरधरं ॥ २ ॥
मार्गेकर्दमदुर्गमेजलमृतेगर्ताशतैराकुले
खिन्नेशाकटिकेभरेऽतिविषमेदूरंगतेरोधसि ॥
शब्देनैतदहंब्रवीमिमहताकृत्वोच्छ्रितांतर्जनी
मीदृक्षेविषमेविहायधवलंवोढुंक्षमःकोधुरं ॥ ३ ॥
केषांचिद्धवलाश्चरंनिवसितश्चित्तेपरेषांपुन
र्नीलोवाकपिलोऽथवावरवृषोरक्तोऽथवामेचकः ॥

---

१ गर्दभ. २ अश्वशाला. ३ अपक्वचणकान् यद्वा चणकाःप्रसिद्धाः अभ्यूषाःपोलिकाः
तान. ४ उदासीनाः५ शकटे. ६ वालुकामयमार्गे. ७ श्वभ्र. ८ शकटस्वामिनि.

ग्रामीणैरवधीरितोऽपिशिशिबिलस्कंधोऽप्यनुच्चैःश्रवाः
स्वांतेमेपरतंत्रतुंदिलतनुर्भोगत्र्यंपंकर्बुरः ॥ ४ ॥
नखनतिखुरैःक्षोणीपृष्ठंनखादतिसादरं
प्रकृतिपरुषंप्रेक्ष्याऽप्ययेनकुप्यतिगोवरः ॥
वहतिचधुरंधुर्यादन्यादनुद्धतकंधरो .
जगतिगुणिनःकार्यौदार्यात्परानतिशरेते ॥ ५ ॥

हंसान्योक्तयः

श्रीः ॥ कंसारिचरणोद्भूत सिंधुकल्लोललालितं ॥
मन्येहंसमनोनीरे कुल्यानांरमतेनते ॥ १ ॥
अंभोजिनीवनविलासविहारमेव
हंसस्यहंतिनितरांकुपितोविधाता ॥
नत्वस्यदुग्धजलभेदविधौप्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौसमर्थः ॥ २ ॥
अपसरणमेवशरण मौनंवानत्रराजहंसस्य ॥
कटुरटतिनिकटवर्ती वाचालोटिट्टिभोयत्र ॥ ३ ॥
वाताऽऽदोलितपंकजस्थितरजःपुंजाऽगरागोज्वलो
यःशृण्वनकलकूजितंमधुलिहांसंजातहर्षःपुरा ॥
कांताचंचुपुटाऽपवर्जितबिसग्रासग्रहेऽप्यक्षमः
सोऽयंसंप्रतिहंसकोमरुगतःकौपंपयोयाचते ॥ ४ ॥
तरौतीरोद्भूतेक्वचिदपिदलाऽऽच्छादिततनुः
पतत्धारासारांगमयविषमांप्रावृषमिमां ॥
निवृत्तायांतस्यांसरसिसरसोत्फुल्लनलिने
सएवत्वंहंसःपुनरपिविलासान्दहते ॥ ५ ॥
रेराजहंसकिमितित्वमिहाऽऽगतोऽसि योऽसौबकःसइहहंसइतिप्रतीतः ॥
तद्गम्यतामनुपदेनपुनःस्वभूमौ यावद्वदंतिनबकंखलुमूढलोकाः ॥ ६ ॥
योदिव्यांबुजलोलमत्तमधुपप्रोद्गीतरम्यंसर
स्यक्त्वामानसमल्पवारिणिरतिंबध्नातिकैदारिके ॥

१ कृष्णः २ कृत्रिमसरिता. ३ चातुर्य.

तस्याऽलीकसुखाऽऽशयापरिभवक्षेत्रीकृतस्याऽधुना
हंसस्योपरिरिट्टिभोयदिपदंधत्तेऽत्रकोविस्मयः ॥ ७ ॥
कस्त्वंलोहितलोचनाऽऽस्यचरणोहंसःकुतोमानसात्
किंतत्राऽस्तिसुवर्णपंकजवनान्यंभःसुधासन्निभं ॥
रत्नानांनिचयाःप्रवाललतिकावैदूर्यरोहःक्वचि
च्छंबूकानहिसंतिनेतिचबकैराकर्ण्यहीहीकृतं ॥ ८ ॥
यःसंतापमपाकरोतिजगतांयश्चोपकारक्षमः
सर्वेषाममृतात्मकेनवपुषाप्रीणातिनेत्राणियः ॥
तस्याऽप्युन्नतिमंबुदस्यसहसेयन्नत्वमेतावता
वर्णेनैवपरंमरालधवलःकृष्णश्चरित्रैरसि ॥ ९ ॥
हंसोऽध्वगश्रममपोहयितुंदिनांते
कारंडकाकबककोककुलंप्रविष्टः ॥
मूकोऽयमित्युपहसंतिलुनंतिपक्षा
न्नीचाऽऽश्रयोहिमहतामपमानहेतुः ॥ १० ॥
यदिनामदैवगत्या जगदसरोजंसदैवसंजातं॥
अवकरनिकरंविकिरति तत्किंकृकवाकुरिवहंसः ॥ ११ ॥
अस्तियद्यपिसर्वत्र नीरनीरजमंडितं ॥
रमतेनमरालस्य मानसंमानसंविना ॥ १२ ॥
पुरासरसिमानसेविकचसारसाऽलिस्खल
त्परागसुरभीकृतेपयसियस्ययातंवयः ॥
सपल्वलजलेऽधुनामिलदनेकभेकाऽऽकुले
मरालकुलनायकःकथयरेकथंवर्ततां ॥ १३ ॥
नीरक्षीरविवेके हंसाऽऽलस्यंत्वमेवतनुषेचेत् ॥
विश्वस्मिन्नधुनाऽन्यः कुलव्रतंपालयिष्यतिकः ॥ १४ ॥
येवर्धिताःकनकपंकजरेणुमध्ये मंदाकिनीविमलनीरतरंगभंगैः॥
तेसांप्रतंविधिवशात्खलुराजहंसाः शैवालजालजटिलंजलमाश्रयंति॥१५॥

---

१ रक्तं २ जलशुकयः ३ हंस. ४ संकरसंचयं. (केरइतिलो.)५ ताम्रचूडः ६ मानससरोवरं ७ अल्पजलाशयजले. ८ दर्दुरन्यात.

भ्रमरान्योक्तयः

श्री० ॥ अलिरयंनलिनीदलमध्यगः कमलिनीमकरंदमदाऽलसः ॥
विधिवशात्परदेशमुपागतः कुटजपुष्परसंबहुमन्यते ॥ १ ॥
मधुकरतवकरनिकरैः किंकिक्रांतंवनंनकुसुमानां ॥
तद्वदसरसिजकमले लब्धोंकचिद्यदन्यतस्तल्कि ॥ २ ॥
गौरींचंपककलिका मपहायभ्रांतदुर्बुत्थे ॥
शाल्मलिकुसुमदलेषु स्वैरंगुंजन्नलज्जसेमधुप ॥ ३ ॥
भ्रमनूवनांतेनवमंजरीषु नषट्पदीगंधफलीमजिघ्रत् ॥
साकिंनरम्यासचकिंनरंता बलीयसीकेवलमीश्वरेच्छा ॥४॥
भ्रमरभ्रमतादिगंतराणि क्वचिदासादितमीक्षितंश्रुतंवा ॥
वदसत्यमपास्यपक्षपातं यदिजातीकुसुमाऽनुकारिपुष्पं ॥ ५ ॥
अभिनवनलिनीविनोदलुब्धो मुकुलितकैरविणीवियोगभीरुः ॥
भ्रमतिमधुकरोऽयमंतराले श्रयतिनपंकजिनींकुमुद्वतींवा ॥ ६ ॥
नोमल्लीमयमीहतेनभजतेमत्तेभकुंभस्थलीं
वांसंतींसहतेनचंदनवनीमालंबतेनक्वचित् ॥
जातीमेवन्हदीश्वरीमिवमहाऽऽनंदैककंदांऽकुरां
ध्यायन्निर्वृतिमेतिषट्पदयुवायोगीवबीतंभ्रमः ॥ ७ ॥
केतकीकुसुमंभृंगः खंड्यमानोपिसेवते ॥
दोषाःकिंनामकुर्वंति गुणाऽपहृतचेतसः ॥ ८ ॥
मर्दनमवलोक्यनिष्फल मनित्यतांबंधुजीवकुसुमानां ॥
वनमुपगम्यभ्रमरः संप्रतिजातोदयासक्तः ॥ ९ ॥
फुल्लेषुयःकमलिनीकमलोदरेषु चूतेषुयोविलसितःकलिकांऽतरस्थः ॥
पश्याऽद्यतस्यमधुपस्यशरद्व्यपाये कृच्छ्रेणवेणुविवरेदिवसाःप्रयांति ।१०।
अनुसरतिकरिकपोलं भ्रमरःश्रवणेनताड्यमानोऽपि ॥

---

१ पीतवर्णा, २ (काटेसेमीतिलोके) ३ चंपककलिकां. ४ इच्छांकरोति. ५ माधवी-लतां. ६ मलभ्रमः ७ गुणाकृष्टांतः करणस्य. ८ मदनबाणाख्यंपुष्पं.

गणपतिनतिरस्कारं यद्दानांऽधविलोचनोनीच: ॥ ११ ॥
गंधैराढ्या भुवनविदिताकेतकीस्वर्णवर्णा
पुष्पभ्रांत्याक्षुधितमधुप:पुष्पमध्येपपात ॥
अंधीभूतस्तदनुरजसाकंटकैश्छिन्नपक्ष:
स्थातुंगंतुंक्षणमपिसखेनैवशक्तोद्विरेफ: ॥ १२ ॥
किंक्काऽपिमलयानलैर्विटपिनोनिर्दह्यभस्मीकृता:
किंस्विद्दैवगजेनपंकजवनंनिष्कंदमुन्मीलितं ॥
किंवाहंतकृतांतकेसरिभयात्त्यक्तोमद:कुंजरै
र्येनाऽस्मिन्विरसेकरीरकुसुमेहाभृंगविश्राम्यसि ॥ १३ ॥
गंधाढ्यांनवमल्लिकांमधुकरस्त्यक्त्वागतोयूथिकां
तांत्यक्त्वाऽऽशुगत:सचंदनवनंपश्चात्सरोजंगत: ॥
बद्धस्तत्रनिशाकरेणसहसारोदित्यसौमंदधी:
संतोषेणविनापराभवपदंप्राप्नोतिसर्वोजन: ॥ १४ ॥
मधुकरगणश्चूतंत्यक्त्वागतोनवमल्लिकां
पुनरपिगतोरक्ताऽशोकंकदंबवनंतत: ॥
तदपिसुचिरंस्थित्वातेभ्य:प्रयातिसरोरुह
परिचितजनद्वेषीलोकोनवंनवमीहते ॥ १५ ॥
यस्या:संगमवांछयानगणितावाप्योविनिद्रोत्पला
यामालिंग्यसमुत्सुकेनमनसायात:परांनिर्वृतिं ॥
भ्रमांतामवलोक्यचंदनलतांभृंगेणयज्जीव्यते
धैर्यनामतदस्तुतस्यनपुन:स्नेहाऽनुरूपंकृतं ॥ १६ ॥
अपसरमधुकरदूरं परिमलबहुलेऽपिकेतकीकुसुमे ॥
इहनहिमधुलवलाभो भवतिपरंधूलिधूसरंवदनं ॥ १७ ॥
दूरादुज्झतिचंपकंनचभजत्यंभोजराजीरजो
नोजिघ्रत्यपिपाटलापरिमलंधत्तेनचूतेरतिं ॥
मंदारेयदनादरोविचिकिलोपांतेनसंतृप्यते
तन्मन्येक्कचिदंगभृंगतरुणेनाऽऽस्वादितामालती ॥ १८ ॥

---

१ कृतांत:काल:सएवकेसरीसिंह: २ (जुई) ३ दूरंगच्छ.

येवर्धिताःकरिकपोलमदेनभृंगाः प्रोत्फुल्लपंकजरजःसुरभीकृतांगाः ॥
तेसांप्रतंप्रतिदिनंक्षपयंतिकालं निंबेषुवाऽर्ककुसुमेषुचदैवयोगात् ॥१९॥
कृत्वाऽपिकोशपानं भ्रमरयुवापुरतएककमलिन्याः ॥
अभिलषतिबकुलकलिकां मधुलिहिमलिनेकुतःसत्यं ॥ २० ॥
इहसरसिसहर्षमंजुगुंजाऽभिरामं
मधुकरकुरुकेलिंसार्धमंभोजिनीभिः ॥
अनुपममकरंदाऽऽमोददत्तप्रमोदा
त्यजतिबतननिद्रांमालतीयावदेषा ॥ २१ ॥
येनाऽऽमोदिनिकेसरस्यमुकुलेपीतंमधुस्वेच्छया
नीतायेननिशाःशशांकधवलाःपद्मोदरेशारदीः ॥
भ्रांतंयेनमदप्रवाहमलिनेगंडस्थलेदंतिनां
सोऽयंभृंगयुवाकरीरविटपेबभ्रातितुष्टिकृतः ॥ २२ ॥
येनाऽमंदमरंदे दलदरविंदेदिनान्यनायिषत ॥
कुटजेखलुतेनेहा तेनेहामधुकरेणकथं ॥ २३ ॥
अमरतरुकुसुमसौरभ सेवनसंपूर्णकामस्य ॥
पुष्पांतरसेवेयं भ्रमरस्यविडंबनामहती ॥ २४ ॥
सरजस्कांपांडुवर्णां कंटकप्रकरांऽकिताम् ॥
केतकींसेवसेहंत कथंरोलंबनिस्त्रप: ॥ २५ ॥
अन्यासुतावदुपमर्दसहासुभृंग लोलंविनोदयमनःसुमनोलतासु ॥
बालामजातरजसंकलिकामकाले व्यर्थंकदर्थयसिकिंनवमल्लिकायाः २७॥

कोकिलान्योक्तयः

श्री० ॥ अस्यांसखेबधिरलोकनिवासभूमौ
किंकूजितेनकिलकोकिलकोमलेन ॥

---

१ मधुरं. २ रवंकुरु. ३ शरत्संबंधिनीः ४ प्रचुरपुष्परसे. ५ विकसितकमले. ६ नीतानि. ७ इच्छा. ८ विस्तारिता. कृतेतियावत् ९ कल्पवृक्षः १० सौगंध्यं. ११ रजोयुक्तां १२ समूहः १३ भ्रमर. १४ निर्लज्जः १५ उपमर्दसहंतेताः १६ सतृष्णं लुब्धमितियावत्. १७ अनुत्पन्नपरागां. १८ अयोग्यकाले. १९ दूषयसि.

एतेहिदैवहतकास्तदेभिन्नवर्णं
त्वांकाकमेवकलयंतिकलाऽनभिज्ञाः ॥ १ ॥
रेरेकोकिलमाभजमौनं किंचिदुदंचयपंचमरागं ॥
नोचेत्त्वामिहकोजानीते काककदंबकपिहितेचूते ॥ २ ॥
समुद्गिरसिकिंवाचः पुंस्कोकिलमुकोमलाः ॥
श्वभ्रेऽस्मिन्जडपाषाण गुरुनिर्घोषभैरवे ॥ ३ ॥
कोकिलकलमालापै रलमलमालोकसेरसालांकं ॥
शरनिकरभरितशरधिः शबरःसंरतीहपरिसरेसधनुः ॥ ४ ॥
अविश्वसन्धूर्तधुरंधरोऽपि नरःपुरंध्रीपुरतोऽधएव ॥
अशेषशिक्षाकुशलोऽपिकाकः मैनायतेकिनपिकांऽगनाभिः ॥५॥
तवैतद्वाचिमाधुर्यं जानेकोकिलकृत्रिमं ॥
मपोषितोयैस्तानेव जातपक्षोजहासियत् ॥ ६ ॥
येनाऽऽनंदमयेवसंतसमयेसौरभ्यहेलामिल
द्भृंगालीमुखरेरसालशिखरेनीताःपुरावासराः ॥
आःकालस्यवशेनकोकिलयुवासोऽप्ययमसर्वादिशः
खेलद्वायसचंचुघातविदलन्मूर्धामुहुर्धावति ॥ ७ ॥
क्वचिद्झिल्लीनादःक्वचिदतुलकाकोलकलह
क्वचित्कंकाऽऽरावःक्वचिदपिकपीनांकलकलः ॥
क्वचिद्घोरःफेरुध्वनिरयमहोदैवघटना
त्कथंकारंतेरंरंसतिचकितःकोकिलयुवा ॥ ८ ॥
यस्याऽऽकर्ण्यवचःसुधाकवलितंवाचंयमानामपि
व्यग्राणिव्यथयंतिमन्मथकथाश्चेतांसिचैत्रोत्सवे ॥
रेरेकाकवराकसाकममुनापुंस्कोकिलेनाऽधुना
स्पर्धाबंधमुपेयुषस्तवतुकिलज्जाऽपिनोजागरा ॥ ९ ॥
रेबालकोकिलकरीरमरुस्थलीषु किंदुर्विदग्धमधुरध्वनिमातनोषि ॥
अन्यःसकोऽपिसहकारतरुप्रदेशो राजंतियत्रतवविभ्रमभाषितानि ॥१०॥

---

१ काकसमानवर्णं. २ (भाताइतिलोके) ३ संचरति. ४ आसमंताद्रागे. ५ ई-
प्सते. ६ कोकिलाभिः ७ त्यजसि. ८ काकोलोद्रोणकाकः (डोमकावळाइतिलो.)
९ जंबुकध्वनिः. १० अत्युबंधथातथा ११ कूजति. १२ मौनिनां १३ सह. १४ काकः

रसालशिखराऽऽसीनाः शतंसंतुपतत्रिणः ॥
तन्मंजरीरसाऽऽमोद बिंदुरेवकुहूमुखः ॥ ११ ॥
तत्किस्वरस्तिनयुक्तं यत्पिकैरेकाकमंदिरेपूर्वे ॥
सहकारकुसुमकाले हठेनकुरुषेऽधुनारावं ॥ १२ ॥
दात्यूहाःसरसंरसंतुसुभगंगायंतुकेकामृतः
कादंबाःकलमालपंतुमधुरंकूजंतुकोयष्टयः ॥
दैवाद्यावदसौरसालविटपिच्छायामनासादयन्
निर्विण्णःकुटजेषुकोकिलयुवासंजातमौनव्रतः ॥ १३ ॥
तावत्कोकिलविरसान् यापयदिवसान्वनांतरेनिवसन् ॥
यावन्मिलद्दलिमालः कोऽपिरसालःसमुल्लसति ॥ १४ ॥
एकस्त्वंगहनेऽस्मिन् कोकिलनकलंकदाचिदपिकुर्याः ॥
साजात्यशंकयाऽमी नत्वांनिघ्नंतुनिर्दयाःकाकाः ॥ १५ ॥

चातकान्योक्तयः

श्री० ॥ रेरेचातकसावधानमनसामित्रक्षणंश्रूयता
मंभोदाबहवोवसंतिगगनेसर्वेऽपिनैतादृशाः ॥
केचिद्वृष्टिभिरार्द्रयंतिधरणींगर्जंतिकेचिद्वृथा
यंयंपश्यसितस्यतस्यपुरतोमाब्रूहिदीनंवचः ॥ १ ॥
एकएवखगोमानी चिरंजीवतुचातकः ॥
म्रियतेवापिपासायां याचतेवापुरंदरं ॥ २ ॥
चातकस्यखलुचंचुसंपुटे नोपतंतिकिलवारिबिंदवः ॥
सागरीकृतमहीतलस्यकिं दोषएवजलदस्यदीयते ॥ ३ ॥
सत्यंसत्यंमुनेर्वाक्यं नाऽदत्तमुपतिष्ठति ॥
अंबुभिःपूरितापृथ्वी चातकस्यमरुस्थली ॥ ४ ॥
बीजैरंकुरितंलताभिरुदितंवल्लीभिरुज्जृंभितं
कंदैःकंदलितंजनैःप्रमुदितंधाराधरैर्वर्षति ॥

---

१ कोकिल. २ कालकंटकः जलकाकइतिप्रसिद्धः ३ मयूराः ४ कलहंसाः ५ अव्यक्तमधुरं. ६ टिट्टिभाः ७ नय.

भ्रातश्चातकपातकंकिमपितेसम्यग्वजानीमहे
येनाऽस्मिन्नपतंतिचंचुपुटकेद्वित्राःपयोबिंदवः ॥ ५ ॥
चातकधूमसमूहं दृष्ट्वामाधाववारिधरबुद्ध्या ॥
इहह्विर्भविष्यतिभवतो नयनयुगादेववारिणांपूरः ॥ ६ ॥
रक्ताऽब्जपुंजरजसाऽरुणितान्विमुच्य
स्वच्छान्सुधासमरसानपिवारिराशीन् ॥
यच्चातकःपिबतिवारिधरोदबिंदून्
मन्येतदानैतिभयाच्छिरसोऽभिमानी ॥ ७ ॥
कूपेपानमधोमुखंभवतिमेनद्योवराक्यःस्त्रियः
सामान्यंबकटिट्टिभैःसहसरस्येवंसमालोकयन् ॥
शुष्यत्तालुगलोपिकपिततनुःश्रुत्वागभीरध्वनिं
धैर्यादुद्धृतकंधरोजलधरन्वांयाचतेचातकः ॥ ८ ॥
गर्जितबधिरीकृतकुकुभा किमनेनकृतंहिघनेन ॥
इयतीचातकचंचुपुटी सापिभृतानैवजलेन ॥ ९ ॥
अन्येऽपिसंतिबततामरसाऽवतंसा
हंसाऽवलीवलयिनोजलसन्निवेशाः ॥
कोऽप्यापहोगुरुरयंबतचातकस्य
पौरंदरीयदभिवांछतिवारिधारां ॥ १० ॥
अन्येतेजलदायिनोजलधरास्तृष्णांविनिघ्नंतिये
भ्रातश्चातककिंवृथाविरुदितैःखिन्नोऽसिविश्राम्यतां ॥
मेघःशारदएवकाशधवलःपानीयरिक्तोदरो
गर्जत्येवहिकेवलंभृशतरंनोबिंदुमप्युज्झति ॥ ११ ॥
धिग्वारिदंपरिहृताऽन्यजलाशयस्य
यच्चातकस्यकुरुतेनतृषामशांतिं ॥
धिक्चातकंतमपियोऽथितयाऽस्तलज्ज
स्तंतादृशंचसमुपैतिपिपासितोऽपि ॥ १२ ॥

---

१ नमनमयात्. २ ऐंद्रीं. मेघोत्पन्नामित्यर्थः ३ काशपुष्पवत्पांडुरः ४ परित्यक्ता त्यक्ताःअन्येजलाशयाःसमुद्रादयोयेन. ५ गतलज्जःनिर्लज्जइत्यर्थः

मयूरान्योक्तयः

श्री० ॥ एतस्मिन्मलयाचलेबहुविधैःकिंतैरकिंचित्करैः
काकोलूककपोतकोकिलकुलैरेकोऽपिपार्श्वेस्थितः ॥
केकीकूजतिचेत्तदाविघटितव्यालावलीबंधनः
सेव्यःस्यादिहसर्वलोकमनसामानंदनश्चंदनः ॥ १ ॥
नाहंजलधरभवत श्चातकइवजीवनंयाचे ॥
अहमस्मिनीलकंठो तवखलुतुष्यामिशब्दमात्रेण ॥ २ ॥
अस्मान्विचित्रवपुषस्तवपृष्ठलग्नान्
कस्माद्विमुंचतिभवान्यदिवाविमुंच ॥
रेनीलकंठपुरुहानिरियंतवैव
मौलीपुनःक्षितिभृतांभविताःस्थितिर्नः ॥ ३ ॥
यन्नादपिकःपश्यति शिखिनामाहारनिर्गमस्थानं ॥
यदिजलदनिनदमुदिता स्तएवमूढाननृत्येयुः ॥ ४ ॥

शुकान्योक्तयः

श्री ॥ शुकतवपठनंव्यसनं नगुणःकिंतुसगुणाऽभासः ॥
समजनियेनाऽमरणं शरणंतेपंजरेवासः ॥ १ ॥
अखिलेषुविहंगेषु हंतस्वच्छंदचारिषु ॥
शुकपंजरबंधस्ते मधुराणांगिरांफलं ॥ २ ॥
माणिक्यद्रवलिप्तमौक्तिकतुलांबिभ्रंतिनोदाडिमी
बीजान्येषनिरीक्षतेनरमतेहेमेऽप्यहोपंजरे ॥
तत्तादृग्वनवाससंमदमहामोदैकमेदस्विनी
वृत्तिर्भंगलिताऽनयाहृतगिरव्येवंशुकःशोचति ॥ ३ ॥
इदमपटुकपाटंजर्जरःपंजरोऽयं
विरमतिनगृहेऽस्मिनक्रूरमार्जारयात्रा ॥
शुकमुकुलितजिव्हस्त्छीयतांकिंवचोभि

---

१ मयूरः २ विघटितंव्यालावलीनांबंधनंयस्य: ३ गुदद्वारं. ४ मेघनादेनसंजातानंदाः ५ दोषः ६ मरणपर्यंत.

स्तववचनविनोदेनाऽऽदरःपामराणाम् ॥ ४ ॥
अमुष्मिन्नुद्याने विहगखलएषमतिकलं
विलोलःकाकोलःक्कणतिखलुयावत्कटुतरं ॥
सखेतावत्कीरद्रढयन्दिवाचंचसकलां
नमौनेनन्यूनोभवतिगुणभाजांगुणगणः ॥ ५ ॥
किंशुकेशुकमातिष्ठ चिरंभाविफलेच्छया ॥
बाह्यरंगप्रसंगेन केकेनाऽनेनवंचिताः ॥ ६ ॥

वकान्योक्तयः

श्री० ॥ नालेनेवस्थित्वा पादेनैकेनकुंचितग्रीव ॥
जनयतिकुमुदभ्रांति वृद्धबकोबालमत्स्यानां ॥ १ ॥
नैर्मल्यंवपुषस्तवाऽस्तिवसतिःपद्माकरेजायते
मंदयाहिमनोरमांवदागिरंमौनंनसंपादय ॥
धन्यस्त्वंबकराजहंसपदवींप्राप्तोऽसिकिंतैर्गुणै
र्नीरक्षीरविभागकर्मनिपुणाशक्तिःकथंलभ्यते ॥ २ ॥
जातिस्तस्यनमानसेनशुचिभिर्वृत्तिर्मृणालांऽकुरै
र्नब्रह्मोद्वहनेनानिर्मलयशःप्राप्तानवाचःकलाः ॥
जीवत्सत्त्वधनेनचाह्यधवलोभ्राम्यन्नसगर्वपुन
र्मिथ्यैवोन्नतकंधरःशठबकोहंसैःसहस्पर्धते ॥ ३ ॥
उभौपक्षौश्वेतौवियतिभुविचाऽवारितगतिः
सदामीनान्भुंक्तेवसतिसकलस्थाणुशिरसि ॥
बकेसर्वश्चाद्रोगुणसमुदयःकिंचिदधिको
गुणाःस्थानेमान्यानतुनरवरस्थानरहिताः ॥ ४ ॥

---

१ द्रोणकाकः २ जन्म ३ शुभ्रैः ४ जीवनं, ५ ब्रह्मणःउद्वहनेनवाहनतयापृष्ठे-धारणेन. ६ जीवंतोयेसत्वामत्स्यादयस्तद्रूपेणधनेनहेतुना. ७ मत्स्यान्मीनराशिंच. ८ तरुशैलादयःशिवश्च.

खद्योतान्योक्तयः

जर्जरतृणाऽप्यदहन् सर्षपकणवत्प्रकाशयन्नूनं ॥
कीटत्वमात्मनस्त्वं खद्योतख्यापयस्यवनौ ॥ १ ॥
इंदुःप्रयास्यतिविनश्यतितारकश्रीः
स्थास्यंतिलीढतिमिरानमणिप्रदीपाः ॥
अंधंसमग्रमपिकीटमणेभविष्य
त्युन्मेषमेष्यतिभवानपिदूरमेतत् ॥ २ ॥
अदृष्टेव्यापारंगतवतिदिनानामधिपतौ
यशःशेषीभूतेशशिनिगतधाम्निग्रहगणे ॥
तथाध्वांतंजातंजगदुपगतेमेघसमये
यथाऽभोगपर्यंतेतमभिपटवःकीटमणयः ॥ ३ ॥
घनसंतमसमलीमस दशदिशिनिशियद्विराजसितदन्यत् ॥
कीटमणेदिनमधुना तरणिकरांऽतरितसितकिरणं ॥ ४ ॥

काकान्योक्तयः

श्री० ॥ गात्रंतेमलिनंतथाश्रवणयोरुद्वेगकृत्केंकृतं
भक्ष्यमर्वमपिस्वभावचपलंदुश्चेष्टितंतेसदा ॥
एतैर्वायससंगतोऽप्यविनयैर्दोषैरमीभिःपरं
यत्सर्वत्रकुटुंबवत्सलमतिस्तेनैवधन्योभवान ॥ १ ॥
आमरणादपिविरुतं कुर्वाणाःस्पर्धयासहमयूरैः ॥
किंजानंतिवराकाः काकाःकेकारवंकर्तुं ॥ २ ॥
वयंकाकावयंकाका जल्पंतीतिप्रगेद्विकाः॥
तिमिरारिस्तमोहन्या दितिशंकितमानसाः॥ ३ ॥
तुल्यवर्णच्छदःकृष्णः कोकिलैःसहसंगतः ॥
केनविज्ञायतेकाकः स्वयंयदिनभाषते ॥ ४ ॥

---

१ दर्शनव्यापाररहितेयथास्यात्तथा. यद्वाऽस्थानमितिशेषः २ यशोमात्रावशिष्टे.
३ गततेजसि. ४ (काकुकाकुशब्दः) ५ प्रातःकाले. ६ द्वौककारौनाम्निविद्येतेयेषांति.

तत्काकत्वविमुकाः कटुवाग्वैवर्ण्यधूर्तताऽशुचिताः ॥
यदि विष्ठाकृमिपुष्टे तत्र न दोषाहितश्चित्रं ॥ ५ ॥
रूक्षस्याऽमधुरस्य चाऽतिमलिनच्छायस्य धृष्टस्य च
क्षुद्रस्य क्षतकारिणोऽतिचपलस्याऽऽल्हादविच्छेदिनः ॥
येयं निंबफलेषु काकभवतस्तिक्तेषु नैसर्गिकी
प्रीतिस्तत्सदृशं विधेर्विलसितं निष्पन्नमेतच्चिरात् ॥ ६ ॥
विधिरेव विशेषगर्हणीयः करटत्वं रटकस्तवाऽपराधः ॥
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥ ७ ॥
कृष्णं वपुर्वहतु चुंबतु सत्फलानि
रम्येषु मवसतु चूतवनांतरेषु ॥
पुंस्कोकिलस्य चरितानि करोतु कामं
काकः कलध्वनिविधौ सनु काक एव ॥ ८ ॥
किं केकीव शिखंडमंडिततनुः किं कीरवत्पाठकः
किं वा हंस इवांगनागतिगुरुः सारीव किं सुस्वरः ॥
किं वा हंत शकुंतबालपिकवत्कर्णाऽमृतं स्यंदते
काकः केन गुणेन कांचनमये व्यापारितः पंजरे ॥ ९ ॥
अहो माहो वराकस्य काकस्य यदसौ पुरः ॥
सरीसर्ति न रीनाति यदयं शारिहंसयोः ॥ १० ॥
कर्णाऽरुंतुदमंतरेण रणितं गाहस्व काक स्वयं
माकंदं मकरंदशालिनमिह त्वां मन्महे कोकिलं ॥
धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां
नेपालक्षितिपालफालपतिते पंकेन शंकेत कः ॥ ११ ॥

समुद्रान्योक्तयः

श्लो० ॥ आस्तां तावदहो समुद्र महिमा दूरेऽपि कर्णप्रिय
स्तीरे यस्य पिपासयैव मरणं प्राप्नोति शीघ्रं जनः ॥
तस्मादंबुनिधेर्वरं लघुसरः कूपोऽथवा वापिका
यत्र स्वात्मकरद्वयेन सलिलं पेपीयते स्वेच्छया ॥ १ ॥

१ निंबः, २ काक. ३ रटशब्दकुरु, ४ पक्षिविशेषः (मालुसी मैना इति लोके)

भवत्तरतरंगैर्दूरमुत्सारितोऽपि
भयपतितवकोर्तिर्दक्षिणाऽऽवर्तशंखः ॥
परिकलयपयोधेपद्मनाभाऽर्चयोग्यं
तवनिकटनिषण्णैःक्षुद्रकैःश्लाघ्यताका ॥ २ ॥
नाऽवैज्ञानाऽप्यवैदग्ध्य मुदधेर्महिमैवसः ॥
यत्तीरपंकमग्नानि महारत्नानिशेरते ॥ ३ ॥
यद्यपिबद्धःशैलै र्यदपिचगिरिमथनमुषितसर्वस्वः ॥
तदपिचविभीतभूधर रक्षायांदीक्षितोजलधिः ॥ ४ ॥
यद्यपिस्वच्छभावेन दर्शयत्युदधिर्मणीन् ॥
तथाऽपिजानुदघ्नोऽय मितिचेतसिमाकृथाः ॥ ५ ॥
रत्नैरापूरितस्याऽपि मदलेशोऽपिनाऽम्बुधेः ॥
मुक्ताःकतिपयाःप्राप्य मातंगामदविव्हलाः ॥ ६ ॥
अधःकरोषियद्रत्नं मूर्ध्नाधारयसेतृणं ॥
दोषस्तवैवजलधे रत्नंरत्नंतृणंतृणं ॥ ७ ॥
वातोल्लासितकल्लोल धिक्तेसागरगर्जनं ॥
यस्यतीरेतृषाक्रांतः पांथःपृच्छतिवापिकां ॥ ८ ॥
इतःस्वपितिकेशवःकुलमितस्तदीयद्विषा
मितश्चशरणार्थिनःशिखरिपत्रिणःशेरते ॥
इतोऽपिवडवानलःसहसमस्तसंवर्तकै
रहोविततमूर्जितंभरसहंचसिंधोर्वपुः ॥ ९ ॥
साकंग्रावगणैर्लुठंतिमणयोबालाऽर्कबिंबोपमा
नीरेनीरचरैःसमंसभगवान्निद्रातिनारायणः ॥
एवंवीक्ष्यतवाऽविवेकमथचमौढिंपरामुन्नतेः
किंनिंदाम्यथवास्तवीमिकथयक्षीरार्णवत्वामहं ॥ १० ॥

---

१ दक्षिणभागेआवर्तोयस्यएतादृशःशंखः २ जानीहि, ३ विष्णुपूजायोग्यं ४ क्षुद्रशंखैः ५ अज्ञमानः ६ अचतुरत्वं, ७ गिरिमथनेमत्द्दृतंसर्वस्वंचतुर्दशरत्नात्मकंधनंयस्य. ८ विशेषेणभीतोयोभूधरोमैनाकस्तद्रक्षायारक्षणे. इंद्राद्भीतोमैनाकोजलधिमाविश्यहसिमास्थि-तः. ९ जानुप्रमाणः १० वायुनाउल्लासिताःउत्पादिताःकल्लोलामहोर्मयोयस्य, ११ शिखरिणःपर्वताःएवपत्रिणःपक्षिणः १२ संवर्तकसंज्ञकैर्मेघैः १३ पाषाणसमूहैः

किंखलुरत्नैरेतैः किंखलुरत्नायितेनवपुषाते ॥
सलिलमपियन्नतावक मर्णवबदनंमयातितृषितानां ॥ ११ ॥
माकुरुगुरुतागर्वं लघुरन्योनाऽस्तिसागरत्वत्तः ॥
जलसंग्रहमन्यस्मा स्त्वयिसतिकुर्वंतिपोतस्थाः ॥ १२ ॥

पर्वतान्योक्तयः

विंध्यमंदरसुमेरुभूभृतां यत्पतिस्तुहिनपर्वतोऽभवत् ॥
ईश्वरश्वशुरतामभावत स्तत्भुवंजगतिजृंभतेयशः ॥ १ ॥
येसंतोषसुखप्रबोधमनसस्तेषामभिन्नामुदो
येऽन्यन्येधनलोभसंकुलधियस्तेषांतुदूरेनृणां ॥
इत्थंकस्यकृतेकृतःसविधिनाताद्दक्पदंसंपदां
स्वाऽऽत्मन्येवसमाप्तहेममहिमामेरुर्नमेरोचते ॥ २ ॥
आचक्ष्महेतवकिमद्यतनीमवस्थां
तद्याऽयविंध्यशिखरस्यमनोहरस्य ॥
यत्रैवसममुनयस्तपसानिषेदुः
सोऽयंविलासवसतिःपिशिताशनानां ॥ ३ ॥
किंतेनहेमगिरिणारजताद्रिणावा यत्रस्थिताहितरवस्तरवस्तएव ॥
मन्यामहेमलयमेवयदाश्रयेण शाखोटनिंबकुटजाअपिचंदनाःस्युः ॥४॥
शक्रादरक्षियदिपक्षयुगंतथाऽपि मैनाकसंततिवनेहगतागतानि ॥
निःसत्वताचनिरंपत्रपताचकिंतु पाथोनिधौनिवसताभवताऽर्जिताच॥५॥

अगस्त्यान्योक्ती

कंपंतेगिरयःपुरंदरभियामैनाकमुख्याःपुनः
क्रंदंत्यंबुधराःस्फुरंतिवडवावन्होद्गतावह्नयः ॥
भोक्तुंभोद्भवमुद्यतांजलनिधिःस्वस्थस्तुतेसांप्रतं
निद्रालुश्लथबाहुवल्लिकमलाऽऽश्लेषोहरिःसीदति ॥ १ ॥

---

१ नौकास्थिताःनाविकाइत्यर्थः २ राक्षसानां ३ मेरुणा, ४ कैलासेन. ५ (शाखो-टाइतिलो०) ६ निर्बलत्वं. ७ निर्लज्जत्वं. ८ इंद्रभयेन.

अल्पीयसैवपयसा यत्कुंभःपूर्यतेभसितदंतव ॥
श्रोत्रियःपश्यत कुंभोद्भूतःपयोधिं ॥ २ ॥

नद्यन्योक्तयः

यद्यपिदिशिदिशिसरितः परितःपरिपूरिताऽम्भसःसंति ॥
तदपिपुरंदरतरुणी संगतिसुखदायिनीगंगा ॥ १ ॥
छायांमकुर्वतिनमंतिपुष्पैः फलानियच्छंतितटद्रुमायें ॥
उन्मूल्यतानेवनदीमयाति तरंगिणांकिमृतपन्नमस्ति ॥ २ ॥
कतिपयदिवसस्थायी पूरोदूरोन्नतोऽपिभवितातें ॥
तटिनितटद्रुमपातन पातकमेकंचिरस्थायि ॥ ३ ॥
कुरुगंभीराशयतां कल्लोलैर्जनयलोकविभ्रांतिं ॥
वीतपयोधरलक्ष्मीः कस्यनचरणैर्विलंघ्यासि ॥ ४ ॥
तटिनिचिरायविचारय विंध्यभुवस्तवपवित्रायाः ॥
शुष्यंत्याअपियुक्तं किंखलुरथ्योदकाऽऽदानं ॥ ५ ॥

तडागान्योक्तयः

क्रौंचःक्रीडतुकूर्दतांचकुररःकंकःपरिष्वंजतां
मद्गुर्वाचैतुसारसश्चरसतुमोड्डीयतांटिट्टिभः ॥
भेकाःसंतुबकावसंतुचरतुस्वच्छंदमाटिस्तटे
हंहोपद्मसरःकुतःकतिपयैर्हंसैर्विनाश्रीस्तव ॥ १ ॥
अयमवसरःसरस्ते सलिलैरुपकर्तुमर्थिनामनिशं ॥
तदिदमतिसुलभमंभो भविताजलपूर्णजलधराऽभ्युदये ॥ २ ॥
रेपद्माकरयावदस्तिभवतोमध्यंपयःपूरितं
तावच्चक्रचकोरकंककुररश्रेणींसमुल्लासय ॥
पश्चात्त्वंसमटट्टकोटचटुलत्रोटीपुटव्याहृति
त्रुट्यत्कर्पटकर्परव्यतिकरैर्निंदास्पदंयास्यसि ॥ ३ ॥

---

१ ब्राह्मणसामर्थ्यं. २ समुद्रं. ३ इंद्रस्त्रीणांरंभोर्वश्यादीनांसमागमसुखदात्री. ४ पुष्पैःसहफलानि. ५ ददति. ६ तरंगचपलस्वभावानां ७ अंगीकृतं, ८ शब्दंकरोतु. ९ जलकाकः (पाणकावळा) १० गच्छतु पूजयतुवा.

यातेमय्यचिरान्निदाघमिहिरज्वालाशतैःशुष्कतां
गंतांकंप्रतिपांथसंततिरसौसंतापमालाऽऽकुला ॥
एवंयस्यनिरंतराऽधिपटलैर्नित्यंवपुःक्षीयते
धन्यंजीवनमस्यमार्गसरसोधिग्वारिधीनांजनुः ॥ ४ ॥
आपेदिरेऽबरपथंपरितःपतंगा भृंगारसालमुकुलानिसमाश्रयंति ॥
संकोचमंचतिसरस्त्वयिदीनदीनो मीनोनुहंतकतमांगतिमभ्युपैतु ।५।
इयत्यांसंपत्तावपिचसलिलानांत्वमधुना
नतृष्णामार्तानांहरसियदिकोंसारसहसा ॥
निदाघेचंडांशौकिरतिपरितोऽगारनिकरं
कृशीभूतःकेषामहहपरिहर्ताऽसिखलुतां ॥ ६ ॥

कमलान्योक्तयः

रेपद्मिनीदलतवाऽत्रमयाचरित्रं
दृष्टंविचित्रमिवयद्विदितंभुवंतत ॥
यैरेवशुद्धसलिलैःपरिपालितस्त्वं
तेभ्यःपृथग्भवसिपंकंभवोऽसियस्मात ॥ १ ॥
पंकजंजलेषुवासः प्रीतिर्मधुपेषुकंटकैःसंगः ॥
यद्यपितदपितवैत चित्रंमित्रोदयेहर्षः ॥ २ ॥
कुसुमंकोशातकया विकसतिरात्रौदिवाचकूश्मांड्या ॥
अलिकुलनिचयैर्रुचिरं किंतुयशःकुमुदकमलयोरेव ॥ ३ ॥
वरमश्रीकतालोके नाऽसमानसमानता ॥
इतीवकुमुदोद्भेदे कमलैर्मुकुलायितं ॥ ४ ॥
नालस्यमसरोजलेष्वपिकृताऽऽवासस्यकोशेरुचि
र्ईडेकर्कशतामुखेऽतिमृदुतामित्रेमहानुग्रहः॥
आमूलंगुणसंग्रहव्यसनिताद्वेषश्चदोषाकरे

---

१ सूर्यः २ गमिष्यति. ३ मनोव्यथापरंपराभिः ४ मार्गेयत्सरस्तस्य. ५ आकाशमार्गं. ६ प्राप्नुवंतिसति. ७ हेसरः ८ ग्रीष्मे ९ सूर्ये. १० कर्दमोत्पन्नः ११ डलयोः-सावर्ण्यात्जडेषुवासः १२ भ्रमरेषु,पक्षेमद्यपेषु. १३ स्वागस्त्रैः दुष्टैश्च १४ सूर्यःस्निग्धश्च. १५ दोषाणामाकरे, चंद्रेच.

यस्यैषास्थितिरंबुजस्यवसतिर्युक्तैवतत्तस्त्रियः ॥ ५ ॥
प्रसारितकरेमित्रे जगदुद्योतकारिणि ॥
किंनकैरवलज्जाते कुर्वतःकोशसंवृतिं ॥ ६ ॥
लक्ष्मीसंपर्कजातोऽयं दोषःपद्मस्यनिश्चितं ॥
यदेतद्गुणसंदोह धाम्निचंद्रेपराङ्मुखं ॥ ७ ॥
रत्नाकरतनुजनुषि द्विजराजेराजतिप्रियोमित्रे ॥
अमृतकरेचकलावति पद्मिनिवासाकुलीभवति ॥ ८ ॥
उदितवतिद्विजराजे कस्यनन्हृदयंमुदंपरांधत्ते ॥
संकुचसिकमलयदयं हरहरवामोविधिर्भवतः ॥ ९ ॥
अंतश्छिद्राणिभूयांसि कंटकाबहवोबहिः ॥
कथंकमलनालस्य नाऽभुवन्भंगुरागुणाः ॥ १० ॥
अपिदलदरविंदस्यंदमानंमरंदं
तवकिमपिलिहंतोमंजुगुंजंतुभृंगाः ॥
दिशिदिशिनिरपेक्षस्तावकीनंवितन्वन्
परिमलमयमन्योबांधवोगंधवाहः ॥ ११ ॥
स्वच्छंदंदलदरविंदतेमरंदं विंदंतोविदधतुगुंजितंमिलिंदाः
आमोदानथहरिदंतराणिनेतुं नैवाऽन्योजगतिसमीरणात्प्रवीणः ॥ १२ ॥
समुत्पत्तिःस्वच्छेसरसिहरिहस्तेनिवसनं
निवासःपद्मायाःसुरहृदयहारीपरिमलः ॥
गुणैरेतैरन्यैरपिचललितस्यांऽबुजतव
द्विजोत्तंसेहंसेयदिरतिरतीवोन्नतिरियं ॥ १३ ॥
नीरान्निर्मलतोजनिर्मधुरतारामामुखस्पर्धिनी
वासोयस्यहरेःकरेपरिमलोगीर्वाणचेतोहरः ॥
सर्वस्वंतदहोमहाकविगिरांकामस्यचांऽभोरुह
त्वंचेत्प्रीतिमुरीकरोषिमधुपेकिंत्वांप्रतिब्रूमहे ॥ १४ ॥
पद्मिनिकिमितिक्रीडसि मधुपैर्लज्जालवोऽपिनहिकिंते ॥
हरहरविस्मृत्योक्तं क्वनुलज्जासवितृरक्तायाः ॥ १५ ॥

---

१ कोशसंवरणं. २ भ्रमराः ३ दिगंतराणि. ४ वायोः ५ लक्ष्म्याः ६ पक्षिश्रेष्ठे, ७ देवमनोहरः ८ अंगीकरोषि. ९ सूर्यानुरक्तायाः पक्षेसवितापितातस्मिन्नुरक्तायाः पितृगामिन्याइत्यभिप्रायः

कूपान्योक्तयः

पिबंनतवयमंबुधिरंबुदौघ सिंधुप्रवाहपरिपूर्णतयामहीयान् ॥
त्वंत्वर्थिनामुपकरोषियदल्पकूप निष्पीड्यकुक्षियुगलंहिमहत्त्वमेतत् ॥१॥
भीमंश्याममतनुवदनंकूपपातालकुक्षि
क्रोडप्रांतोपहितविभवस्याऽथकिंतेब्रवीमि ॥
येनत्वत्तःसमभिलषितंवांछितुंक्षुद्रकूप
क्राम्यन्मूर्तैर्भवतिसहसाकस्यनाऽधोमुखत्वं ॥ २ ॥
सगुणैःसेवितोपांतो विनतैःप्रागदर्शनः ॥
नीचोऽपिकूपःसत्पात्रै जीवनार्थसमाश्रितः ॥ ३ ॥
यद्यपिबहुगुणगम्यं जीवनमेतस्यकूपमुख्यस्य ॥
जयतितथाऽपिविवेको दानंपात्राऽनुमानेन ॥ ४ ॥
नितरांनीचोऽस्मीति त्वंखेदंकूपमाकदाऽपिकृथाः ॥
अत्यंतसरसहृदयो यतःपरेषांगुणग्रहीताऽसि ॥ ५ ॥

दावानलान्योक्तयः

यस्यांमहत्त्वभाजो भवंतिगुणिनोऽमिताधनुर्दंडाः ॥
दहतस्तांवंशालिं कोवनवन्हेविवेकस्ते ॥ १ ॥
हेदावाऽनलशैलाऽग्र वासिनःसाधुशाखिनः ॥
मुग्धव्यर्थंत्वयादग्धाः प्रेरितेनप्रभंजनैः ॥ २ ॥
दुर्दैवप्रभवप्रभंजनजवादुद्भूतभूमीरुहा
नेतान्सत्वगुणाश्रयानकरुणःशुष्यन्किमुन्माद्यसि ॥
ब्रूमस्त्वांवैनहव्यवाहयदमीदग्धार्धदग्धाअपि
द्रष्टव्यास्तवमूर्छनाद्विलयिनोनामाऽपिनज्ञायते ॥ ३ ॥
विध्वस्ताःमृगपक्षिणोविधुरतांनीतास्थलीदेवता
धूमैरंतरिताःस्वभावमलिनैराशामहीतापिता ॥

---

१ भीमंभयंकरंश्याममंधकारयुक्तत्वात्अतनुसंकुचितंमुखंयस्य. २ रज्जुसहितैः ३ उदकार्थे ४ अत्यंतं. ५ निम्नः ६ रसयुक्तंहृदयंयस्य. ७ असंख्याः ८ वेणुपंक्तिं. ९ वायुभिः १० वनानल.

भस्मीकृत्यप्रसूनमल्लवकठैर्भोगान्महापादपा
नुहसैनदवानलेनविपिनंवल्मीकशेषकृतं ॥ ४ ॥

रत्नान्योक्तयः

यस्यर्वज्रमणेर्भेदे भिद्यंतेलोहसूचयः ॥
करोतितत्रकिंनाम नारीनखविलेखनं ॥ १ ॥
सोमकांतोमणिःस्वच्छः सूर्यकांतस्तथानार्क ॥
उद्गारेतुविशेषोऽस्ति तयोरमृतवन्हयः ॥ २ ॥
स्फटिकस्यगुणोयोऽसौ सएवाऽऽयातिदोषतां ॥
धत्तेस्वच्छतयाछायां यतोमलवतामपि ॥ ३ ॥
सुधाकरकरस्पर्शो बहिर्दैवसिसर्वतः ॥
चंद्रकांतमणेतेन मृदुत्वंलोकविश्रुतं ॥ ४ ॥
वपुःपरीणाहगुणेनतेभ्यो यशस्विनःकिंमणयोभवंति ॥
तथाऽपिचूडासुमहीपतीनां तएवखेलंतिनगंडशैलाः ॥५॥
त्यजनिजगुणाऽभिमानं मैरकतपतितोऽसिपामरेवणिजि ॥
काचमणेरपिमौल्यं लमसेयत्तदपितेश्रेयः ॥ ६ ॥
भ्रष्टंनृपतिकिरीटा द्भूमौपतिततिरोहितंरजसा ॥
विधिविलसितेनरत्नं जनचरणविडंबनंसहते ॥ ७ ॥
आघ्रातंपरिचुंबितंपरिमुहुर्लीढंपुनश्चर्वितं
त्यक्तंवाभुविनीरसेनमनसातत्रव्यथांमाकृथाः ॥
हेसद्रत्नतवैतदेवकुशलंयद्वानरेणाऽऽदरा
दंतःसारविलोकनव्यसनिनाचूर्णीकृतंनाऽश्मना ॥ ८ ॥

शंखान्योक्तयः

कोटगृहंकुटिलोऽतः कठिनःक्षाराऽबुसंभवःशून्यः ॥
शंखःश्रीपतिनिकटे केनगुणेनस्थितिलेभे ॥ १ ॥

---

१ (वल्कल) २ हीरकमणेः ३ विशालता. ४ (प्राप्यइतिशे०) ५ नीचे ६ छादितं ७ दैवदुर्विपाकेन. ८ हनूमता.

तातःक्षीरनिधिःस्वसाजलधिजाभ्राताशुरेन्द्रद्रुमः
सौजन्यंसहकौस्तुभेनसुधितायस्याग्रिमेबांधवे ॥
धिक्कर्माणिसएवकंबुरधुनापांखंडकांताकरे
विभ्रांतःप्रतिवासरंप्रतिगृहंभैक्ष्येणकुक्षिंभरिः ॥ २ ॥
क्वांऽभोधौजन्मक्वचवपुरिदंकुंदधवलं
क्वचाऽऽवासस्थानंकृतमहहविष्णोःकरतलं ॥
कनीयानामास्येपरिणतिरियंचुंबनविधा
वितीर्णायंशंखःकरुणकरुणंरोदितिमुहुः ॥ ३ ॥

सामान्यवृक्षान्योक्तयः

किंजातोऽसिचतुष्पथेघनतरंछन्नोऽसिकिंछायया
छन्नश्चेत्फलितोऽसिकिंफलभरैराढ्योऽसिकिंसन्नतः ॥
हेसद्वृक्षसहस्वसंप्रतिसखेशाखाशिखाकर्षण
क्षोभाऽऽमोटनभंजनानिजनतःस्वैरेवदुश्चेष्टितैः ॥ १ ॥
छायासुप्तमृगःशकुंतनिवहैर्विष्ठावलिप्तच्छदः
कीटैरावृतकोटरःकपिकुलैःस्कंधेकृतसंश्रयः ॥
विश्रब्धंमधुपैर्निपीतकुसुमःश्लाघ्यःसएकस्तरु
र्यत्रांऽगीकृतसत्त्वसंप्लवभरेभग्नाऽऽपदोऽन्येद्रुमाः ॥ २ ॥
शाखाशतचितवियतः संतिकियंतोनकाननेतरवः ॥
परिमलभरमिलदलिकुल दलितदलाःशाखिनोविरलाः ॥ ३ ॥
इहोद्यानेसंप्रत्यहहपरिशिष्टाःक्रमवशा
दमीवल्मीकास्तेभुजगकुललीलावसतयः ॥
गतास्तेविस्तीर्णस्तवकभरसौरभ्यलहरी
परीतव्योमानःप्रकृतिगुरवःकेऽपितरवः ॥ ४ ॥
तीव्रोनिदाघसमयो बहुपथिकजनश्चमारवःपंथाः ॥
मार्गस्थिततरुरेकः कियतांसंतापमपहरति ॥ ५ ॥
नव्यैःपत्रनिचयै स्तरुर्यैरेवशोभितः ॥

---

१ भगिनी २ लक्ष्मीः ३ (जंगमहातिलो०) ४ कुंदपुष्पवच्छुभ्रं. ५ ([illegible]ति-लो०) ६ व्याप्तं, ७ स्वभावतोमहांतः ८ मरुदेशसंबंधी, ९ नूतनैः

नहातिजीर्णस्तानेव किंवाविषं कुजन्मनः ॥ ६ ॥
रोलंबैर्नैवविलंबितंविचलितंभूमाऽऽकुलैःकोकिलै
र्मायूरैश्चलितंपुरैवरभसात्कीरैरपीरैरितं ॥
एकेनाऽपिसपल्लवेनतरुणादावानलोपप्लवः
सोढःकेनविपत्सुमुंचतिजनोमुग्धोऽपियोलालितः ॥ ७ ॥
पत्रपुष्पफलच्छाया मूलवल्कलदारुभिः ॥
धन्यामहीरुहायेभ्यो निराशायांतिनाऽर्थिनः ॥ ८ ॥
छायावंतोगतव्यालाः स्वारोहाःफलदायिनः ॥
मार्गद्रुमामहांतश्च परेषामेवभूतये ॥ १० ॥
भुक्तास्वादुफलंकृतंचशयनंशाखाऽग्रजैःपल्लवै
स्त्वच्छायापरिशीतलंसुसलिलंपीतंव्यपेतश्रमैः ॥
विश्रांताःसुचिरंपरंसुमनसःप्रीतिःकिमत्रोच्यते
त्वंसन्मार्गतरुर्वयंचपथिकायामःपुनर्दर्शनं ॥ १० ॥
भुक्तानियैस्तवफलानिपचेलिमानि
क्रोडस्थितैरहहवीतभयैःप्रसुप्तं ॥
तेपक्षिणोजलरयेणविकृष्यमाणं
पश्यंतिपादपभवंतममीतटस्थाः ॥ ११ ॥
शाखोटशाल्मलिपलाशकरीरकाद्याः
शृण्वंतुपुण्यनिलयोयदसौवसंतः ॥
युष्मभ्यमर्पयतिपल्लवपुष्पलक्ष्मीं
सौरभ्यसंभवविधिस्तुविधेरधीनः ॥ १२
पांथाऽऽधारइतिद्विजाऽऽश्रयइतिश्लाघ्यस्तरूणामिति
स्निग्धच्छायइतिप्रियोदशइतिस्थानंगुणानामिति ॥
पर्यालोच्यमहातरोतवघनच्छायांवयंसंश्रिता
स्तत्त्वत्कोटरवासिनोद्विरसनादूरीकरिष्यंतिनः ॥ १३ ॥
हिमसमयोवनवह्नि र्जवनःपवनस्तडिल्लुताऽभिभवः ॥

---

१ कुःपृथ्वीतस्याःजन्मयस्य. पक्षे कुत्सितंजन्मयस्य. २ भ्रमरैः ३ विलंबोनकृतः शुकैः ५ पलायितानांमध्येएकेनाऽपितरुणासहृदावानलोपप्लवःकेनसोढ इतिकाकुः उपद्रवः ७ पक्वानि ८ सर्पाः पक्षे पिशुनाः

हंतवद्वृतिमाकलय्य कुमुकुरंपरोपकारं ॥ १४ ॥
मूलंस्थूलमतीवबंधनदृढंशाखाःशतंमांसला
वासोदुर्गमहीधरेतरुपतेकुत्राऽस्तिभीतिस्तव ॥
एकःकिंतुमनागयंजनयतिस्वांतिममाऽधिज्वरं
ज्वालालीवलयीभवन्नकरुणोदावानलोघस्मरः ॥ १५ ॥
धत्तेभरंकुसुमपत्रफलावलीनां घर्मव्यथांवहतिशीतभवांरुजंच ॥
योदेहमर्पयतिचाऽन्यसुखस्यहेतो स्तस्मैवदान्यगुरवेतरवेनमस्ते ॥१६॥

अथवृक्षविशेषान्योक्तयः

तत्रपूर्वंकल्पवृक्षान्योक्तयः

कल्पद्रुमोऽपिकालेन भवेद्यदिफलप्रदः ॥
कोविशेषस्तदातस्य वन्यैरन्यैर्महीरुहैः ॥ १ ॥
स्वर्णैःस्कंधपरिग्रहोमरकतैरुल्लासिताःपल्लवा
मुक्ताभिस्तवकश्रियोमधुलिहांवृंदानिनीलोत्पलैः॥
संकल्पाऽनुविधायियस्यफलितंकस्तस्यधत्तेतुलां
धिक्जातुद्रुमसत्कथासुयदयंकल्पद्रुमोऽपिद्रुमः ॥ २ ॥
औदार्यंभुवनत्रयेऽपिविदितंसंभूतिरंभोनिधे
र्वासोनंदनकाननेपरिमलोगीर्वाणचेतोहरः ॥
एवंदातृगुणोत्करःसुरतरोःसर्वोऽपिलोकोत्तरः
स्यादर्थिप्रवराऽर्थितार्पणविधावेकोविवेकोयदि ॥ ३ ॥
परिमलसुरभितनभसो बहवःकनकाद्रिपरिसरेतरवः ॥
तदपिसुगणांचेतसि निरुपितमिहपारिजातेन ॥ ४ ॥

चंदनान्योक्तयः

लोकानंदनचंदनद्रुमसखेनाऽस्मिन्वनेस्थीयतां
दुर्वंशैःपरुषैरसारहृदयैराक्रांतमेतद्वनं ॥
तेह्यन्योन्यनिघर्षजातदहनज्वालाऽऽवलीसंकुला

१ पुष्पः २ दानशौडानांगुरवे. ३ संभवः ४ वसतिः ५ इंद्रवने. ६ आमोदः
७ दुर्वेणुभिः

नत्वाऽन्येषुकुलेषुनिकेतनमिदंसर्वेबहेदुर्लभं ॥ १ ॥
संत्येवगिलिताऽऽकाशा महीपांशोमहीरुहः ॥
तथाऽपिधन्यताविद्या ऽऽनंदनचंदनद्रुमः ॥ २ ॥
कांताकेलिंकलयतुतरुःकोपिकश्चित्प्रसूणा
मस्यानंदंजनयतुफलैःकोऽपिलोकान्धिनोतु ॥
धन्यंमन्येमलयजमहोयःप्रभूतोपतापं
संसारस्थंद्रुतमपनयत्यात्मदेहव्ययेन ॥ ३ ॥
भ्रातश्चंदनकिंब्रवीमिविकटस्फूर्जत्फणाभीषणा
गंधस्याऽपिमहाविषाःफणभृतोगुप्त्यैपदेयेकृताः ॥
दैवात्पुष्पफलान्वितोयदिभवांस्तत्राऽभविष्यत्तदा
नोजानेकिमकल्पयिष्यदधिकंरक्षार्थमस्याऽऽत्मनः ॥ ४ ॥
यद्यपिचंदनविटपी विधिनाफलकुसुमवर्जितोविहितः ॥
निजवपुषैवपरेषां तथाऽपिसंतापमपनयति ॥ ५ ॥
मूलंभुजंगैःशिखरंविहंगैः शाखाःप्लवंगैःकुसुमानिभृंगैः ॥
नाऽस्त्येवतच्चंदनपादपस्य यन्नाऽऽश्रितंसत्वभरैःसमंतात् ॥६॥
अयिमलयजमहिमाऽयं कस्यगिरामस्तुविषयस्ते ॥
उद्गिरतोयद्गरलं फणिनःपुष्णासिपरिमलोद्गारैः ॥ ७ ॥
पाटीरतवपटीयान् कःपरिपाटीमिमामुरीकर्तुं ॥
यत्पिषतामपिनृणां पिष्टोऽपितनोषिपरिमलैःपुष्टिं ॥ ८ ॥
यैस्त्वंगुणगणवानपि सतांद्विजिव्हैरसेव्यतांनीतः ॥
तानपिवहसिपटीरज किंकथयामस्त्वदीयमौन्नत्यं ॥ ९ ॥

अगुर्वन्योक्ती.

अगुरुरितिवदतुलोको गौरवमत्रैवपुनरहंमन्ये ॥
दर्शितगुणैववृत्ति र्यस्यजनैर्जानितदाहेऽपि ॥ १ ॥
आरामाऽऽभरणस्यपल्लवचयैरापीततिग्मत्विषः

---

१ पृथ्वानि. २ गिलितंयस्तंआकाशंयैः ३ जनसमूहः ४ प्रीणयतु. ५ संसारे-स्थितस्यजनस्य. ६ वानरैः ७ चंदन. ८ अतिशयेनपटुःसमर्थः ९ रीतिं. १० अंगीकर्तुं. ११ पेषणंकुर्वतां. १२ सर्पैः १३ नाम्ना. अथच लघुः १४ उद्यानभूषणस्य.

पाथोदमधमंनपाऽमुकरोरेतस्यरावज्वरं ॥
भूमस्त्वामुपकारकातरगलमाया:पय:संपदो
दग्धोऽप्येतनरादिया:परिमलैरापूर्वनिर्वास्यसि ॥ २ ॥

चंपकान्योक्तय:

अंत:मतमम[१]रुसैकतदह्यमान मूलस्यचंपकतरो:कलिकाशषिता ॥
मायोभवत्यनुचितस्थितिदेशभाजां श्रेय:स्वजीवपरिपालनमात्रमेव॥१॥
उद्यानपालकलशांऽबुनिषेचनाना मेतस्यचंपकतरोरयमेवकाल: ॥
अस्मिन्निदाघनिहतेघनवारिणावा संवर्धितेतववृथोभयथोपयोग: ॥२॥
साधारणतरुबुध्या नमयाबन्धस्तवाऽऽलवाल[२]ोऽपि ॥
लभयसिमामिदानीं चंपकभुवनाऽधिवासिभि:कुसुमै: ॥ ३ ॥
केनाऽत्रचंपकतरोबतरोपितोऽसि
कुग्रामपामरजनाऽतिकवाटिकायां ॥
यत्रमवृत्थवनशाकविवृद्धिलोभा
द्गोभग्नवाटघटनोचितपल्लवोऽसि ॥ ४ ॥
यद्यपिखदिराऽरण्ये गुर्मा[३]वस्तेहिचंपकोवृक्ष: ॥
तदपिचपरिमलमतुलं दिशिदिशिकथयेत्समीरणस्तस्य ॥ ५ ॥

अशोकान्योक्तय:

किंतेनमतयाकिमुन्नततयाकिंवाघनच्छायया
किंवापल्लवलीलयाकिमनयावाशोकपुष्पश्रिया ॥
यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोम:स्तुवन्नन्वह
नस्वादूनिमृदूनिखादतिफलान्याकठमुत्कंठित: ॥ १ ॥
मृदूनांस्वादूनांलघुरपिफलानांनविभव
स्तवाऽशोकस्तोक:स्तबकमहिमासोऽप्यसुरभि: ॥
यदेतन्नोतन्वीकरचरणलावण्यसुभगं
मवालंबालंस्यात्तरुषुसकलंक:किमपर: ॥ २ ॥
रक्त[४]स्त्वंनवपल्लवैरहमपिश्लाघ्यै:प्रियायागुणै

---

१ समूह: २ अल्प: ३ सुगंधरहित: ४ रक्तवर्ण:अनुरक्तश्च.

स्त्वामायांतिशिलीमुखाःस्मरधनुर्मुक्तास्तथामामपि ॥
कांतापादतलाऽऽहतिस्तवमुदेतद्वन्ममाऽप्यावयोः
सर्वंतुल्यमशोककेवलमहंधात्रासशोकःकृतः ॥ २ ॥

मालत्यन्योक्तयः

किंमालतीकुसुमताम्यसिनिष्ठुरेण
केनाऽपियत्किलविलूनमितोलतायाः ॥
लोकोत्तरेणविलसद्गुणगौरवेण
कोनाऽमुनाशिरसिनामकरिष्यतित्वां ॥ १ ॥
म्रदीयस्त्वाऽऽधिक्यान्नभवतिविमर्दक्षममिदं
नचाऽन्येभ्योरूपंभवतिकुसुमेभ्योऽधिकतरं ॥
प्रसूनंमालत्यास्तदपिहृदयाऽऽल्हादकरणं
प्रवीणैरामोदैर्भवतिजगतोमौलिनिलयं ॥ २ ॥
भवतिहृदयहारीकोऽपिकस्याऽपिहेतु
र्नखलुगुणविशेषःप्रेमबंधप्रयोगे ॥
किसलयितवनांतेकोकिलाऽऽलापरम्ये
विकसतिनवसंतेमालतीकोऽत्रहेतुः ॥ ३ ॥
कुसुमस्तबकानम्राः संत्येवपरितोलताः ॥
तथाऽपिभ्रमरभ्रांतिं हरत्येकैवमालती ॥ ४ ॥
गुंजतिमंजुमिलिंदे मालतिमामौनमुपयासीः ॥
शिरसावदान्यगुरवः सादरमेनंवहंतिसुरतरवः ॥ ५ ॥
किंमालतिम्लायसियद्यविंदश्चुंचुंबतुंबीकुसुमंषडंघ्रिः ॥
पदैश्चतुर्भिर्हियुतःपशुश्चेत्सषड्भिरभ्यर्धपशुःकथंनो ॥ ६ ॥
मालतीकुसुमेभातिगुंजन्मत्तमधुव्रतः ॥
प्रयाणेपंचबाणस्यशंखमापूरयन्निव ॥ ७ ॥

---

१ भ्रमराःबाणाश्च. २ कांतापादघातः. पादाहतःप्रमदयाविकसत्यशोकःशोकंजहातिबकुलोमुखसीधुसिक्तः ॥ आलिंगितःकुरबकःकुरुतेविकासमालोकितस्तिलकउत्कलिकोविभातीत्यभियुक्तवचनं. ३ संतापंकुरुषे, ४ छिन्नं. ५ मार्दवाधिक्यात् ६ स्निग्ध-सि. ७ मूढः ८ तुम्बाकुकुसुमं. ९ षट्पदः

मल्लिकान्योक्तिः

नचगंधवहेनचुंबिता नचपीतामधुपेनमंजरी ॥
पिहितैवकठोरशाखया परिणामस्यजगामगोचरं ॥ १ ॥

केतक्यन्योक्ती

पत्राणिकंटकशतैःपरिवेष्टितानि
वार्ताऽपिनाऽस्तिमधुनोरजसांधकारः ॥
आमोदमात्ररसिकेनमधुव्रतेन
नाऽऽलोकितानितवकेतकिदूषणानि ॥ १ ॥
एतासुकेतकिलतासुविकासिनीषु
सौभाग्यमद्भुततरंभवतीबिभर्ति ॥
यत्कंटकैर्व्यथितमात्मवपुर्नजानं
स्त्वामेवसेवितुमुपक्रमतेद्विरेफः ॥ २ ॥

पाटलान्योक्तिः

पाटलयावनमध्ये कुसुमितयामोहितस्तथाभ्रमरः
सैवेयमितियथाभू त्प्रतीतिरस्याऽन्यपुष्पेऽपि ॥ १ ॥

सहकारान्योक्तयः

नतावत्कर्पूरेनचमलयजेनोमृगमदे
फलेवापुष्पेवातवमिलतियादृक्परिमलः ॥
परंत्वेकोदोषस्त्वयिखलुरसालेयदधिकः
पिकेवाकाकेवालघुगुरुविशेषंनमनुषे ॥ १ ॥
उत्तंसकौतुकरसेनविलासिनीभि
र्लूनानियस्यननखैरपिपल्लवानि ॥

---

१ वायुना. २ छादिता. ३ परिणतिंप्राप्तेत्यर्थः ४ आम्रः ५ चंदने. ६ कस्तूरिकायां. ७ कर्णभूषणं.

उद्यानमंडनतरोसहकारसम्य
मंगारकारकरगोचरतांगतोऽसि ॥ २ ॥
कतिपल्लवितानपुष्पितावा तरवःसंतिसमंततोवसंते ॥
जगतोविजयेतुपुष्पकेतोः सहकारीसहकारएकएव ॥ ३ ॥
यावत्फलोदयमुखःसहकारजातः
प्रागेवकंटकचयेनवृतोऽसितावत् ॥
छायाऽपितेनसुलभाफलमस्तुदूरे
त्वंनिष्फलोऽपिहिवरंसुखसेवनीयः ॥ ४ ॥
लोडितमखिलगहनं परितोदृष्टाश्चविटपिनःसर्वे ॥
सहकारनमपेदे मधुपेनतवोपमाजगति ॥ ५ ॥
गर्वमाकुरुशर्करेतवगुणानूजानंतिराज्ञांगृहे
येदीनाधनवर्जिताश्चकृपणाःस्वमेऽपिपश्यंतिनो ॥
आम्रोऽहंमधुकूपकैर्ममफलैस्तृप्ताहिसर्वेजना
हेरंडेतवकिंगुणाममफलैस्तुल्यनकिंचित्फलं ॥ ६ ॥

पनसान्योक्तिः

गरीयःसौरभ्यंरसपरिचयेनाऽर्हतिसुधा
सितामृद्वीकाऽपिमेथिमनिनिमग्नःफलभरः ॥
परार्थेकोशश्रीरितिपुलकितंकंटकमिषा
दहोतेचारित्रंपनसमनसःकस्यनमुदे ॥ १ ॥

कदल्यन्योक्तिः

तालीनरोरनुपकारिफलंफलित्वा
लज्जावशादुचितएवविनाशयोगः॥
एतत्तुचित्रमुपकृत्यफलैःपरेभ्यः
प्राणान्निजान्झटितियत्कदलीजहाति ॥ १ ॥

---

१ रधूलत्वे.

द्राक्षान्योक्ती.

यद्यपिनभवतिहानिः परकीयांचरतिरासभेद्राक्षां ॥
असमंजसमितिमत्वा तथाऽपिखलुखिद्यतेचेतः ॥ १ ॥
दासेरकस्यदासीयं बदरीयदिरोचते ॥
एतावतैवकिंद्राक्षा नसाक्षादमृतमदा ॥ २ ॥

दाडिमान्योक्तिः

आपुष्पप्रसवान्मनोहरतयाविश्वास्यविश्वंजनं
हहोदाडिमतावदेवसहसेवृत्तिंधत्स्वकीयामिह ॥
यावन्नैतिपरोपभोगसहनामेषाततस्तांतथा
ज्ञात्वातेत्दृदयंद्विधादलतियत्तेनाऽतिवंद्योभवान् ॥ १ ॥

नालिकेरान्योक्तिः

प्रथमवयसिपीतंतोयमल्पंस्मरंतः
शिरसिनिहितभारानालिकेरानराणां ॥
ददतिजलमनल्पंस्वादुतज्जीवनांतं
नहिकृतमुपकारंसाधवोविस्मरंति ॥ १ ॥

तालान्योक्तिः

अध्वन्यध्वनिभूरुह.फलमृनोनग्रानुपेक्ष्याऽऽदरा
दूरादुन्नतिसंश्रयव्यसनिनःपांथस्यमुग्धात्मनः ॥
यन्मूलंसमुपागतस्यमधुरच्छायाफलैःकाकथा
शीर्णेनाऽपिहिनोपयोगमगमत्पर्णेनतालद्रुमः ॥ १ ॥

भूर्जान्योक्ती.

दौर्जन्यमात्मनिपरंप्रथितंविधात्रा भूर्जद्रुमस्यविफलत्वसमर्थनेन ॥
किंचर्मभिर्निशितशस्त्रशताऽवकृत्तै राशांनपूरयतिसोऽर्थिपरंपराणां॥

१ उष्ट्रस्य. २ पुष्पोद्गमादारभ्य. ३ दुर्जनत्वं.

कुर्वंतुनामजनतोपकृतिंमसून च्छायाफलैरविकलैःसुलभैर्द्रुमास्ते ॥
सोढास्तुकर्तनरुजःपररक्षणार्थं मेकेनभूर्जतरुणाकरुणापरेण ॥ २ ॥

अश्वत्थान्योक्तिः

वर्द्धितैःसेवितैःकिंतैः सन्त्यश्वत्थेऽन्यपादपैः ॥
वर्धितोनरकाद्रक्षे त्स्पृष्टोऽरिष्टानिहंतियः ॥ १ ॥

न्यग्रोधान्योक्तिः

विस्तीर्णोदीर्घशाखाश्रितशकुनिशतःशाखिनामेषणीस्त्वं
न्यग्रोधक्रोधमंतःप्रकटयसिनचेद्वच्मिकिंचित्तदल्पं ॥
जल्पोऽप्येषत्रपाकृल्लघुपरिकराकापिकूश्मांडवल्ली
पल्लीपृष्ठमतिष्ठाहसतिहिफलनेत्वत्फलादिकिमन्यत् ॥ १ ॥

मधूकान्योक्तिः

तत्तेजस्तरणेर्निदाघसमयेतद्वारिमेघाऽऽगमे
तच्छैत्यंशिशिरेमदेकशरणैःसोढपुरायैर्द्रुमैः ॥
आयातोऽप्यधुनाफलस्यसमयःकोऽयंविनातैरिति
स्मृत्वातानिशुचेवरोदितिगलत्पुष्पैर्मधूकद्रुमः ॥ १ ॥

शाल्मल्यन्योक्तिः

हंसाःपद्मवनाऽऽशयामधुलिहःसौरभ्यलाभाशया
पांथाःस्वादुफलाशयाबलिभुजोगृध्राश्चमांसाशया ॥
दूराद्रुत्तमपुष्परागनिकरैर्निःसारामध्योन्नते
रेरेशाल्मलिपादपमतिदिनंकेनत्वयावंचिताः ॥ १ ॥

निंबान्योक्तयः

निंबाकिंबहुनोक्तेन निंष्फलानिफलानिते ॥
यानिसंजातपाकानि काकानिःशेषयंत्यमी ॥ १ ॥

---

१ भेद: २ लज्जाकृत्, ३ शोकेन, ४ काकाः ५ (गिधाड) इतिप्रसिद्धाः ६ व्यर्थानि

यस्मादर्थिजनोमनोऽभिलषितंलब्ध्वामुदामेदुरः
सार्धंबंधुजनैश्चकारविविधान्भोगान्विलासोत्धुरः ॥
तंदैवेनविवेकशून्यमनसानिर्मूल्यचूतद्रुमं
स्थानेतस्यतुकाकलोकवसतिर्निबःसमारोपितः ॥ २ ॥
येश्चानिंबंपरशुना यश्चैनंमधुसर्पिषा ॥
यश्चैनंगंधमाल्याद्यैः सर्वस्यकटुरेवसः ॥ ३ ॥

बब्बुलान्योक्तिः

गात्रंकंटकसंकटंमविरलच्छायानचाऽऽयासच्छ
न्निर्गंधःकुसुमोत्करस्तवफलंनक्षुद्विनाशक्षमं ॥
बब्बूलद्रुममूलमेतिनजनस्तत्तावदास्तामहो
अन्येषामपिशाखिनांफलवतांगुप्त्यैवृतिर्जायसे ॥ १ ॥

खदिरान्योक्तिः

चंदनेविषधरानसहामहे वस्तुसुंदरमगुप्तिमत्कुतः ॥
रक्षितुंवदकिमात्मसौष्ठवं संचिताःखदिरकंटकास्त्वया ॥ १ ॥

किंशुकान्योक्तिः

किंशुककिंशुकमुखव त्कुसुमानिविकासयस्यनिशं ॥
यस्यांजनोऽनुरागी सागीरतैःकदाऽपिनोच्चाया ॥ १ ॥

शाखोटान्योक्तिः

कस्त्वंभोःकथयामिदैवहतकंमांविद्धिशाखोटकं
वैराग्यादिववृक्षसाधुविदितंकस्मादिदंकथ्यते ॥
वामेनाऽत्रवटस्तमध्वमजनःसर्वात्मनासेवते
नच्छायाऽपिपरोपकारकृतयेमार्गस्थितस्याऽपिमे ॥ १ ॥

---

१ काकलोकनिवासः २ यश्चेति—अत्रवृश्चतिसिंचत्यर्चतीत्यध्याहारेणवाक्यानि-
पूरणीयानि यथायःनिंबंपरशुनावृश्चातिछिनत्ति. एवमग्रेपि. ३ पुष्पप्रकरः ४ शाखीरं.
(कुंपणइतिलो॰) ५ सर्पान्. ६ गुप्तिःरक्षातद्रहितं. ७ पलाशवृक्ष.

पील्वन्योक्तिः

धन्याःसूक्ष्मफलाअपिप्रियतमास्तेपीलुवृक्षाःक्षितौ
क्षुत्क्षीणेनजनेनहिप्रतिदिनंयेषांफलंभुज्यते ॥
किंतैस्तत्रमहाफलैरपिपुनःकल्पद्रुमाद्यैर्द्रुमै
र्येषांनाममनागपिश्रमनुदेछायाऽपिनप्राप्यते ॥ १ ॥

करीरान्योक्ती.

फलंदूरतरेऽप्यास्तां पुष्पासिकुसुमैर्जनान् ॥
इतरेतरवोमन्ये करीरतर्वाकिंकराः ॥ १ ॥
किंपुष्पैःकिंफलैस्तस्य करीरस्यदुरात्मनः ॥
येनवृद्धिंसमासाद्य नकृतःपत्रसंग्रहः ॥ २ ॥

विल्वान्योक्तिः

आमोदानिसुमेदुराणिचमृदुस्वादूनिचक्ष्मारुहा
मुख्यानेषुवनेषुलब्धजनुषांसंतीतरेषामपि ॥
किंतुश्रीफलतातवैवजयिनीमालूरदिङ्मंडले
यस्यैतानिफलानियौवनवतीवक्षोजलक्ष्मीगृहाः ॥ १ ॥

इक्ष्वन्योक्ती

परार्थेयःपीडामनुभवतिभंगेऽपिमधुरो
यदीयःसर्वेषामिहखलुविकारोऽप्यभिमतः ॥
नसंप्राप्तोवृद्धिंयदिसभृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौनपुनरगुणायामरुभुवः ॥ १ ॥
मुखेयद्दैरस्यंवपुरपिपुनर्ग्रंथिनिचितं
नसंतप्तःकोऽपिक्षणमपिभजेन्मूलमभितः ॥
फलंचैवाऽप्राप्यंवितथरसलिप्सस्यभवत
स्तदिक्षोनाऽयुक्तंविहितमितरैर्यत्तुदलनं ॥ २ ॥

---

१ गुडशर्करादिः २ अये. ३ पर्वस्थानं. ४ वितथाद्धलनातिरिक्तसाधनाभावेनफि-
फलारसस्यलिप्सालब्धुमिच्छायस्मिंस्तस्य.

कार्पासान्योक्ती.

श्लाघ्यंकार्पासफलं यस्यगुणैरंभवंतिपिहितानि ॥
मुक्ताफलानितरुणी कुचकलशतटेषुविलसंति ॥ १ ॥
निक्षेपोऽस्थिचयस्यदुःसहतरःशार्मंतुलाऽऽरोहणं
ग्राम्यस्त्रीनखचुंबनव्यतिकरस्तंत्रीमहारव्यथा ॥
मौतंगोक्षितमंडवारिकणिकापानंचकूर्चाऽऽहतिः
कार्पासेनपराऽर्थसाधनविधौकिंकिंनचाऽगीकृतं ॥ २ ॥

शणान्योक्तिः

भूर्जःपरोपकृतये निजकवचविकर्तनंसहते ॥
परबंधनायतुशणः मेक्षस्वमिहांऽतरंकीदृक् ॥ १ ॥

कंटकारिकान्योक्तिः

उचितंनामनारिग्यां केतक्यामपिकंटकाः ॥
रसगंधोज्झितेकिंते कंटकाःकंटकारिके ॥ १ ॥

धत्तूरान्योक्ती.

महेशस्त्वांधत्तेशिरसिरसराजस्यजयिनी
विशुद्धिस्त्वत्संगात्कनकमयमेतत्त्रिभुवनं ॥
तनोतित्वत्सेवानतुकनकवृक्षत्वदपरो
नयत्नात्कःकुर्याद्यदिनसुलभीभावममजः ॥ १ ॥
उन्मत्तधूर्ततरुणोदुनिवासयोग्ये
स्थानेपिशौचपतिनाविनिवेशितोऽसि ॥
किंकैरवाणिविकसंतितमःमयाति
चंद्रोपलोद्रवतिवार्धिरुपैतिवृद्धिं ॥ २ ॥

---

१ मातंगेन अंत्यजेनउक्षितंसिंक्तंयत्तुमंडवारिअन्निकणद्रवोदकतत्कणिकायाःपानं. अतीवाशुद्धानिभाव: २ पारदस्य ३ सुवर्णमयं. ४ धत्तूर. ५ शंकरेण. ६ चंद्रकान्तः

• त्वत्संगाज्जातेतिशेषः जयिनीउत्कर्षवतीरसराजस्यपारदस्यशुद्धिःएतत्त्रिभुवनंकनकमयंतनोतीत्यन्वयः

तांबूलवल्ल्यन्योक्तिः

किंवीरुधोभुविनसंतिसहस्रसंख्या
यासांदलानिनपरोपकृतिंभजंति ॥
एकैववल्लिषुविराजतिनागवल्ली
यान्नागरीवदनचंद्रमलंकरोति ॥ १ ॥

तुंब्यन्योक्तिः

सर्वास्तुंब्यःसमकटुरसास्तुंबिवल्लीप्रसूता
स्तासांबद्धाअपिकतिपयादुस्तरंतारयंति ॥
शब्दायंतेसरसमपराःशुष्ककाष्ठेनिषण्णा
स्तन्मध्येऽन्याज्ज्वलितहृदयाःशोणितंसंपिबंति ॥ १ ॥

बकुलान्योक्तिः

निसर्गादारामेतरुकुलसमारोपसुकृती
कृतीमालाकारोबकुलमपिकुत्राऽपिनिदधे ॥
इदंकोजानीतेयदयमिहकोणांऽतरगतो
जगज्जालंकर्ताकुसुमभरसौरभ्यभरितं ॥ १ ॥

पद्मिन्यन्योक्ती.

अयिमकरंदस्यंदिनि पद्मिनिमन्येतवैवसुभगत्वं ॥
पुष्पवतीमपिभवतीं त्यजतिनवृद्धःशुचिर्हंसः ॥ १ ॥
कमलिनिमलिनीकरोषिचेतः किमितिबकैरवहेलिताऽनभिज्ञैः ॥
परिणतमकरंदमार्मिकास्ते जगतिभवंतुचिरायुषोमिलिंदाः ॥ २ ॥

---

१ लताः २ कुशलः ३ पुष्पयुक्ता. रजस्वलाच ४ श्वेतःपवित्रश्च. ५ राजहंसः-परमहंसश्च. ६ कलुषीकरोषि. ७ अवहेलांनीतातिरस्कृतेत्यर्थः ८ अपंडितैः ९ मर्मज्ञाः १० भ्रमराः

संकीर्णान्योक्तयः

त्वंचेत्संचरसेवृषेणलघुताकानामदिग्दंतिनां
व्यालैःकांचनकुंडलानिकुरुषेहानिर्नहेम्नःपुनः ॥
मूर्ध्नाचेद्वहसेजडांशुमयशःकिनामलोकत्रये
दीपस्याऽभुजबांधवस्यजगतामीशोऽसिकिंब्रूमहे ॥ १ ॥
छिन्सेब्रह्मशिरोयदिप्रथयसिमेतेषुसख्यंयदि
क्षीबःक्रीडसिमातृभिर्यदिरतिंधत्सेश्मशानेयदि ॥
सृष्टासंहरसिप्रजायदितथाऽप्याधायभक्त्यामनः
कंसेवेकरवाणिकिंत्रिजगतीशून्यात्वमेवेश्वरः ॥ २ ॥
दामोदरमंदराहित भुवनयोवहतिलीलयागरुडः ॥
कस्यतरोरुपरिष्टात् खिन्नोऽसौश्रांतिमपनयतु ॥ ३ ॥
अहिरहिरितिसंभ्रमपद मितरजनेकिमपिकातरेभवतु ॥
विहगपतेराहारः सतुसरलमृणालदलरुचिरः ॥ ४ ॥
युक्तोऽसिभुवनभारे मावक्रांवितनुकंधरांशेष ॥
त्वय्येकस्मिन्दुःखिनि सुखितानिभवंतिभुवनानि ॥ ५ ॥
शैत्यंनामगुणस्तवैवतदनुस्वाभाविकीस्वच्छता
किंब्रूमःशुचितांभजंत्यशुचयःस्पर्शेनयस्याऽपरे ॥
किंवाऽतःपरमुच्यतेस्तुतिपदंयज्जीवनंदेहिनां
त्वंचेन्नीचपथेनगच्छसिपयःकस्त्वांनिषेद्धुंक्षमः ॥ ६ ॥
समुद्रस्याऽपत्यंमथितमहिमामुद्रितभुवः
स्वसाभोलेयांऽशोस्त्रिनयनशिरोधामवसतेः ॥
मुरारातेर्योषित्सरसिरुहकिंजल्कनिलया
तथाऽपिश्रीःक्षीबान्भजतिचपलाऽऽलिंगतिखलान् ॥ ७ ॥
तापापहेसन्हृदयेरुचिरेप्रबुद्धे
मित्राऽनुरागनिरतेधृतसद्गुणौघे ॥
स्वांगमदानपरिपूरितषट्पदौघे

---

१ नंदिना. २ दिग्गजानां. ३ चंद्रं. ४ स्थापयसि. ५ मत्तः ६ ब्राह्म्यादिभिः
७ उदरेआहितंस्थापितंभुवनंब्रह्मांडंयेन. ८ श्रांतः ९ गरुडस्य, १० चंद्रस्य.

युक्तंतवेहकमलेकपलेस्छितिर्यंत ॥ ८ ॥
जंभाऽरिरेवजानाति रंभासंभोगविभ्रमं ॥
घेटीचेटीविटःकिस्वि आनात्यमरकामिनी ॥ ९ ॥
यदेतत्कामिन्याःसुरतविरतौपह्नुवरुचा
करेणाऽऽभीतस्त्वंवसतिसहहारेणगुणिना ॥
मुहुःकुर्वन्गीतंकुचकलशपीठोपरिलुठ
न्नयेवीणादंडमकटयफलंकस्यतपसः ॥ १० ॥
सद्वृत्तसद्गुणविचित्रमहार्हकांते कांताघनस्तनतटांऽकितचारुमूर्ते ॥
आःपामरीकठिनकंठविलग्नभंग हाहारहारितमहोभवतागुणित्वं ॥ ११॥
यत्पूर्वंपवनाऽग्निशस्त्रसलिलैश्चीर्णंतपोदुश्चरं
तस्यैतत्फलमीदृशंपरिणतंयज्जातरूपंवपुः ॥
मुग्धाऽपांगकपोलचुंबनसुखंसंगश्चरत्नोत्तमैः
माम कुंडलवांछसेकिमपरंयन्मूढदोलायसे ॥ १२ ॥
मौन्जीसन्मणयोगृहंगिरिगुहात्यागःकिलाऽऽत्मैस्त्वचो
निर्यन्नोपनतैश्चवृत्तिरनिलैरेकत्रचर्येदृशी ॥
अन्यत्राऽनृजुवर्त्मताद्विरसनात्वक्कविषंवीक्षणं
सर्वाऽमंगलसूचककथयभो भोगिनसुखंकिंत्विदं ॥१३ ॥
दुश्चरितैरेवनिजैर्भवतिदुरात्माविशंकितोनित्यं ॥
दंशेनव्ययमापन्नं पन्नगकुलमाकुलीभवति ॥ १४ ॥
यस्मैददातिविवरं भूमिःफूत्कारमात्रभीतेव ॥
आशीविषःसदैवा शैवंकरंडेस्थितिंलभते ॥ १५ ॥
भेकेनैंकणतासरोषपरुषंयत्कृष्णसर्पाऽनने
दातुंकर्णचपेटमुद्गतैर्भियाहस्तःसमुल्लासितः ॥
यच्चाऽधोमुखमक्षिणीपिदधतानागेनतूष्णींस्थितं

---

१ इंद्रः २ घटकाहिकादासीतस्याःजारः ३ देवांगना. ४ गुणयुक्तेनहारेण. ५ आचरितं ६ सुवर्णरूप. ७ आत्मभोगकचुकस्य. (कांतद्वनियमसिद्धस्य) ८ वर्तनं. ९ वक्रमार्गता. १० द्विरावृत्तारमना रसनाद्वयमित्यर्थः द्विरसनेइतिवापाठःप्रथमाद्विवचनं ११ दंतनाशं. १२ सर्पः १३ गारुडिकरड. १४ मंडूकेन. १५ निर्भयेन.

तत्सर्वंविषमंनिशोभगवताकस्याऽपिलीलायितं ॥ १६ ॥

आपूर्येतपुनःस्फुरत्स्फटिकासारोर्मिभिर्वापुषि
भूयोऽपिप्रविजृंभमाणनलिनंपश्येमतोयाऽऽशयं ॥
इत्याशाशततंतुबद्धहृदयोनक्रंदिरदीनधीः
शुष्यत्यातपशोषितस्यसरसस्तीरेजरत्सारसः ॥ १७ ॥

अस्तंगतोऽयमरविंदवनैकबंधु
र्भास्वान्नलंघयतिकोऽपिविधिप्रणीतम् ॥
हेचक्रधैर्यमवलंब्यविमुंचशोकं
धीरास्तरंतिविपदंनतुदीनचित्ताः ॥ १८ ॥

हंसःप्रयातिशनकैर्यदियातुतस्य नैसर्गिकीगतिरियंह्निनतत्रचित्रं ॥
गत्यातयाजिगमिषुर्बकएवमूढ श्चेतोद्दुनोतिसकलस्यजनस्यनूनं ॥ १९॥

उत्तुंगमत्तमातंग मस्तकन्यस्तलोचनः ॥
आसन्नेऽपिचसारंगे नवांछांकुरुतेहरिः ॥ २० ॥

यद्यपिचंदनविटपी विधिनाफलकुसुमवर्जितोहिकृतः ॥
निजवपुषैवपरेषां तथाऽपिसंतापमपनयति ॥ २१ ॥

अस्तियद्यपिसर्वत्र नीरंनीरजमंडितं ॥
रमतेनैवहंसस्य मानसंमानसंविना ॥ २२ ॥

विषभारसहस्रेण गर्वनाऽऽयातिवासुकिः ॥
वृश्चिकोबिंदुमात्रेण ऊर्ध्वंवहतिकंटकं ॥ २३ ॥

दिव्यंचूतरसंपीत्वा गर्वनोयातिकोकिलः ॥
पीत्वाकर्दमपानीयं भेकोरटरटायते ॥ २४ ॥

त्यजकिंशुकपुष्पताभिमानं निजशिरसिभ्रमरोपसेवनेन ॥
विकसन्नवमल्लिकावियोगा त्कुरुतेवन्हिधियात्वयिप्रवेशं ॥२५॥

काकस्यगात्रंयदिकांचनस्य माणिक्यरत्नंयदिचंचुदेशे ॥
एकैकपक्षेग्रथितंमणीनां तथाऽपिकाकोनतुराजहंसः ॥ २६ ॥

सच्छिद्रनिकटेवासो नकर्तव्यःकदाचन ॥
घटीपिबतिपानीयं ताड्यतेझल्लरीयथा ॥ २७ ॥

माकंदराजपरिरंभणलालिताऽपि

---

१ मृगे. २ सिंहः ३ मथनं.

मल्लीवधूर्मधुपरागवतीबभूव ॥
दृष्ट्वाऽपितत्कुटिलतांनजहातिमूलः
प्रायःकुजातिनिवहेषुकुतोऽभिमानः ॥ २८ ॥
आबद्धकृत्रिमसटाजटिलांऽसभित्ति
रारोपितोमृगपतेःपदवींयदिश्वा ॥
मत्तेभकुंभतटपाटनलंपटस्य
नादंकरिष्यतिकथंहरिणाऽधिपस्य ॥ २९ ॥
कैवर्तकर्कशकरग्रहणच्युतोऽपि
जालांतरेनिपतितःशफरोवराकः ॥
दैवात्ततोविगलितोगिलितोबकेन
वक्रेविधौवदकथंव्यवसायसिद्धिः ॥ ३० ॥
माधुर्यसाराधरितामृतस्य तत्कंटकित्वंपनसस्यसह्यं ॥
उन्मादिनोमातुलपुत्रकस्य कथंसहामोबतकंटकित्वं ॥ ३१ ॥
प्रदीपकिमुकुप्यसिप्रलयमारुतप्रज्वल
त्प्रभापटलपाटलप्रकटपावकव्यक्तये ॥
त्वमंगकिमुकामिनीकुचतटोपटीपल्लव
प्रकंपनपरिस्फुरत्पवनलेशपारंगतः ॥ ३२ ॥
यांकांतिवहसिपरांप्रदीपभद्र
स्वीयाऽसावितिन्हृदिमास्मभन्यथास्त्वं ॥
स्नेहेत्वयिनिशिभानुनाऽऽहिताऽसौ
नैवंचेदहनिसतिक्कवागतासा ॥ ३३ ॥
भ्रातर्ग्राम्यकुविंदकंदलयतावस्त्राण्यमूनित्वया
गोणीविभ्रमभाजनानिसुबहून्यात्माकिमायास्यते ॥
किंत्वेकंरुचिरंचिरादभिनवंवासस्तदासूत्र्यतां
यन्नोज्झतिकुचस्थलात्क्षणमपिक्षोणीभुजांवल्लभाः ॥३४ ॥
भ्रातःकांचनलेपगोपितबहिस्ताम्राऽऽकृतेसर्वतो
माभैषीःकैलशेस्थिरोभवचिरंदेवालयस्योपरि ॥

---

१ माधुर्यसारेणतुच्छीकृतंअमृतंयेन. २ धत्तूरफलस्य. ३ (हेंगाबटीसाळया) ४ कांचनलेपेनगोपिताबाह्यानाम्राआकृतिर्यस्य. ५ (कळस)

ताम्रत्वंगतमेवकांचनमयीकीर्तिःस्थिताऽनेऽधुना
नांतस्तत्त्वविचारणमयमिनोऽल्पीकालविहितंवयः ॥ ३५ ॥
नयचगुणवत्पात्र भेकमध्यस्तिसन्निधौ ॥
कस्तत्रभवतःपांथ कूपेऽनुपद्मगाऽऽग्रहः ॥ ३६ ॥
तुल्यंभूभृतिजन्मतुल्यमुभयोर्मूल्यंचतुल्यंवपु
स्तुल्यदार्ढ्यमुदर्पटंकदलनंतुल्यंचपाषाणयोः ॥
एकस्याऽखिलवंदनायविधिनादेवत्वमारोपितं
तद्वद्वारेविहितापरस्यतुपदाऽऽघाताऽऽस्पदंदेहलौ ॥ ३७ ॥
ऊर्णांनैषदधातिनैषविषयोवाहस्यदोहस्यवा
तृप्तिर्नाऽस्यमहोदरस्यबहुभिर्ग्रासैःपेलालैरपि ॥
हाकष्टंकथमस्यपृष्ठशिखरेगोणीसमारोप्यते
कोगृण्हातिकपर्दकेरलमितिग्राम्यैर्गजोहास्यते ॥ ३८ ॥
ग्रासोद्गलितसिक्थस्य करिण.किंगतंभवेत् ॥
पिपीलिकातुतेनैव सकुटुंबोपजीवति ॥ २५ ॥
बंधनस्थोऽपिमातंगः सहस्रभरणक्षमः ॥
अपिस्वच्छंदचारीश्वा स्वोदरेणाऽपिदुःखितः ॥ ३९ ॥
समुपागतवतिदैवा द्वहेलांकुटजमधुकरेमागाः ॥
मकरंदतुंदिलाना मरविंदानामयंमहामान्यः ॥ ४० ॥
उपरिकरवालधारा ऽऽकाराःक्रूराभुजंगमपुंगवात ॥
अंतःसाक्षाद्द्राक्षा दीक्षागुरवोजयंतिकेऽपिजनाः ॥४१॥
विश्वास्यमधुरवचनैः साधून्येवंचयंतिनम्रतमाः ॥
तानपिदधासिमातः काश्यपियातस्तवापिचविवेकः ॥ ४२॥
एकोविश्वसतांहराम्यपघृणःप्राणानहंप्राणिना
मित्येवपरिचिंत्यमास्ममनसिव्याधाऽनुतापंकृथाः ॥
भूपानांभवनेषुकिंचविमलक्षेत्रेषुगूढाशयाः
साधूनामरयोवसंतिकातिनत्वत्तुल्यकक्षाःखलाः ॥ ४३ ॥
अमितगुणोऽपिपदार्थो दोषेणैकेननिंदितोभवति॥

---

१ पर्वते. २ दूवता. ३ उद्यायेटंकास्नैर्दलनं. ४ (पायरीतिलो०) - ग्रान्थ-
त्वभिः ६ (तरवार.) ७ भूमे ८ गनः ९ निष्करुणः

निखिलरसायनमहितो गंधेनोग्रेण लशुनइव ॥ ४४ ॥
उपकारमेवतनुते विपद्गतःसद्गुणोमहताम् ॥
मूर्छांगतोमृतोवा निदर्शनंपारदोऽत्ररसः ॥ ४४ ॥
गिरयोगुरवस्तेभ्यो ऽप्युर्वीगुर्वीततोऽपिजगदंडं ॥
तस्मादप्यतिगुरवः मलयेऽप्यचलामहात्मानः ॥ ४५ ॥
दूरीकरोतिकुमतिविमलीकरोति चेतश्चिरंतनमघंचुलकीकरोति॥
भूतेषुकिंचकरुणांबहुलीकरोति संगःसतांकिमुनमंगलमातनोति ॥४५॥
अनवरतपरोपकरण व्यग्रीभवदमलचेतसांमहतां ॥
आपातकाटवानि स्फुरंतिवचनानिभेषजानीव ॥ ४६ ॥
मृतस्यलिप्साकृपणस्यदित्सा विमार्गगायाश्चरुचिःस्वकांते ॥
सर्पस्यशांतिःकुटिलस्यमैत्री विधातृसृष्टौनहिदृष्टपूर्वा ॥ ४७ ॥
उत्तमानामपिस्त्रीणांविश्वासोनैवविद्यते॥
राजप्रियाःकैरविण्यो रमंतेमधुपैःसह ॥ ४८ ॥
अयाचितःसुखंदत्ते याचितश्चनयच्छति ॥
सर्वस्वंचाऽपिहरते विधिरुच्छृंखलोनृणां ॥ ४९ ॥
कोटिद्वयस्यलाभेऽपिनतसद्वंशजंधनुः ॥
असद्वंश्यःशरःस्तब्धो लक्षलाभाभिशंकया ॥ ५० ॥
अज्ञतयाभ्रमेणावा चूडामणिमाकलय्यकाचमणिं ॥
नृपतिर्वहेनशिरसा तेनाऽसौनह्यनर्घ्यमणिः ॥ ५१ ॥

कस्तूरिकान्योक्तयः

अयिबतगुरुगर्वंमास्मकस्तूरियासी
रखिलपरिमलानांमौलिनासौरभेण ॥
गिरिगहनगुहायांलीनमत्यंतदीनं
स्वजनकममुनैवप्राणहीनंकरोषि ॥ १ ॥
अयित्यक्तासिकस्तूरि पामरैःपंकशंकया ॥
अलंखेदेनभूपालाः किंनसंतिमहीतले ॥ २ ॥

---

१ पूज्यः २ लोभः ३ दानेच्छा, ४ अमूल्यः

जन्मस्थानंनखलुविमलंवर्णनीयोनवर्णो
दूरेपुंसांवपुषिरचनापंकशंकांकरोति ॥
यद्यप्येवंसकलसुरभिद्रव्यगर्वाऽपहारी
कोजानीतिपरिमलगुणःकोऽपिकस्तूरिकायाः ॥ १ ॥

मिश्रप्रकरणं.

श्री० ॥ दानायलक्ष्मीःसुकृतायविद्या चिंतापरब्रह्मविनिश्चयाय ॥
परोपकारायवचांसियस्य वंद्यस्त्रिलोकीतिलकःसएव ॥ १ ॥
निष्कलंककलयैकयाऽपियः संयुतःसखलुपूज्यतेजनैः ॥
भद्रपश्यजलजोऽपिधार्यते शंकरेणशिरसानिशाकरः ॥ २ ॥
अन्यमुखेदुर्वादो यःप्रियवदनेसएवपरिहासः ॥
इतरेंधनजन्मायो धूमःसोऽगुरुभवोधूपः ॥ ३ ॥
अहोवतमहत्कष्टं विपरीतमिदंजगत् ॥
येनाऽपत्रपतेसाधु रसाधुस्तेनतुष्यति ॥ ४ ॥
अदातापुरुषस्त्यागी धनंसंत्यज्यगच्छति ॥
दातारंकृपणंमन्ये मृतोऽप्यर्थंनमुंचति ॥ ५ ॥
दातव्यंभोक्तव्यं सतिविभवेसंग्रहोनकर्तव्यः ॥
पश्येदंमधुकरीणां संचितमर्थंहरंत्यन्ये ॥ ६ ॥
नतद्भुक्तंनतत्पीतं नतत्सुप्तंनतद्रतं ॥
यन्मांसमाहिषक्षीर लॅलनावाजिवर्जितं ॥ ७ ॥
करोतिनिर्मलाऽऽधारं स्तुच्छस्याऽपिमहर्घतां ॥
अंबुनोबिंदुरल्पोऽपिशुक्तौमुक्ताफलंभवेत् ॥ ८ ॥
पतितोऽपिराहुवदने तरणिर्बोधयतिपद्मखंडानि ॥
भवतिविपद्यपिमहता मंगीकृतवस्तुनिर्वाहः ॥ ९ ॥
सएवधन्योविपदि यःस्वरूपंनमुंचति ॥

---

१ त्रिलोक्यांतिलकःभूषणभूतः २ निर्मलविद्यया. ३ दुष्टभाषणं. ४ यद्दाहृति-लोके. ५ काष्ठं. ६ लज्जामाप्नोति. ७ मधुमक्षिकाणां. ८ स्त्री. ९ अश्वः १० आ-श्रयः ११ महामूल्यत्वं. १२ सूर्यः १३ विकासयति. १४ संकटकाले

त्यजत्यर्कंकरैस्तप्तं हिमंदेहंनशीतलं ॥ १० ॥
मासिमासिसमाज्योत्स्ना पक्षयोरुभयोरपि ॥
तत्रैकःशुक्लपक्षोऽभू यशःपुण्यैरवाप्यते ॥ ११ ॥
मत्स्यादयोनजानंति नीरक्षीरविवेचनं ॥
प्रसिद्धिरेवहंसस्य यशःपुण्यैरवाप्यते ॥ १२ ॥
हस्तादपिनदातव्यं गृहादपिनदीयते ॥
परोपकरणार्थाय वचनेकिंदरिद्रता ॥ १३ ॥
पदस्थितस्यपद्मस्य मित्रेवरुणभास्करौ ॥
पदच्युतस्यतस्यैव क्लेशदाहकरावुभौ ॥ १४ ॥
वनानिदहतोवन्हेः सखाभवतिमारुतः ॥
सएवदीपनाशाय कृशेकस्याऽस्तिसौन्हदं ॥ १५ ॥
गतःसकालोयत्राऽऽसी दैवज्ञाकैल्पशाखिनां ॥
उदुंबरफलेभ्योऽपि स्पृहयामोऽद्यजीवितं ॥ १६ ॥
भोज्यंभोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः ॥
विभवोदानशक्तिश्च नाऽल्पस्यतपसःफलं ॥ १७ ॥
वरमुन्नतलांगूला त्सदाधूननभीषणात् ॥
सिंहात्पादप्रहारोऽपि नशृगालाऽधिरोहणं ॥ १८ ॥
अशठमलोभमीजिह्मं त्यागिनमनुरागिणंविशेषज्ञं ॥
यदिनाऽऽश्रयतिनरश्रीः श्रीरेवहिवंचितातत्र ॥ १९
अनुचितकर्माऽऽरंभः स्वजनविरोधोबलीयसिस्पर्धा॥
प्रमदाजनविश्वासो मृत्युद्वाराणिचत्वारि ॥ २० ॥
दुष्टाभार्याशठंमित्रं मृत्यश्चोत्तरदायकः ॥
ससर्पेचगृहेवासो मृत्युरेवनसंशयः ॥ २१ ॥
त्वंचेन्नीचजनानुरागरभसादस्मासुमंदाऽऽदरः
कानोमानदमानहानिरियतीभूःकिंत्वमेकःप्रभुः ॥
गुंजापुंजपरंपरापरिचयाद्भिल्लीजनैरुज्झितं

१ नजानंतीतिकाकुः २ मित्रभावः ३ अवमानः ४ कल्पवृक्षाणां. ५ पुच्छं. ६ कंपनं. ७ सरलं. ८ दानशीलं. ९ ठकर्लाइनिलो० १० बलवद्विषये: ११ विप्रहः १२ स्त्रीपुविश्वासः

मुक्तादामनधारयंतिकिमहोकंठेकुरंगीदृशः ॥ २२ ॥
पंचभिःसहगंतव्यं स्थातव्यंपंचभिःसह ॥
पंचभिःसहवक्तव्यं नदुःखंपंचभिःसह ॥ २३ ॥
जनिताचोपनेताच यश्चविद्यांप्रयच्छति ॥
अन्नदाताभयत्राता पंचैतेपितरःस्मृताः ॥ २४ ॥
त्यजेदेकंकुलस्याऽर्थे ग्रामस्यार्थेकुलंत्यजेत् ॥
ग्रामंजनपदस्यार्थे आत्मार्थेपृथिवींत्यजेत् ॥ २५ ॥
अमृतंदुर्लभंनृणां देवानामुदकंतथा ॥
पितॄणांदुर्लभःपुत्र स्तक्रंशक्रस्यदुर्लभं ॥ २६ ॥
यांतिन्यायप्रवृत्तस्य तिर्यंचोऽपिसहायतां ॥
अपंथानंतुगच्छंतं सोदरोऽपिविमुंचति ॥ २७ ॥
विद्याऽभ्यासोविचारश्च समर्थैरेवशोभते ॥
विवाहश्चविवादश्च समयोगेविशोभते ॥ २८ ॥
लक्ष्मीर्वसतिजिव्हाऽग्रे जिव्हाग्रेमित्रबांधवाः ॥
जिव्हाग्रेबंधनंप्राप्तं जिव्हाग्रेमरणंध्रुवं ॥ २९ ॥
यस्मिन्देशेनसंमानो नप्रीतिर्नेचबांधवाः ॥
नचविद्याऽऽगमःकश्चि न्नतत्रदिवसंवसेत ॥ ३० ॥
वहेदमित्रंस्कंधेन यावत्कालविपर्ययः ॥
अथैवमागतेकाले भिद्याद्घटमिवाऽश्मनि ॥ ३१ ॥
सर्वनाशेसमुत्पन्ने ह्यर्धंत्यजतिपंडितः ॥
अर्धेनकुरुतेकार्यं सर्वनाशोनजायते ॥ ३२ ॥
सुलभाःपुरुषाराजन् सततंप्रियवादिनः ॥
अप्रियस्यचपथ्यस्य वक्ताश्रोताचदुर्लभः ॥ ३३ ॥
मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेनच ॥
द्विषतांसंप्रयोगेण पंडितोऽप्यवसीदति ॥ ३४ ॥
गतश्रीर्गणकान्द्वेष्टि गताऽऽयुश्चचिकित्सकान् ॥
गतश्रीश्चगतायुश्च ब्राह्मणान्द्वेष्टिभारत ॥ ३५ ॥

---

१ उत्पादकः २ उपनयनकर्ता. ३ न्यायमार्गानुसारिणः ४ तिर्यग्जातीयाःप्राणि-इत्यर्थः ५ हितस्य.

शनैःपंथाःशनैःकंथा शनैःपर्वतमस्तके ॥
शनैर्विद्याशनैर्वित्तं पंचैतानिशनैःशनैः ॥ ३६ ॥
आत्मबुद्धिःसुखायैव गुरुबुद्धिर्विशेषतः ॥
परबुद्धिर्विनाशाय स्त्रीबुद्धिःप्रलयावहा ॥ ३७ ॥
सुहृदिनिरंतरचित्ते गुणवतिभृत्येप्रियासुनारीषु ॥
स्वामिनिशक्तिसमेते निवेद्यदुःखंजनःसुखीभवति॥ ३८॥
अर्थाऽऽतुराणांनगुरुर्नबंधुः कामातुराणांनभयंनलज्जा ॥
विद्यातुराणांनसुखंननिद्रा क्षुधातुराणांनरुचिर्नबेला॥३९॥
अन्वयागतविद्याना मन्वयागतसंपदां ॥
विदुषांचप्रभूणांच दर्पंनाऽत्रलिप्यते ॥ ४० ॥
ज्योतिषंशकुनंधर्मं मायश्चितंचिकित्सितं ॥
विनाशास्त्रेणयोब्रूते तमाहुर्ब्रह्मघातकं ॥ ४१ ॥
मक्षिकामशकोवेश्या मूषकोयाचकस्तथा ॥
ग्रामणीर्गणकश्चैव सप्तैतपरभक्षकाः ॥ ४२ ॥
अकृतोपद्रवःकश्चि न्महानपिनपूज्यते ॥
अर्चयंतिनरानागं नताक्ष्र्यंनगजादिक ॥ ४३ ॥
शोभंतेविद्ययाविप्राः क्षत्रियाविजयश्रिया ॥
श्रियोऽनुकूलदानेन लज्जयाचकुलांऽगनाः ॥ ४४ ॥
गंतव्याराजसभा द्रष्टव्याराजवल्लभाःपुरुषाः ॥
यद्यपिनभवत्यर्थो भवत्यनर्थप्रतीकारः ॥ ४६ ॥
ब्राह्मणागणकावेश्याः सारमेयाश्चकुक्कुटाः ॥
दृष्ट्वान्येषुकुप्यंति नजानेतस्यकारणं ॥ ४९ ॥
पुत्रपौत्रवधूभृत्यैः संपूर्णमपिसर्वदा ॥
भार्याहीनगृहस्थस्य शून्यमेवगृहंमतं ॥ ५० ॥
एकंदृष्ट्वाशतंदृष्ट्वा दृष्ट्वापंचशतान्यपि ॥

---

१ पंचसुवाक्येषु अतिवाह्यते, निद्रुयति, आरोहति, प्राप्यते, वर्धते, इतिपदक्रिया-ध्याहारः एतानिमार्गातिवाहनादीनि अनेनपद्येनवाक्येनत्वरयैतानिनभवंतीतिसूचितं. २ वंशपरंपरागतविद्यानां. ३ सगर्वनभवति. ४ कुलस्त्रियः ५ अरिष्टनिरसनं. ६ श्वानः

अतिलीभोनकर्तव्य अक्रमतिमलाके ॥ ५१ ॥
अक्षरद्वयमभ्यस्तं नाऽस्तिनाऽस्तीतियत्पुरा ॥
तदिदंदेहिदेहीति विपरीतमुपस्थितं ॥ ५२ ॥
नवेवयसियःशांतः सशांतइतिमेमतिः ॥
धातुषुक्षीयमाणेषु शांतिःकस्यनजायते ॥ ५३ ॥
अर्थाहसंत्युचितदानविहीनलुब्धं
भूम्योहसतिममभूमिरितिब्रुवाणं ॥
जाराहसंतितनयानुपलालयंतं
मृत्युर्हसत्यवनिपंरणरंगभीरुं ॥ ५४ ॥
ऋणकर्तापिताशत्रु र्माताचव्यभिचारिणी ॥
भार्यारूपवतीशत्रुः पुत्रःशत्रुरपंडितः ॥ ५५ ॥
प्रियवाक्यप्रदानेन सर्वेतुष्यंतिजंतवः ॥
तस्मात्तदेववक्तव्यं वचनेकादरिद्रता ॥ ५६ ॥
विवाहकालेऋतुसंप्रयोगे प्राणाऽत्ययेसर्वधनाऽपहारे ॥
विप्रस्यचार्थेऽप्यनृतंवदेयुः पंचाऽनृतान्याहुरपातकानि॥५७॥
दृष्टिपूतंन्यसेत्पादं वस्त्रपूतंजलंपिबेत् ॥
सत्यपूतंवदेद्वाक्यं मनःपूतंसमाचरेत् ॥ ५८ ॥
धिग्गृहंगृहिणीशून्य धिक्कलत्रमपुत्रकं ॥
धिक्पुत्रमविनीतंच धिग्ज्योतिषमजातकं ॥ ५९ ॥
अश्वंनैवगजंनैव व्याघ्रंनैवचनैवच ॥
अजापुत्रंबलिंदद्या द्देवोदुर्बलघातकः ॥ ६० ॥
दुर्मंत्रीराज्यनाशाय ग्रामनाशायकुंजरः ॥
शालकोगृहनाशाय सर्वनाशायमातुलः ॥ ६१ ॥
जलेतैलंखलेगुह्यं पात्रेदानंमनागपि ॥
प्राज्ञेशास्त्रंस्वयंयाति विस्तारंवस्तुशक्तितः ॥ ६३ ॥
हरिंहरीतकींचैव गायत्रींचदिनेदिने ॥
मोक्षाऽऽरोग्यतपःकाम श्चिंतयेद्भक्षयेज्जपेत् ॥ ६४ ॥
उद्योगःकलहःकंडू र्द्यूतंमद्यंपरस्त्रियः ॥

---

१ मूर्खः २ पवित्रं, ३ गजः ४ स्वल्पं, ५ वस्तुमाहात्म्येन.

आहारोमैथुनंनिद्रा सेवनात्तुविवर्धते ॥ ६५ ॥
पुराकृतकरग्रहावसनपात्ररक्षाकरी
स्थिताशयनसंनिधौगुणवतीनिगूढाऽऽनना ॥
मताजठरपूर्तयेभुजशिरःसमारोपिता
मनोहरतिधोगैटीयुवतिवत्प्रवासेनृणां ॥ ६६ ॥
निद्राप्रियोयःसतुकुंभकर्णो हतःसैमीकेरघुनंदनेन॥
ततोऽस्यपत्नीविधवाप्रजाता श्रोतुंसमायातिकथांपुराणं॥६७
मानरहितःस्वंकार्ये साधनसुपटुर्महोजलधिवासो ॥
श्रुत्येकदृष्टगोत्रः प्रियंभक्तश्चित्तपावनोभगवान्॥६८॥
सत्तारकंनादिनांत मंतर्येस्यस्थितिस्ततः ॥
भवेन्नयनतेसख्यं गुणैरेतैरमापतेः ॥ ६९ ॥
स्त्रीविनश्यतिरूपेण ब्राह्मणोराजसेवया॥
गावोदूरप्रचारेण हिरण्यंलाभलिप्सया ॥ ७० ॥
दारिद्रताधीरतयाविराजते कुरूपताशीलतयाविराजते ॥
कुभोजनंचोष्णतयाविराजते कुवस्त्रताशुभ्रतयाविराजते ॥ ७१ ॥
संहतिःश्रेयसीपुंसां स्वकुलैरल्पकैरपि ॥
तुषेणाऽपिपरित्यक्ता नप्ररोहंतितंडुलाः ॥ ७२ ॥
अल्पानामपिवस्तूनां संहतिःकार्यसाधिका ॥
तृणैर्गुणत्वमापन्नै र्बध्यंतेमत्तदंतिनः ॥ ७३ ॥

---

१ करेणग्रहणंधारणं. पक्षे करग्रहःपाणिग्रहः २ सूत्रनिर्मिता, पक्षेपातिव्रत्यदाक्षिण्यादिगुणयुक्ता. ३ स्कंधः ४ घडशीतिलोके. ५ संग्रामे. ६ संमानरहितः पक्षे प्रमाणरहितः अमेयइत्यर्थः ७ स्वकीयकार्यसाधनेदक्षः पक्षे स्वेषांभक्तानांकार्यकरणेसमर्थः ८ कोंकणदेशवास्तव्यः पक्षे विष्णुर्हिजलधिशायीतिप्रसिद्धिः ९ श्रुतयोवेदाःसंख्या ४ चत्वारःएकं १ अंकानांवामतोगत्या १४ चतुर्दशगोत्रवान्. पक्षे वेदैतिकदृष्टंगोत्रंनामयस्यसः १० प्रियःभक्तःओदनः पक्षे भक्ताःयस्य, ११ चित्तंपावयतीतिचित्तशुद्धिकारकः पक्षेचित्तपावनजातीयः १२ सतांतारकंरक्षकं, पक्षे सतीतारकाकनीनिकायस्मिन्. १३ अनाद्यनंतं, पक्षे नकारःआदौअंतेचयस्य, १४ यस्यभगवतःअंतःस्थितिः सर्वांतर्यामित्वात्, पक्षे यस्ययकारस्यअंतर्मध्येस्थितिः एतैर्गुणैःरमापतेर्विष्णोःसख्यंसौहृदंभवेत्. १५ संघातः १६ धान्यत्वक्. १७ रज्जुत्वं.

कृतार्थःस्वामिनंद्वेष्टि कृतदारस्तुमातरं ॥
जाताऽपत्यापतिंद्वेष्टि गतरोगश्चिकित्सकं ॥ ७४ ॥
नागोभातिमदेनकंजलरुहैःपूर्णेंदुनाशर्वरी
शीलेनप्रमदाजवेनतुरगोनित्योत्सवैर्मंदिरं ॥
वाणीव्याकरणेनहंसमिथुनैर्नद्यःसभापंडितैः
सत्पुत्रेणकुलंनृपेणवसुधालोकत्रयंविष्णुना ॥ ७५ ॥
विस्मयःसर्वथाहेयः प्रत्यूहःसर्वकर्मणां ॥
तस्माद्विस्मयमुत्सृज्य साध्यसिद्धिर्विधीयतां ॥ ७६ ॥
षट्कर्णोभिद्यतेमंत्र श्चतुष्कर्णःस्थिरोभवेत ॥
द्विकर्णस्यचमंत्रस्य ब्रह्माऽप्यंतंनगच्छति ॥ ७७ ॥
भूमिपतावर्थपतौ बालेवृद्धेतपोनिधौविदुषि ॥
गोष्ठितिमूर्खेगुरुषुच विदुषानैवोत्तरंदेय ॥ ७८ ॥
सद्भावेनजयेन्मित्र सद्भावेनचबांधवान ॥
स्त्रीभृत्यान्दानमानाभ्यां दाक्षिण्येनेतरंजनं ॥ ७९ ॥
यशःपुण्यंकलत्राणि पुत्रोत्पत्तिर्निधिस्तथा ॥
सुकृतादेवलभ्यंते नचपार्थपराक्रमात ॥ ८० ॥
राज्ञिधर्मिणिधर्मिष्ठाः पापेपापाःसमेसमाः ॥
लोकास्तमनुवर्तंते यथाराजातथाप्रजा ॥ ८१ ॥
क्षांतितुल्यंतपोनाऽस्ति नतोषात्परमंसुखं ॥
नाऽस्तितृष्णापरोव्याधि र्नचधर्मोदयापरः ॥ ८२ ॥
यत्राऽस्तिलक्ष्मीर्विनयोनतत्र अभ्यागतोयत्रनतत्रलक्ष्मीः ॥
उभौचतौयत्रनतत्रविद्या नैकत्रसर्वोगुणसन्निपातः ॥ ८३ ॥
वैद्यावदंतिकफपित्तमरुद्विकारान ज्योतिर्विदोग्रहगतिंपरिवर्तयंति॥
भूताऽभिषंगइतिभूतविदोवदंति प्राचीनकर्मबलवन्मुनयोवदंति ॥ ८४॥
द्वारिप्रविष्टःसहसाततःकिं दृष्टःप्रभुःस्मेरमुखस्ततःकिं ॥
कथाश्रुताश्रोत्ररमाततःकिं व्यथानशांतायदिजाठरीया॥८५॥

---

१ कृतादाराःस्त्रीयेनसः २ वैद्य. ३ उदक. ४ वेगेन. ५ त्याज्यः ६ विघ्नरूपः ७ भेदंप्राप्नोति सर्वेषांज्ञानविषयोभवतीतिभावः ८ विचारः (मसलतइतिलोके) ९ पार्ह. १० स्त्रियः ११ ठेवाइतिलोके. १२ क्षमा. १३ गुणसमुदायः १४ भूतबाधा.

समैतानिनपूर्यंते पूर्यमाणान्यनेकशः ॥
ब्राह्मणोऽग्निर्यमोराजा पयोधिरुदरंगृहं ॥ ८६ ॥
संतोषस्त्रिषुकर्तव्यः स्वदारेभोजनेधने ॥
त्रिषुचैवनकर्तव्यो दानेतपसिपाठने ॥ ८७ ॥
मृगामृगैःसंगमनुव्रजंति गावश्चगोभिस्तुरगास्तुरंगैः ॥
मूर्खाश्चमूर्खैःसुधियःसुधीभिः समानशीलव्यसनेषुसख्यं ॥८८॥

यःकुंतपाणिरिहभूपइतिप्रसिद्धो
भूखंडमात्रविभवःपरसेवकश्च ॥
तस्याऽऽत्मजःसततमिच्छतिराजशब्दं
व्रीडेजगज्जननिहंतनिराश्रयाऽसि ॥ ८९ ॥

एकःपंचत्वमासाद्य जायतेपुनरष्टधा ॥
अहोवाणिज्यसंपत्तिः काशीपुरनिवासिनां ॥ ९० ॥
सुपर्णपरिसेवितस्तदनुसाधुपूगाऽन्वितो
द्विजाऽवनमहापटुस्तदनुसारसंधानभाक् ॥
सदैवसुधयाऽशनंभवतियस्यविष्णोःसम
स्तमाखुरितिसेव्यतांभवतिवैयतोरागता ॥ ९१ ॥
सुकुलजन्मविभूतिरनेकधा प्रियसमागमसौख्यपरंपरा ॥
नृपकुलेगुरुताविमलंयशो भवतिपुण्यतरोःफलमीदृशं ॥९२॥
एहिस्वागतमाविशाऽऽसनमिदंकस्माच्चिराद्दृश्यसे
कावार्तापिरिदुर्बलोऽसिनितरांप्रीतोऽस्मितद्दर्शनात् ॥
इत्येवंसमुपागतंद्विजवरंसंभावयंत्यादरा
त्तेषांयुक्तमशंकितेनमनसागेहंप्रगंतुंसदा ॥ ९३ ॥

---

१ भालाइतिलोके. २ संध्यामरणाच. ३ अष्टमूर्तिःशिवइतिभावः ४ सुपर्णेनगरुडेनसेवितः पक्षे सुष्ठुपर्णेननागवल्लीदलेनसहपरिसेवितः ५ साधुनापूगैःसंघैरन्वितः पक्षेसाधुःसम्यक्पूगःक्रमुकस्तेनान्वितः ६ द्विजाःद्विजन्मानोब्राह्मणादयस्तेषामवनम्रक्षणंतस्मिन्नमहासमर्थः पक्षे द्विजाःदंताः ७ सारंश्रेष्ठवस्तुमोक्षादिनस्यसंधानंसंविभजतीति. पक्षे सारःखदिरसारस्तेनसंधानसम्यक्मेलनभजतीति. ८ सुधयाअमृतेनयस्यभोजनंभवति. पक्षे सुधया चूर्णेन (चुनाइतिभाषायां) संधवस्यभक्षणंभवति. ९ यतोविष्णोःअतलिलाविषयेअप्रीतिजायते. पक्षेयतःतमाखोःतमाखुपत्रात् रागितामुखरक्तिमाजायते. १० ऐश्वर्यं. ११ गौरवं (वजनदारीतिलोके.) १२ कृशः

प्राप्यचाऽप्युत्तमंजन्म लब्ध्वाचेंद्रियसौष्ठवं॥
नवेत्त्यात्महितंयस्तु सभवेदात्मघातकः ॥ ९४ ॥
कल्पांतवातसंक्षोभ लंघिताऽशेषभूभृतः ॥
स्थैर्यप्रसादमर्यादा स्ताएवहिमहोदधेः ॥ ९५ ॥
पादसंवाहनेवंश्रो केशसंवाहनेफणी ॥
अहोभाग्यंपुरध्रीणां दधिसंमथनेरविः ॥ ९६ ॥
बोधितोऽपिबहुसूक्तिविस्तरैः किंखलोजगतिसज्जनोभवेत् ॥
स्नापितोऽपिबहुशोनदीजलै गर्दभःकिमुहयोभवेत्क्वचित् ॥ ९७ ॥
संपत्सरस्वतीसत्यं संतानंसदनुग्रहः ॥
सत्तासुकृतसंभारः सकाराःसप्तदुर्लभाः ॥ ९८ ॥
कृतेचरेणुकाकृत्या त्रेतायांजानकीतथा ॥
द्वापरेद्रौपदीकृत्या कलौकृत्यागृहेगृहे ॥ ९९ ॥
विद्वान्मंसर्सादपांक्षिकःपरवशोमानीदरिद्रोगृही
वित्ताढ्यःकृपणःसुखीपरवशोवृद्धोनतीर्थाऽऽश्रितः ॥
राजादुःसचिवप्रियःकुलभवोमूर्खःपुमान्स्त्रीजितो
वेदांतीरहितक्रियःकिमपरंहास्याऽऽस्पदंभूतले ॥ १०० ॥
मांसंमृगाणांदशनागजानां मृगंद्विषांचर्मफलंद्रुमाणां ॥
स्त्रीणांस्वरूपंचनृणांहिरण्य मेतेगुणावैरकराभवंति ॥ १०१ ॥
आदरेणयथास्तौति धनवंतंधनेच्छया ॥
तथाचेद्विश्वकर्तारं कोनमुच्येतबंधनात् ॥ २ ॥
यस्यचाऽप्रियमन्विच्छे त्कुर्यात्तस्यसदाप्रियं ॥
व्याधोमृगवधंकर्तुं सम्यग्गायतिसुस्वरं ॥ ३ ॥
नपुत्रात्परमोलाभो नभार्यायाःपरंसुखं ॥
नधर्मात्परमंमित्रं नाऽनृतात्पातकंपरं ॥ ४ ॥
अर्थनाशंमनस्तापं गृहेदुश्चरितानिच ॥

---

१ इंद्रियपाटवं. २ पादस्थमलनिर्हरणार्थंकृतोभर्जितइष्टकाखंडोवज्जीतिलोकेकथ्यते. पक्षे इंद्रः ३ दूतपत्रिका. पक्षे शेषः ४ मथाः पक्षे सूर्यः ५ सभार्या. ६ पक्षधारी. ७ गृहस्थाश्रमी. ८ स्त्रैण. ९ हास्यस्थान १० दंताः ११ सिंहव्याघ्रादीनां. १२ पारधीतिलोके.

वचनंचापमानंच मतिमान्नप्रकाशयेत् ॥ ५ ॥
ऐश्वर्यस्यविभूषणंसुजनताशौर्यस्यवाक्संयमो
ज्ञानस्योपशमःकुलस्यविनयोवित्तस्यपात्रेव्ययः ॥
अक्रोधस्तपसःक्षमाप्रभवितुर्धर्मस्यनिर्व्याजता
सर्वेषामपिसर्वकारणमिदंशीलंपरंभूषणं ॥ ६॥
अभ्रच्छायाखलप्रीति र्नवसस्यानियोषितः ॥
किंचित्कालोपभोग्यानि यौवनानिधनानिच ॥ ७ ॥
परोऽपिहितवान्बंधु र्बंधुरप्यहितःपरः ॥
अहितोदेहजोव्याधि र्हितमारण्यमौषधं ॥ ८ ॥
जलबिंदुनिपातेन क्रमशःपूर्यतेघटः ॥
सहेतुःसर्वविद्यानां धर्मस्यचधनस्यच ॥ ९ ॥
सुपात्रदानाच्चभवेद्धनाऽऽढ्यो धनप्रभावेणकरोतिपुण्यं ॥
पुण्यप्रभावात्सुरलोकवासी पुनर्धनाऽऽढ्यःपुनरेवभोगी ॥ ११० ॥
कुपात्रदानाच्चभवेद्दरिद्रो दारिद्र्यदोषेणकरोतिपापं ॥
पापप्रभावान्नरकंप्रयाति पुनर्दरिद्रःपुनरेवपापी ॥ ११ ॥
प्रभुर्विवेकीधनवांश्चदाता विद्वान्विरागीप्रमदासुशीला ॥
तुरंगमःशस्त्रनिपातधीरो भूमंडलस्याऽऽभरणानिपंच ॥ १२ ॥
प्राप्यचलानधिकारान् शत्रुषुमित्रेषुबंधुवर्गेषु ॥
नाऽपकृतंनोपकृतं नसत्कृतंकिंकृतंतेन ॥ १३ ॥
सत्यभामासमाश्लिष्टः साधुवृंदावनेरतः ॥
यशोदयासमायुक्त स्त्वांपायात्वादृशोहरिः ॥ ११४ ॥
वित्तंपरिमितमधिक व्ययशीलंपुरुषमाकुलीकुरुते ॥
ऊनांऽशुकमिवपीन स्तनजघनायाःकुलीनायाः ॥ ११५ ॥
सौवर्णानिसरोजानि निर्मातुंसंतिशिल्पिनः ॥
तत्रसौरभनिर्माणे चतुरश्चतुराननः ॥ १६ ॥

---

१ सौजन्यं. २ मौनं. ३ अदंभत्वं. ४ सत्यभामयाआलिंगितः पक्षे सत्यं, भाकांतिः, भालक्ष्मीः एतैर्युक्तः ५ साधुपदवृंदावनंतस्मिन्रतः पक्षे साधूनांवृंदसमूहस्तस्यअवनंरक्षणंतस्मिन्आसक्तः ६ यशोदयानंदपत्न्यायुक्तः पक्षे यशःकीर्तिः दयाकारुण्यं ताभ्यांयुक्तः ७ अल्पवस्त्रं.

सर्वोद्वेगकरंमृगादनममुंसंत्यज्यहाधिक्त्वया
लोकस्याऽनपकारिणंगिरिनदीनीराऽटवीनिर्वृत ॥
अश्नंतंतृणमेणशावमदयंव्याधघ्नताऽमुंवृथा
देवोदुर्बलघातकोऽर्यामतिसागाथायथार्थीकृता ॥ १७ ॥
स्वदेशजातस्यनरस्यनूनं गुणाऽधिकस्याऽपिभवेदवज्ञा ॥
निजांऽगनायद्यपिरूपराशि स्तथाऽपिलोकःपरदारसक्तः॥१८॥
घृतंनश्रूयतेकर्णे दधिस्वप्नेऽपिदुर्लभ ॥
मुग्धेदुग्धस्यकावार्ता तक्रंशक्रस्यदुर्लभं ॥ १९ ॥
कोनयातिवशंलोके मुखेपिंडेनपूरितः ॥
मृदंगोमुखलेपेन करोतिमधुरध्वनिं ॥ २० ॥
ब्रह्मन्नध्ययनस्यनैषसमयस्तूष्णींबहिःस्थीयतां
स्वल्पंजल्पबृहस्पतेजडमतेनैषासभावज्रिणः ॥
वीणांसंहरनारदस्तुतिकथाऽऽलापैरलंतुंबुरो
सीतारल्लकभल्लभग्नहृदयःस्वस्थोनलंकेश्वरः ॥ २१ ॥
येषांश्रीमद्यशोदासुतपदकमलेनाऽस्तिभक्तिर्नराणां
येषामाभीरकन्याप्रियगुणकथनेनाऽनुरक्तारसज्ञा ॥
येषांश्रीकृष्णलीलाललितगुणरसेसादरौनैवकर्णौ
धिक्तान्धिक्तान्धिगेतानकथयतिसततंकीर्तनस्थोमृदंगः॥२२
नकश्चिदपिजानाति किंकस्यश्वोभविष्यति ॥
अतःश्वःकरणीयानि कुर्यादद्यैवबुद्धिमान् ॥ २३ ॥
किंचित्रंयदिराजनीतिकुशलोराजाभवेद्धार्मिकः
किंचित्रंयदिवेदशास्त्रनिपुणोविप्रोभवेत्पंडितः ॥
तच्चित्रंयदिरूपयौवनवतीसाध्वीभवेत्कामिनी
तच्चित्रंयदिनिर्धनोऽपिपुरुषःपापंनकुर्यात्क्वचित् ॥ २४ ॥
पितारत्नाऽऽकरोयस्य लक्ष्मीर्यस्यसहोदरा ॥
शंखोरोदितिभिक्षार्थी नादत्तमुपतिष्ठति ॥ २५ ॥
लुब्धानांयाचकःशत्रु श्चोराणांचंद्रमारिपुः ॥

---

१ अवमानः २ उपसंहारंकुरु. ३ सीतायारल्लक. सीमंतः (भांग इतिप्रसिद्धः) सएवभल्लस्तेनभग्नंहृदयंयस्य. ४ गोपकुमारिका ५ जिव्हा

जारस्त्रीणांपतिःशत्रु मूर्खाणांबोधकोरिपुः ॥ २६ ॥
सौमित्रिर्वदतिविभीषणायलंकां देहित्वंभुवनपतेविनैवकोशं ॥
एतस्मिन्रघुपतिराह्ववाक्यमेत द्विक्रीतेकरिणिकिमंकुशेविवादः॥२७॥
यथाचतुर्भिःकनकंपरीक्ष्यते निघर्षणच्छेदनतापताडनैः ॥
तथाचतुर्भिःपुरुषःपरीक्ष्यते श्रुतेनशीलेनकुलेनकर्मणा ॥ २८ ॥
अमंत्रमक्षरंनाऽस्ति नाऽस्तिमूलमनौषधं ॥
अयोग्यःपुरुषोनाऽस्ति योजकस्तत्रदुर्लभः ॥ २९ ॥
परोपदेशवेलायां शिष्टाःसर्वेभवंतिवै ॥
विस्मरंतीहशिष्टत्वं स्वकार्येसमुपस्थिते ॥ ३० ॥
अविवेकिनिभूपाले नश्यंतिगुणिनांगुणाः ॥
हावभावाःपुरंध्रीणां भर्तरीवनपुंसके ॥ ३१ ॥
निस्सारस्यपदार्थस्य प्रायेणाऽऽडंबरोमहान ॥
नसुवर्णेध्वनिस्तादृ ग्यादृक्कांस्येप्रजायते ॥ ३२ ॥
भोभाद्रपक्षसकलद्विजकल्पवृक्ष
काऽस्मान्विहायगतवानसिदेहिवाचं ॥
डिंडीरपिंडपरिपांडुरवर्णभाजां
लाभःकथंत्वयिगतेघृतपायमानां ॥ ३३ ॥
गुणिनांनिर्गुणानांच दृश्यतेमहदंतरं ॥
हारःकंठगतःस्त्रीणां नूपुराणिचपादयोः ॥ ३४ ॥
आकर्ण्यभूपालयशस्त्वदीयं विधूनयंनीहनकेशिरांसि ॥
विश्वंभराभंगभयेनधात्रा नाऽकारिकर्णोभुजंगेश्वरस्य ॥३५॥
अगाधत्वदयाभूपाः कूपाइवदुरासदाः ॥
घटकागुणिनोनोचे त्कथंलभ्येतजीवनं ॥ ३६ ॥
अलभ्यंलब्धुकामस्य जनस्यगतिरीदृशी ॥
अलभ्येषुमनस्तापः संचिताऽर्थोविनश्यति ॥ ३७ ॥

---

१ लक्ष्मणः २ भांडारगृहं. ३ मुक्ताहारः ४ पैंजणइतिलोके ५ कंपयंति, ६ पृथ्वी. ७ शेषस्य. ८ कार्यसाधकाः पक्षे कुभाः ९ गुणवंतः पक्षे रज्जुयुक्ताः १० जीवनोपायभूतंद्रव्यं, पक्षे उदकं.

शत्रुवाक्याऽमृतंश्रुत्वा तेनसौहार्दमार्जवं ॥
नहिधीरेणकर्तव्य मात्मनःशुभमिच्छता ॥ ३८ ॥
अरण्यंसारंगैर्गिरिकुहरगर्भाश्वहरिभि
र्दिशोदिङ्मातंगैः सलिलमुषितंपंकजवनैः ॥
प्रियाचक्षुर्मध्यस्तनवदनसौंदर्यविजितैः
सतांमानेम्लानेमरणमथवादूरगमनं ॥ ३९ ॥
स्त्रीणांहिसाहचर्यां द्भवंतिचेतांसिभर्तृसदृशानि ॥
मधुरापिहिमूर्छयते विषविटपिसमाश्रितावल्ली ॥ ४० ॥
कलारत्नंगीतंगगनतलरत्नंदिनमणिः
सभारत्नंविद्वान्श्रवणपटुरत्नंहरिकथा ॥
निशारत्नंचंद्रःशयनतलरत्नंशशिमुखी
महीरत्नंश्रीमान्जयतिरघुनाथोनृपवरः ॥ ४१ ॥
तीर्थानामवलोकनंपरिचयःसर्वेषुवित्ताऽर्जनं
नानाऽऽश्चर्यनिरीक्षणंचतुरताबुध्येःप्रशस्तागिरः ॥
एतेसंतिगुणाःप्रवासविषयेदोषोऽस्तिचैकोमहान्
यन्मुग्धामधुराधराधरसुधापानंविनास्छीयते ॥ ४२ ॥
अध्वाजरामनुष्याणा मनध्वावाजिनांजरा ॥
अमैथुनंजरास्त्रीणां वस्त्राणामातपोजरा ॥ ४३ ॥
वाजीचारुगतिःशशांकधवलंछत्रंप्रियापृष्ठतः
प्रोत्तुंगस्तनमंडलाचपुरतोभृत्याःपुनःपंचषट् ॥
तांबूलंमधुरंसखाचचतुरःसंपद्यतेचेत्पथि
प्राहुस्तत्कटकप्रयाणमितरत्प्राणप्रयाणंबुधाः ॥ ४४ ॥
विप्रेभ्यःसाधुदानंरिपुजनसुहृदांचोपकारान्कुरुत्वं
सौजन्यंबंधुवर्गेनिजहितमुचितंस्वामिकार्यंयथार्थं ॥
श्रोत्रेतेतथ्यमेतत्कथयतिसततंलेखनीभाग्यशालि
न्नोचेन्नष्टेऽधिकारेममसुखसदृशंतावकाऽऽस्यंभवेद्धि ॥४५॥
व्यालाश्रितोऽपिविफलोऽपिसकंटकोऽपि

---

१ मृगैः २ सिंहैः ३ दिग्गजैः ४ विषवृक्षाश्रिता ५ लता. ६ बोहवार्थिकी.
७ अधरोष्ठः

वक्रोऽपिपंकजनितोऽपिदुरासदोऽपि ॥
गंधेनबंधुरसिकेतकपुष्पजेन
ह्येकोगुणःखलुनिहंतिसमस्तदोषान् ॥ ४६ ॥
विश्वामित्रपराशरप्रभृतयोवाताऽम्बुपर्णाऽशना
स्तेऽपिस्त्रीमुखपंकजंसुललितंदृष्ट्वैवमोहंगताः ॥
शाल्यन्नंसघृतंपयोदधियुतंभुंजंतियेमानवा
स्तेषामिंद्रियनिग्रहोयदिभवेद्विंध्यस्तरेत्सागरे ॥ ४७ ॥
धूलिधूसरसर्वांगो विकसद्दंतकेसरः ॥
आस्तेकस्याऽपिधन्यस्य द्वारिदंतीगृहेऽर्भकः ॥ ४८ ॥
अकूर्चारंभोऽपिप्रतिचिबुकदेशंकरतलं
मतिच्छायांकुर्वन्युवतिषुदृशंस्निग्धतरलां ॥
कुमारोहुंकारात्परिषदिसमानानगणय
न्भुजौवक्षःपश्यन्नववयमिकांतिवितनुते ॥ ४९ ॥
कीटोऽयंभ्रमरीभवेदविरतध्यानात्तथाचेदहं
रामःस्यांत्रिजटेहताऽस्मिपुरतोदांपत्यसौख्यच्युता ॥
एवंचेत्कृतकृत्यतैवभविताराभस्तवध्यानतः
सीतात्वंचनिहत्यरावणरिपुंगताऽसिरामांऽतिकं ॥ ५० ॥
राजंस्त्वत्कीर्तिचंद्रेण तिथयःपूर्णिमाःकृताः ॥
मद्देहान्नबहिर्याति तिथिरेकादशीभयात् ॥ ५१ ॥
धर्मप्रसंगादपिनाऽऽचरंति पापंप्रयत्नेनसमाचरंति ॥
आश्चर्यमेतद्धिमनुष्यलोके ऽमृतंपरित्यज्यविषंपिबंति ॥५२॥
मित्रंस्वच्छतयारिपुंनयबलैर्लुब्धंधनैरीश्वरं
कार्येणद्विजमादरेणयुवतिंप्रेम्णाशमैर्बांधवान ॥
अत्युग्रंस्तुतिभिर्गुरुंप्रणतिभिर्मूर्खंकथाभिर्बुधं
विद्याभीरसिकंरसेनसकलंशीलेनकुर्याद्वशं ॥ ५३ ॥
अर्थालाघवमुच्छ्रितोनिपतनकामाऽऽतुरोलांछन
निःस्वोवंचनमुन्मनाविकलतांदोषाऽऽकुलःसंशयं ॥

---

१ दुष्प्रापः २ भविष्यतेकूर्चोमांश्मश्रूणामारंभोयस्य ३ चंचलां ४ संततं. ५ नीतिशक्तिभिः ६ कलंक. ७ निर्धनः ८ अस्वस्थांतःकरणः

लुब्धोऽकीर्तिमसंगरःपरिभवंदुष्टोऽन्यदीयैरतिं
र्दुर्वांगमियतांदुरोदरवशःप्राप्नोतिकष्टंमुहुः ॥ ५४ ॥
प्रीतिर्भूमिभुजांनतिर्गुणवतांह्रीरंगनानांरति
र्दंपत्योःशिशवोगृहस्यकविताबुद्धेःप्रसादोगिरां ॥
लावण्यंवपुषःश्रुतंसुमनसःशांतिर्द्विजस्यक्षमा
शक्तस्यद्रविणंगृहाऽऽश्रमवतांशीलंसतांमंडनं ॥ ५५ ॥
कार्पण्येनयशःक्रुधागुणचयोदंभेनसत्यंक्षुधा
मर्यादाव्यसनैर्धनंचविपदास्थैर्यंप्रमादैर्द्विजः ॥
पैशुन्येनकुलंमदेनविनयोदुश्चेष्टयापौरुषं
दारिद्र्येणजनाऽऽदरोममतयाचात्मप्रकाशोहतः ॥५६॥
स्त्रीणांयौवनमर्थिनामनुगमोगाज्ञांप्रतापःसतां
स्वास्थ्यंस्वल्पधनस्यसंहतिरसद्वृत्तेश्चवाग्डंबरः ॥
स्वाऽऽचारस्यसदर्चनंपरिणतेर्विद्याकुलस्यैकता
प्रज्ञायाधनमुन्नतेर्नतिरतिःशांतेर्विवेकोबलं ॥ ५७ ॥
अप्रेतिबुद्धेश्रोतरि वक्तुर्वाक्यंप्रयातिवैफल्यं ॥
नयनविहीनेभर्तरि लावण्यमिवेहखंजनाक्षीणां ॥ ५८ ॥
गुणैर्भूक्रियतांयत्नः किमाटोपैःप्रयोजनं ॥
विक्रीयंतेनघंटाभि र्गावःक्षीरविवर्जिताः ॥ ५९ ॥
गुणैरुत्तुंगतांयाति नोच्चैरासनमास्थितः ॥
प्रासादशिखराऽऽरूढ. काकःकिंगरुडायते ॥ ६० ॥
काकःपद्मवनेरतिनकुरुतेहंसोनकूपोदके
मूर्खःपंडितसंगमेनरमतेदासोनसिंहासने ॥
कस्त्रीसज्जनसंगमेनरमतेनीचंजनंसेवते
यायस्यप्रकृतिःस्वभावजनिताकेनाऽपिनत्यज्यते ॥६१॥
काकःपक्षबलेनभूपतिगृहेप्रासंयदिप्राप्तवान्
किंवातस्यमहत्त्वमस्यलघुतापंचोऽननस्याऽऽगता ॥

---

१ अदृश्ययुद्धप्रसंगः २ दुर्वचनशीलः ३ द्यूतवशः ४ लज्जा ५ प्रसन्नता ६ कोपेन ७ गुणसमुदायः ८ मूर्ख ९ खंजरीटनयनानां. १० आडंबरैः ११ सिंहस्य.

येनाऽऽक्रम्यकरींद्रगंडयुगलंनिर्भिद्यहेलालवा
ल्लब्ध्वापासवरंवराटकधियामुक्तागणस्त्यज्यते ॥ ६२ ॥
शूरश्चकृतविद्यश्च रूपवत्यश्चयोषितः ॥
यत्रयत्रगमिष्यति तत्रतत्रकृताऽऽदराः ॥ ६३ ॥
वैष्णवाश्चपिशाचाश्च मत्कुणाश्चपिपीलिकाः ॥
भस्मदर्शनमात्रेण पलायंतेदिशोदश ॥ ७१ ॥
काचंमणिकांचनमेकसूत्रे मुग्धानिबध्नंतिकिमत्रचित्रं ॥
विचारवान्पाणिनिरेकसूत्रे श्वानंयुवानंमघवानमाह ॥ ६४ ॥
अशनंमेवसनंमे जायामेबंधुवर्गोमे ॥
इतिमेमेकुर्वाणं कालवृकोहंतिपुरुषाऽजं ॥ ६५ ॥
अगस्तितुल्याश्चघृताऽब्धिशोषणे दंभोलितुल्यावटकाऽद्रिभेदने ॥
शाकाऽवलीकाननवन्हिरूपा स्तएवभद्राइतरेभदाश्च ॥ ६६ ॥
चत्वारोधनदायादा धर्माऽग्निनृपतस्कराः ॥
तेषांज्येष्ठाऽवमानेन त्रयःकुप्यंतिबांधवाः ॥ ६७ ॥
धन्यागोकुलकन्या वयमिहमन्यामहेजगति ॥
यासांनयनसरोजे ष्वंजनभूतोनिरंजनःसाक्षात ॥ ६८ ॥
नरकोपस्थितिनाम नान्यांमन्यामहेवयं ॥
यद्देशादश्यनेऽमुष्मिन नरकोपस्थरोस्थितिः ॥ ६९ ॥
परदाररतिःकलाऽभिसंधि र्बहुदंभोभिगकामनाममत्वं ॥
परितंमुहुरस्मदीयमेत दपवर्गस्यकथनुभाजनंस्मः ॥ ७० ॥
वरंबाल्येमृत्युर्नपुनरधनंयोवनमिदं
वरंभार्यावेश्यानपुनरविनीताकुलवधूः ॥
वरंदेशत्यागोनपुनरविवेकिममभूपुरं
वरंदेहत्यागोनपुनरधमाऽगारेमटनं ॥ ७१ ॥
कविमतिरिवबहुलोहा सुघटितचक्राप्रभातवेलेव ॥

१ कपर्दकतुल्या. २ श्वयुवमघोनामतद्धितेइतिसूत्रे. ३ अरण्यं. ४ योत्धारः ५ नरकप्राप्तिं. ६ कलाकांक्षा. ७ विषयेच्छा. ८ ममता. ९ मोक्षस्य. १० दुश्चरिता. ११ प्रतीतिविशेषः १२ बहुलोहअयःयस्यां पक्षे बहुलाःऊहास्तर्कायस्यां. १३ सुघटितानिचक्राणियस्यां पक्षे. सुघटिताश्चक्राश्चकवाकपक्षिमिथुनानियया.

हरमूर्तिरिवहसंती भातिविधूमाऽनलोपेता ॥ ७२ ॥
गंधःसुवर्णेफलमिक्षुदंडे नाऽकारिपुष्पंखलुचंदनेषु ॥
विद्वान्धनाऽऽढ्योनतुदीर्घजीवी धातुःपुराकोऽपिनबुद्धिदोऽभूत् ॥७३॥
निजगुणगरिमासुखाकरःस्या
त्स्वयमनुवर्णयतांसतांनतावत् ॥
निजकरकमलेनकामिनीनां
कुचकलशाऽऽकलनेनकोविनोदः ॥ ७४ ॥
परैःप्रोक्तागुणायस्य निर्गुणोऽपिगुणीभवेत् ॥
इंद्रोऽपिलघुतांयाति स्वयंप्रख्यापितैर्गुणैः ॥ ७५ ॥
क्षोणीशाऽऽश्रयिणांपरोपकरणाऽभावादवाऽऽप्तश्रियां
कार्पण्यात्सुधियामनध्ययनतायूनांप्रवासाऽऽश्रयात् ॥
भ्रातृणांजगदीशभक्तिविरहादायुर्वृथागच्छती
त्येवंकांस्यसमुद्भवःप्रतिदिनंनादोवदत्युच्चकैः ॥ ७६ ॥
स्याद्त्यंतनिरक्षरःक्षितिपतिःश्रीकारमात्राऽऽश्रया
न्मत्रीतत्कथिताऽर्थलेखनपरस्तत्सेवकोजायते ॥
अध्येतातदगारमेवभजतेविद्वांस्तुतंयाचते
यावान्यस्यगिरासमंपरिचयस्तावान्विदूरेश्रियः ॥ ७७ ॥
गुरुरेकःकविरेकः सद्मिमधीनःकलाधरोऽप्येकः ॥
अद्भुतमत्रसभायां गुरवःकवयःकलाधराःसर्वे ॥ ७८ ॥
कमलेकमलाशेते हरःशेतेहिमालये ॥
क्षीराऽब्धौचहरिःशेते मन्येमत्कुणशंकया ॥ ७९ ॥
सेदवनमसदनुशासन माश्रितभरणंचराजचिन्हानि ॥
अभिषेकःपटबंधो बालव्यजनंव्रणस्याऽपि ॥ ८० ॥
गुणवतस्तवहारनयुज्यते परकलत्रकुचेषुविलुंठनं ॥
स्पृशतिशीतकरोजघनस्थली मुचितमस्तितदेवकलंकिनः ॥ ८१ ॥

---

१ शेषशेतिलोके. २ विगतोधूमोयस्मात्सचासौअनलश्चतेनउपेतायुक्ता. पक्षेविधुश्चंद्रः उमागौरी अनलःअग्निस्तैरुपेता शिवमूर्तिरिवभातीत्यर्थः ३ बुद्धिदाता. ४ राजाश्रयवतां. ५ धनिनां. ६ अत्यंतदूरे. ७ इंद्रस्य ८ चंद्रः ९ सतांअवनंरक्षणं. १० दुष्टशासनं. ११ सूत्रवतः पक्षेगुणयुक्तस्य. १२ चंद्रः १३ कलंकयुक्तस्य.

अतिपरिचयादवज्ञा संततगमनादनादरोभवति ॥
मलयेभिल्लपुरंध्री चंदनतरुकाष्टमिंधनंकुरुते ॥ ८२ ॥
पौलस्त्य:कथमन्यदारहरणेदोषंनविज्ञातवा
नैक्षैश्चाऽपियुधिष्ठिरेणरमताज्ञातोनदोषोनुकिं ॥
रामेणाऽपिवनेचहेमहरिणस्याऽसंभवोलक्षित:
प्रत्यासन्नविपत्तिमूढमनसांप्रायोमति:क्षीयते ॥ ८३ ॥
कोलाभोगुणिसंगम:किमसुखंप्राज्ञेतरै:संगति:
काहानि:समयच्युतिर्निपुणताकाधर्मतत्त्वेरति: ॥
क:शूरोविजितेंद्रिय:प्रियतमाकाऽनुव्रताकिंधनं
विद्याकिंसुखमप्रवासगमनंराज्यंकिमाज्ञाफलं ॥ ८४ ॥
अर्केत्वंगमतस्तक्रं नशंतक्रतुनाहुतं ॥
नाऽदत्तमितिवाक्यार्था त्तक्रंशक्रस्यदुर्लभं ॥ ८५ ॥
वरंमौनंकार्यंनचवचनमुक्तंयदनृतं
वरंक्लैब्यंपुंसांनचपरकलत्राऽभिगमनं ॥
वरंप्राणत्यागोनचपिशुनवाक्येष्वभिरुचि
वरंभिक्षाऽऽशित्वंनचपरधनाऽऽस्वादनसुखं ॥ ८६ ॥
वरंशून्याशालानचखलुवरोदुष्टवृषभो
वरंवेश्यापत्नीनपुनरविनीताकुलवधू:॥
वरंवासोऽरण्येनपुनरविवेकाऽधिपपुरे
वरंप्राणत्यागोनपुनरधमानामुपगम: ॥ ८७ ॥
असेवितेश्वरद्वार मदृष्टविरहव्यथं॥
अनुक्तक्लीबवचनं धन्यंकस्याऽपिजीवितं ॥ ८८ ॥
आसन्नमेवनृपतिर्भजतेमनुष्यं
विद्याविहीनमकुलीनमसंगतंवा ॥
प्रायेणभूमिपतय:प्रमदालताश्च
य:पार्श्वतोवसतितंपरिवेष्टयंति ॥ ८९ ॥

---

१ मलयपर्वते. २ भिल्लस्त्री ३ रावण. ४ पार्थै: ५ मूर्खै: ६ अपमार्ग. ७ इंद्रेण. ८ नपुंसकत्वं. ९ अयंश्लोक:पाठभेदात्पुनर्लिखित:

अश्वःशस्त्रंशास्त्रं वीणावाणीनरश्चनारीच ॥
पुरुषविशेषंप्राप्ता भवंतियोग्याअयोग्याश्च ॥ ९० ॥
कनककभूषणसंग्रहणोचितो यदिमणिस्त्रपुणिप्रणिधीयते ॥
नसविरौतिनचाऽपिहिशोभते भवतियोजयितुर्वचनीयता ॥ ९१ ॥
दौर्मंत्र्यान्नृपतिर्विनश्यतियतिः संगात्सुतोलालना
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलंखलोपासनात् ॥
न्हीर्मद्यादनवेक्षणादपिकृषिःस्नेहःप्रवासाश्रया
न्मैत्रीचाऽप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनं ॥ ९२ ॥
लोभश्चेदगुणेनकिंपिशुनतायद्यस्तिकिंपातकैः
सत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिं ॥
सौजन्यंयदिकिंजनैःसुमहिमायद्यस्तिकिंमंडनैः
सद्विद्यायदिकिंधनैरपयशोयद्यस्तिकिंमृत्युना ॥ ९३ ॥
शशीदिवसधूसरोगलितयौवनाकामिनी
सरोविगतवारिजंमुखमनक्षरंस्वाकृतेः ॥
प्रभुर्धनपरायणःसततदुर्गतःसज्जनो
नृपांगणगतःखलोमनसिसप्तशल्यानिमे ॥ ९४ ॥
लज्जागुणौघजननीजननीमिवस्वा
मत्यंतशुद्धहृदयामनुवर्तमानां ॥
तेजस्विनःसुखमसूनपिसंत्यजंति
सत्यव्रतव्यसनिनोनपुनःप्रतिज्ञां ॥ ९५ ॥
गृण्हात्येषरिपोःशिरःप्रजविनकर्पत्यसौवाजिनं
धृत्वाचर्मधनुःप्रयातिपुरतोनाऽसौकरोदक्षिणः ॥
द्यूतचौर्यकथांतथाचशपथंकुर्यान्नवामःकरो
दानाऽनुद्यमतांनिरीक्ष्यविधिनाशौचोऽधिकारीकृतः ॥ ९६ ॥
बहुतैरहितेरसातल उत्तिष्ठंतेहिसुमनमसेनपास ॥

---

१ सुवर्णालंकारसंग्रहयोग्य २ हीरकादिः ३ वंगे (कथील इतिलो०) ४ निंदा ५ दुष्टता. ६ दरिद्रः ७ वेगवंतं. ८ डाळ इतिलोके. ९ शौचकार्येनियुक्तः १० तरहितेरसातले रसाले आम्रवृक्षे इत्यर्थः ११ पुष्पाणि (मोहोर इतिलो०) पक्षे शोभनमनसःमनस इत्यर्थः १२ माघमासे. पक्षे नपअर्थाया.

कांतारे[1]जनवेगं विषह्यसद्रसफलास्तुविरलाःस्युः ॥ १९७ ॥
यस्ययोदुर्लभोभोग स्तस्यतद्यत्नतःक्षतिः ॥
वाप्यांयथोष्ट्रयोगेन यतिःसर्शिबिकोऽपतत् ॥ ९८ ॥
पतंग[2]पाकसमये पतंग[3]पतिविक्रमाः ॥
पतंग[4]स्योदयेचेलुः पतंगा[5]इववानराः ॥ ९९ ॥
किंवाच्यंसूर्यशशिनो र्दारिद्र्यमहतांपुरः ॥
दिनरात्रिविभागेन परिधत्तोयदंबरं[6] ॥ २०० ॥
मुरारि[7]पदभक्तिश्चे त्तदार्माघे[8]रतिंकुरु ॥ मु० ॥ २०१ ॥
शीलभारवतीकांता पुष्पभारवतीलता ॥
अर्थभारवतीवाणी भजतेकामपिश्रियं ॥ २ ॥
वार्ता[11]चकौतुक[12]वतीविमलाचविद्या
लोकोत्तरःपरिमलश्चकुरंगनाभेः ॥
तैलस्यबिंदुरिववारिणिदुर्निवार
मेतत्त्रयंप्रसरतिस्वयमेवलोके ॥ ३ ॥
यथानयतिकैलासं[13] नैगंगा[14]नैसरस्वती[15] ॥
तथानयतिकै० ॥ ४ ॥
त्वंनोगोत्रगुरुस्तवेंदुरधिपस्तस्याऽमृतंत्वत्करे
एनांव्याधशराऽऽहतांप्रणयिनींतन्वींपुनर्जीवय ॥
इत्युच्चैर्गगनेनिशाकरमृगेकारुण्यमातन्वतः
शृंगाऽग्रादपतन्मृगस्यरुदतोबाष्पांऽबुभूमंडले ॥ ५ ॥

---

१ कांतारंअरण्यंदुर्गममार्गइतियावत् तत्संबंधिएजनवेगंकंपनवेगंविषह्यसहित्वासद्र सानिफलानियेषांएवंविधाःविरलाःस्युः पक्षे कांतास्त्री, राःद्रव्यं, जनवेगोजनसंतापः एतान्मर्षयित्वा सद्रसःमोक्षरसःसएवफलंयेषांएतादृशाविरलाःस्युः २ शालिविशेषस्य परिपाकसमये. ३ गरुडपराक्रमाः ४ सूर्यस्य. ५ शलभाः ६ आकाशंवस्त्रंच. ७ मुरारिनामाकविः ८ माघकाव्ये. उत्तरार्धस्यार्थः — मुरारिर्विष्णुस्तस्यपदेभक्तिंकर्तुमिच्छसिचेत्अघेपातकेप्रीतिंमाकुरु. ९ अर्चित्वा. १० शोभा. ११ वृत्तांतः १२ कुतूहलयुक्ता. १३ पर्वतं. १४ मायनविद्या. १५ न गंगा न सरस्वतीइतिपदच्छेदउत्तरार्धे.

कन्याप्रसूतस्यधनुः प्रसंगा दंगाधिकासादितविक्रमस्य ॥
धनंजयाऽऽधीनपराक्रमस्य हिमस्यकर्णस्यचकोविशेषः ॥ ६ ॥
सपूर्वरसिकोलोके भुक्त्वाकाव्यंपरैःकृतं ॥
उत्पद्यतेचयुगप न्नयनेऽक्ष्णोश्चपत्त्ववाः ॥ ७ ॥
तांबूलस्यगुणाःसंति सर्वेशतसहस्रशः ॥
एकोऽपिचमहान्दोषी यस्यदानाद्विसर्जनं ॥ ८ ॥
मतिगृहकीर्णगुणिनो लूताकीटाइवस्फुरंतिशतं ॥
तद्वासकःस्वगोभिः कोवारविरिवगुणज्ञोऽस्ति ॥ ९ ॥
सरलप्रियगुणाऽऽढ्यं लंबितमालंविचित्रतिलकंच ॥
वनमिववपुस्तवैत कथमवनंनृपजनस्याऽस्य ॥ २१० ॥
असौभाग्यंधत्तेपरमसुखभोगाऽऽस्पदमयं
विचित्रंतद्गेहंभवतिपृथुकार्तस्वरमयं ॥
निविष्टःपल्यंकेकलयतिसकांतारतरणं
प्रसादंकोपंवाजननिभवतीयत्रतनुते ॥ ११ ॥
भूपःकूपइवाऽऽभाति नैमज्जनसुखाऽऽवहः ॥

१ कन्याराशौ उत्पन्नस्य पक्षे कुमारिकायांप्रसूतस्य. २ धनुराशिसंगमेनअंगेषुशरीरेषुअधिकंआसादितःसंपादितःविक्रमोरोमांचोत्पादनादिरूपःपराक्रमोयेन. पक्षे धनुर्विद्याअंगदेशेषुसंपादितःपराक्रमोयेन ३ धनंजयःअग्निःतदधीनःपराक्रमोबलंयस्य पक्षे धनंजयोऽर्जुनःतदधीनपराक्रमः ४ वाःउदकं. पक्षे वाःवाइतिलौकिकशब्दः ५ कोकीतिलेके ६ प्रकाशकः ७ स्वेद्रियैःस्वकिरणैश्च. ८ सरलाःवृक्षविशेषा.प्रियंगवश्चतेषांसमाहारस्तेनाढ्यपूर्णं. पक्षे सरलंचतनुप्रियंरूपंयंच, गुणैर्गौरवर्णत्वादिभिर्युक्तं. ९ लंबितस्तमालायस्मिंस्तत् पक्षे लंबितामालामाल्यंयस्य. १० विचित्रानानाविधास्तिलकाः वृक्षविशेषायस्मिंस्तत्. पक्षे विचित्रोविचित्रवर्णस्तिलकःकस्तूरीकुंकुमादिकृतोयस्मिंस्तत्. ११ हेजननि भवतीयत्रयस्मिन्पुरुषेप्रसादंतनुतेकरोतिअसौपुरुषःभाग्यंऐश्वर्यंधत्ते. यत्रकोपतनुतेसः असौभाग्यंसौभाग्याभावंधत्ते एवमग्रेपि. १२ अयंप्रसादविषयःकोपविषयश्च परमसुखभोगानामास्पदं कोपपक्षे परंअत्यंतंअसुखभोगास्पदं. भवतीतिशेषः १३ तस्यपूर्वोक्तस्यपुरुषस्यगेहंविविधचित्रयुक्तं तथा पृथुमहत्कार्तस्वरंस्वर्णंतन्मयं. पक्षे चित्ररहितं तथा पृथुकानांबालानांअन्नाद्यभावप्रयुक्तेन आर्तस्वरेणप्रचुरं. १४ सपूर्वोक्तःपुरुषःकांतायाःरमणंतस्यरणयुद्धं. पक्षे कांतारंदुर्गमारण्यंतत्तरणंकलयति. १५ मज्जनं-मज्जयेजनास्तेषांसुखावहः पक्षे मज्जने (बुडीमारणें) सुखावहोनभवतीतिमज्जनसुखावहः

ददातिगुणसंबंधा बध्नात्यात्माऽनुरूपतः ॥ १२ ॥

गुणवदगुणवद्वाकुर्वताकार्यजातं

परिणतिरवधार्यायत्नतःपंडितेन ॥

अतिरभसकृतानांकर्मणामाविपत्ते

र्भवतिहृदयदाहीशल्यतुल्योविपाकः ॥ १३ ॥

आनीतानटवन्मयातवपुरःश्रीरामयाभूमिका

व्योमाकाशखखांऽबराऽब्धिवसवस्त्वत्प्रीतयेऽद्याऽवधि ॥

प्रीतोयर्हिनिरीक्षणात्स्वमधुनायत्प्रार्थितंदेहिमे

नोचेद्ब्रूहिकदाऽपिमाऽऽनयपुनर्मामीदृशींभूमिकाम् ॥ १४ ॥

शक्तिःशिवाकाचनसन्निधत्ते विलोचनेजाग्रतममग्ने ॥

समानधर्मायुवयोःसकाशे सखाभविष्यत्यचिरेणकश्चित् ॥१५॥

साहित्यपाथोनिधिमंथनोत्थं कर्णाऽमृतंरक्षतहेकवींद्राः ॥

यत्तस्यदैत्याइवलुंठनाय काव्याऽर्थचोराःप्रगुणीभवंति ॥ १६ ॥

शस्त्रंनखलुकर्तव्य मितिपित्रानियोजितः ॥

तदेवशस्त्रंकृतवान् पितुराज्ञानलंघिता ॥ १७ ॥

कतिधावयमेपादा वितिभर्त्रानिवेदिता ॥

नतयाधावितौपादौ भर्तुराज्ञानलंघिता ॥ १८ ॥

पुंस्त्वेपुमातापुरुषायमाणा लज्जावतीविश्वसृजंविलोक्य ॥

नाभीसरोजेनयनंमुरारे र्वामेतरंवारयतिस्मचित्रं ॥१९॥

१ गुणाःविद्याविनयादिगुणाः पक्षे गुणाःरज्जवः २ कार्यसमूहं. ३ परिणामः ४ वेषाः (सोंग) इतिलोके. ५ अंकानांवामतोगत्याचतुरशीति ८४०००००० लक्षाणि भवति. चतुरशीतिलक्षयोनिभ्रमणंकृतमितितात्पर्यं. अतोजन्ममरणपरंपरायामोचयेति भावः ६अलंकारादिप्रतिपादकशास्त्रसागरमंथनोद्भवं. ७ कर्णामृतनामकोग्रंथः ८न खलु इतिप्रथमंपदच्छेदः विरोधपरिहारेनखलुनखानुलुनातीतिनखलुनखच्छेदकं. ९ नतयाइत्यत्र तया पादौनधावितौ परिहारे नतयानम्रयाइतिपदच्छेदः १० पुंस्त्वेपोर्मदनस्यमाता लक्ष्मीः पुरुषायमाणापुरुषवदाचरंती विपरीतरतंकुर्वतीत्यर्थः विश्वसृजभगवन्नाभीसरोजस्थंब्रह्माणंविलोक्यलज्जावतीसतीमुरारेर्दक्षिणंनयनंवारयतिस्म यतोभगवन्नेत्रेहि सूर्यचंद्रात्मकेतत्रदक्षिणस्यसूर्यात्मकत्वात्तद्वारणेनसरोजंमुकुलितंभवेत् ततश्चब्रह्मापिसरोजकोशेअंतर्हितोभवेदितिमनसिकृत्यातद्वारणमासेतिभावः

मालिन्यमब्जशशिनोर्मधुलिट्कलंकौ
धत्तोमुखेतुतवदृक्तिलकांजनाभ्यां ॥
दोषाविंत:क्वचनमेलनतोगुणत्वं
वक्तुर्गुणोहिवचसिश्रमविमलंभौ ॥ २० ॥
पुराकवीनांगणनाप्रसंगे कनिष्ठिकाऽधिष्ठितकालिदासा ॥
अद्याऽपितत्तुल्यकवेरभावा दनामिकासाऽर्थवतीबभूव॥२१॥
पुरोत्पीडितडागस्य परीवाहः प्रतिक्रिया ॥
शोकक्षोभेचहृदयं मलापैरेवधार्यते ॥ २२ ॥
रमणीय:सहिपुरुषो रमणीयत्रैवरज्यतिविदग्धा ॥
श्लोक:सएवसुभग श्चित्तंसक्तंहियत्ररसिकस्य ॥ २३ ॥
आपरितोषाद्विदुषां नसाधुमन्येप्रयोगविज्ञानं ॥
बलवदपिशिक्षितानामा त्मन्यप्रत्ययंचेत: ॥ २४ ॥
श्लेष्माऽगारेवसति जाताऽस्माकंनदत्रमायात ॥
आंदोलनच्छलादिह निवारयंतीवमौक्तिकानिविटान् ॥२५॥
अद्यापिदुर्निवारं स्तुतिकन्यावहतिकौमारं ॥
सद्भ्योनरोचतेसा ऽसंतोऽप्यस्यैनरोचंते ॥ २६ ॥
तेकौपीनधनास्तएवसकलंधात्रीफलंभुंजते
तेषांद्वारिनेर्दंतिवाजिनिवहास्तैरेवलब्धाक्षिति: ॥
तैरेवंसमलंकृतंनिजकुलंकिवाबहुब्रूमहे
येदृष्टा:परमेश्वरेणभवतातुष्टेनरुष्टेनवा ॥ २७ ॥
स्वमस्तकसमारूढं मृत्युंपश्येज्जनोयदि ॥
आहारोऽपिनरोचेत किमुताऽन्याविभूतय: ॥ २८ ॥
अंधदरिद्रिणमपिप्रियपाविहीनं

१ मलिनत्वं. २ मामुत: ३ विसंवाद: ४ अन्वर्थां. ५ प्रवहणं. ६ उपाय: ७ चतुरा. ८ अविश्वस्तं. ९ घ्राणे. १० आंदोलनमिषात्. ११ जारान्. १२ स्तुति-रेवकन्या. १३ कुमारिकात्व. १४ कौपृथिव्यां १५ पीनधना: पुष्टधना: पक्षे कौपीनमे-वधनंयेषां १६ धात्रीफलंपृथ्वीफलंराज्यमित्यर्थ: पक्षे आमलकीफलं. १७ वाजिनि-वहाअश्वसमूहा: मर्दंतिहेषितंकुर्वंतीत्यर्थ: पक्षे न इतिपदच्छेद: गजाश्वसमूहा: १८ स-म्यगलंकृतं. पक्षे समलेसदोषंकृतं.

वोढ्येश्वरेवदतियाचवरंत्वमेकं ॥
नेत्रेननाऽपिवंसुनोवनितांसवंत्रे
छत्राऽभिराममुतदर्शनमित्युवाच ॥ २९ ॥
मिथिलेहसत्ययोध्यां त्वंसखिपरपुरुषाऽनुरक्तासि ॥
मिथिलांपरिहसतिचसा त्वंसखिजनकाऽनुरक्ताऽसि ॥३०॥
सन्नानाविकधोरणीनिपतितामध्येजलंक्षेपणी
पंथाःपर्वतदुर्गमोघनेघनच्छन्नश्चतीरंपथः ॥
हंहोमारुतदुस्तरोजलनिधिःशीर्णा[11]चनौःसांमतं
मध्येमज्जयवातटंगमयवाहस्तेतवाऽऽस्तेद्वय ॥ ३१ ॥
अस्मानवेहिकेलमानलमाहेतानां
येषांप्रचंडमुसलैरवदाततैव ॥
स्नेहंविमुच्यसहसाखलतांप्रयांति
येस्वल्पपीडनवशान्नवयंतिलास्ते ॥ ३२ ॥
उपभोक्तुंनजानाति श्रियंप्राप्याऽपिमानवः ॥
आकंठजलमग्नोऽपि श्वालिहत्येवजिव्हया ॥ ३३ ॥
अबलायत्रप्रबला शिशुरवनीशोनिरक्षरोमंत्री ॥
नहिनहितत्रधनाऽऽशा [16]जीवितआशाऽपिदुर्लभाभवति॥३४॥
अयश्चणकचर्वणंफणिफणामणेःकर्षणं
करेणगिरितोलनंजलनिधेःपदालंघनं ॥
प्रसुप्तहरिबोधनंनिशितखड्गसंस्पर्शनं
कदाचिदखिलंभवेन्नचशठाद्धनस्याऽर्जनं ॥ ३५ ॥
सर्पस्यरत्नेकृपणस्यवित्ते सत्याःकुचेकेसरिणश्चकेशे ॥
मानोन्नतानांशरणागतेच मृतौभवेदन्यकरप्रचारः ॥ ३६ ॥

---

१ द्रव्यं २ वरयामास. ३ जनकपुरी. ४ जारः परमेश्वरश्च. ५ पिता, विदेहश्च. ६ गलिता. ७ जलमध्ये. ८ बल्हेंइतिलोके॰ ९ निबिडघनाच्छादितः १० अंतरिक्षं. ११ भिन्ना. १२ शालिविशेषान् १३ कंडितानां १४ शुभत्वं. १५ तैलंप्रीतिंच. १६ दुर्जनत्वं पक्षे (खळ, पेंड) इतिप्रसिद्धातदूपत्व. १७ जीवितेआशेतिपदच्छेदः १८ लोह. १९ निद्रितसिंहोत्थापनं. २० तीक्ष्णः २१ साध्व्याः २२ सिंहस्य.

शिशुरपिनिपुणोगुरोर्गरीयान् नतुवपुषैवमहान्नर्वजन्मविज्ञः ॥
मणिरणुरपिभूषणायपुंसां नतुपृथुकोपलविलासहेतुः ॥ ३७ ॥
तर्कभाषामुखेयस्य हस्तेयस्यचमंजरी ॥
मुक्तावलीयस्यकंठे तस्यवश्यामनोरमा ॥ ३८ ॥
विनाऽपितातेनविनाजनन्या गजाननःशंभुसुताऽभिधानः ॥
विनैवशास्त्रेणविनैववेदैर्माध्यंदिनानामिवपाठकोऽभूत् ॥ ३९ ॥
श्लोकस्तुश्लोकतांयाति यत्रतिष्ठंतिसाधवः ॥
लकारोलुप्यतेतत्र यत्रतिष्ठंत्यसाधवः ॥ ४० ॥
आर्तादेवान्नमस्यंति तपःकुर्वंतिरोगिणः ॥
निर्धनादानमिच्छंति वृद्धानारीपतिव्रता ॥ ४१ ॥
श्रुतिर्विभिन्नास्मृतयश्चभिन्ना नैकोमुनिर्यस्यवचःप्रमाणं ॥
धर्मस्यतत्त्वंनिहितंगुहायां महाजनोयेनगतःसपंथाः ॥४२॥
ननटोनविटोनगायको नचवेश्याघटकोनचाऽसिवेश्या ॥
कथमत्रलभेमहिप्रतिष्ठा मसतीवायुवतीनमेऽस्तिरामा॥४३॥
वेश्यावेश्मसुसीधुगंधललनावक्त्रासवाऽऽमोदिते
नीत्वानिर्भरमन्मथोत्सवसुखैरुन्निद्रचंद्राःक्षपाः ॥
सर्वज्ञाइतिदीक्षिताइतिचिरात्प्राप्ताग्निहोत्राइति
ब्रह्मज्ञाइतितापसाइतिदिवाधूर्तैर्जगद्वंच्यते ॥ ४४ ॥
अमितगुणोऽपिपदार्थो दोषेणैकेननिंदितोभवति ॥
सकलरसायनमहितो गंधेनोग्रेणलशुनइव ॥ ४५ ॥
कस्याऽपिकोऽप्यतिशयोऽस्तिसतेनलोके
ख्यातिंप्रयातिनहिसर्वविदस्तुसर्वे ॥
किंकेतकीफलतिकिंपनसःसुपुष्पः
किंनागवल्ल्यपिचपुष्पफलैरुपेता ॥ ४६ ॥
ननंदासाऽऽनंदाहसितवदनाऽभूद्गृहिणिका

---

१ शास्त्रवेत्ता. २ श्रेष्ठः ३ महन्सुमतिर्ज्ञानस्येतिव्यधिकरणोबहुव्रीहिः महाप्रतिज्ञ इतिवापाठःसुगमः. ४ ग्रंथविशेषः तर्कपूर्वकंभाषणंच एवमेवाग्रिमग्रंथद्वयंबोध्यं. अर्थांतरं सुगमं ५ ग्रंथविशेषःस्त्रीच. ६ लकारलोपात्शोकएवावतिष्ठते. ७ मद्यं. ८ पूज्यः ९ (नर्मदाइतिक्षो०)

क्लाम्यांचश्वश्रू:कुपितदीसपत्योमयिसखि ॥
सचेदुश्चैर्ब्रूतेकठिनवचनैस्तर्हिसकला:
करिष्यंतिप्रायोव्र्यसनरहितास्तांडवविधिं ॥ ४७ ॥
नकेशेषुस्नेहोनचकुचतटीचंदनरसो
नवावीटीवक्त्रेनचनयनयोरंजनकथा ॥
नचाऽल्पोऽप्याकल्पोनचसुवसनंनैवकुसुमं
स्नुषात्वंपापानांफलमधनगेहेषुसुदृशां ॥ ४८ ॥
अनुयाताऽनेकजन: परपुरुषैरुह्यतेऽस्यनिजदेह: ॥
अधिकारस्थ:पुरुष: शवइवनशृणोतिवीक्षतेकुमति: ॥ ४९ ॥
किंतेनजातुजातेन मातुर्यौवनहारिणा ॥
आरोहतिनय:स्वस्य वंशस्याऽग्रेध्वजोयथा ॥ २५० ॥
संग्रहंनाकुलीनस्य सर्पस्येवकरोतिय: ॥
सएवश्लाघ्यतेमंत्री सम्यग्गारुडिकोयथा ॥ ५१ ॥
जामाताजठरंजाया जातवेदाजलाशय: ॥
पूरितानैवपूर्यंते जकारा:पंचदुर्भरा: ॥ ५२ ॥
जननीजन्मभूमिश्च जान्हवीचजनार्दन: ॥
जनक:पंचमश्चैव जकारा:पंचदुर्लभा: ॥ ५३ ॥
बिलाद्बहिर्बिलस्यांत: स्थितमार्जारसर्पयो: ॥
मध्येचाऽऽखुरिवाऽऽभाति पत्नीद्वययुतोनर: ॥ ५४ ॥
सदावक्र:सदाक्रूर: सदापूजामपेक्षते ॥
कन्याराशिस्थितोनित्यं जामातादशमोग्रह: ॥ ५५ ॥
जरारूपंहरतिहिधैर्यमाशा मृत्यु:प्राणान्धर्मचर्यामसूया ॥
कामोन्हियंवृत्तमनार्यसेवा क्रोध:श्रियंसर्वमेवाऽभिमान: ॥५६॥
ज्यायांसमपिशीलेन विहीनंनैवपूजयेत् ॥
अपिशूद्रंचधर्मज्ञं सद्वृत्तमभिपूजयेत् ॥ ५७ ॥
ज्वलतिचलितेंधनोऽग्नि विप्रकृत:पन्नग:फणंकुरुते ॥
प्राय:स्वंमहिमानं क्षोभात्प्रतिपद्यतेजंतु: ॥ ५८ ॥
तक्षकस्यविषंदंते मक्षिकायाविषंशिर: ॥

---

१ नमाइत्यर्थ: २ भूषणादिकं. ३ न अकुलीनस्य पक्षे नाकुर्वल्मीकं ४ ज्येष्ठं वरिष्ठमित्यर्थ:

वृश्चिकस्यविषंपुच्छं सर्वांगेदुर्जनोविषं ॥ ५९ ॥
तृणंब्रह्मविदःस्वर्गं तृणंशूरस्यजीवितं ॥
जिताऽक्षस्यतृणंनारी निस्पृहस्यतृणंजगत् ॥ ६० ॥

दूतोनसंचरतिखेनचलेच्चवार्ता
पूर्वंनजल्पितमिदंनचसंगमोऽस्ति ॥
व्योम्निस्थितंरविशशिग्रहणंप्रशस्तं
जानातियोद्विजवरःसकथंनविद्वान् ॥ ६१ ॥

देयंभोअधनेधनंसुकृतिभिर्नोसंचितंसर्वदा
श्रीकर्णस्यबलेश्चविक्रमपतेरद्याऽपिकीर्तिःस्थिता ॥
आश्चर्यंमधुदानभोगरहितंनष्टंचिरात्संचितं
निर्वाणादपिपाणिपादयुगलंघर्षंत्यहोमक्षिकाः ॥ ६२ ॥

धनंयदिगतंगतंचरणयुग्मरेणूपमं
धरायदिगतागताकथयमेकिमेतावता ॥
इदंपुनरहंतुदंधनिगणैरिदानींतनै
र्दरिद्रगणनाविधौयदहमंकपातेधृतः ॥ ६३ ॥

नभोभूषापूषाकमलवनभूषामधुकरो
वचोभूषासत्यंवरविभवभूषावितरणं ॥
मनोभूषामैत्रीमधुसमयभूषामनसिजः
सदाभूषासूक्तिःसकलगुणभूषाचविनयः ॥ ६४ ॥

प्रागल्भ्यहीनस्यनरस्यविद्या शस्त्रंयथाकापुरुषस्यहस्ते ॥
नतृप्तिमुत्पादयतेशरीरे वृद्धस्यदाराइवदर्शनीयाः ॥ ६५ ॥

मानुष्येसतिदुर्लभापुरुषतापुंस्त्वेपुनर्विप्रता
विप्रत्वेबहुविद्यताऽतिगुणताविद्यावतोऽर्थज्ञता ॥
अर्थज्ञस्यविचित्रवाक्यपटुतातत्राऽपिलोकज्ञता
लोकज्ञस्यसमस्तशास्त्रविदुषोधर्मेमतिर्दुर्लभा ॥ ६६ ॥

शत्रोरपिगुणावाच्या दोषावाच्यागुरोरपि ॥
सर्वदासर्वयत्नेन पुत्रेशिष्येहितंवदेत् ॥ ६७ ॥
साक्षीयोनमदंकुर्यात्समुखीतृष्णयोज्झितः ॥

---

१ मिष्ठमीनिशेषः २ मर्मस्पृक्. ३ सूर्यः ४ सभा.

तस्मिन्नंवस्यविश्वास: पुरुष:सजितेंद्रिय: ॥ ६८ ॥
सुकुलेयोजयेत्कन्यां पुत्रंविद्यासुयोजयेत् ॥
व्यसनेयोजयेच्छत्रु मिष्टंधर्मेणयोजयेत् ॥ ६९ ॥
सुलभंवस्तुसर्वस्य नयात्यादरणीयतां ॥
स्वदारपरिहारेण परदाराऽर्थिनोजना: ॥ ७० ॥
द्यूतेहारितसर्वआद्यइतरोमल्लश्रमध्याऽशन:
षंढोऽन्य:परमंदुराशयसखोऽन्योगोपराट्पंचवै ॥
एकस्त्रीनिरताश्चपांडवगुणान्बिभ्रत्यमीसूनव
स्तस्मात्पांडुगुणंवहामिनितरांतच्चितयाऽनारतम् ॥ ७१॥
अनुसरतिकरिकपोलं भ्रमर:श्रवणेनताड्यमानोऽपि ॥
गणयतिनतिरस्कारं दानांधविलोचनोनीच: ॥ ७२ ॥
अंत:कटुरपिलघुरपि सद्वृत्तंय:पुमान्नसंत्यजति ॥
सभवतिसद्योवंद्य: सर्षपइवसर्वलोकस्य ॥ ७३ ॥
ऊर्जितंसज्जनंदृष्ट्वा द्वेष्टिनीच:पुन:पुन: ॥
कवलीकुरुतेस्वस्थं विधुंदिविविधुंतुद: ॥ ७४ ॥
एकस्यकर्मसंवीक्ष्य करोत्यन्योऽपिगर्हितं ॥
गतानुगतिकोलोको नलोक:पारमार्थिक: ॥ ७५ ॥
कुदेशमासाद्यकुतोऽर्थसंचय: कुपुत्रमासाद्यकुतोजलांजलि: ॥
कुगेहिनींप्राप्यगृहेकुत:सुखं कुशिष्यमध्यापयत:कुतोयश: ॥७६॥
क्वचिद्रुष्ट:क्वचित्तुष्टो रुष्टस्तुष्ट:क्षणेक्षणे ॥
अव्यवस्थितचित्तस्य प्रसादोऽपिभयंकर: ॥ ७७ ॥
क्षतेप्रहारानिपतत्यभीक्ष्णं धनक्षयेदीप्यतिजाठराग्नि: ॥
आपत्सुवैराणिसमुल्लसंति छिद्रेष्वनर्थाबहुलीभवंति ॥ ७८ ॥
गुरुपत्न्यांनिशाधीशो ब्राह्मण्यांपाकशासन:॥
गत:पंचत्वमुलक्ष्यत्वं काकथाऽन्यस्यदेहिन: ॥ ७९ ॥
गुरोरप्यवलिप्तस्य कार्याऽकार्यमजानत: ॥
उत्पथप्रतिपन्नस्य न्याय्यंभवतिशासनं ॥ ८० ॥

---

१ मिष्टं. २ लघवेस्य. ३ उन्मार्गप्रवर्तिन:

गौल्मिककर्मनियुक्तः क्षीरीं पिबतयतिचेतसात्वहः ॥
वसुधावसुसंपूर्णा मयाऽलब्धाकिमन्येन ॥ ८१ ॥
पासादपिनदर्धंच कस्मान्नोदीयतेऽर्थिषु ॥
इच्छाऽनुरूपोविभवः कदाकस्यभविष्यति ॥ ८२ ॥
चर्मखंडंद्विधाभिन्न मपानोद्गारधूपितं ॥
येरमंतिनरास्तत्र कृमितुल्याःकथंनते ॥ ८३ ॥
चलंचित्तंचलंवित्तं चलेजीवितयौवने ॥
चलाचलमिदंसर्वं कीर्तिर्यस्यसजीवति ॥८४॥
राजनिविदुषांमध्ये वरसुरतानांसमागमेस्त्रीणां ॥
सांध्वसदूषितहृदयो वाक्पटुरपिकातरोभवति ॥ ८५ ॥
यत्राऽऽकृतिस्तत्रगुणावसंति नैतद्धिसम्यक्कविभिःप्रणीतं ॥
येनाऽतिपार्श्वेऽप्यपिमेन्दुदिदृक्षा दुनोतिगात्रंविरहेप्रियाऽसौ ॥८६॥
यस्मिन्रुष्टेभयंनाऽस्ति तुष्टेनैवधनाऽऽगमः ॥
निग्रहाऽनुग्रहौनस्तः सरुष्टःकिंकरिष्यति ॥ ८७ ॥
आलस्योपहताविद्या परहस्तगताःस्त्रियः ॥
अल्पबीजंहतंक्षेत्रं हतंसैन्यमनायकं ॥ ८८ ॥
निर्विषेणाऽपिसर्पेण कर्तव्यामहतीफणा ॥
विषमस्तुनचाप्यस्तु खटाटोपोभयंकरः ॥ ८९ ॥
एकएवपदार्थस्तु त्रिधाभवतिवीक्षितः ॥
कुणपंकामिनीमांसं योगिभिःकामिभिःश्वभिः ॥ ९० ॥
वैद्यस्तर्कविहीनो निर्लज्जाकुलवधूर्यतिर्मूर्खः ॥
कटकेचर्मा[1] हुणिको मस्तकशूलानिचत्वारि ॥ ९१ ॥
अलिरनुसरतिपरिमलं लक्ष्मीरनुसरतिनयगुणसमृद्धिं ॥
निम्नमनुसरतिसलिलं विधिलिखितंबुद्धिरनुसरति ॥ ९२ ॥
राजाऽऽश्रयस्तस्करताऽश्ववैपण्य माथर्वणंचाऽपिसमुद्रयानं ॥
एतानिसिध्यंतिमहाफलानि विपर्ययेप्राणहराणिपंच ॥ ९३ ॥
अन्यानिशास्त्राणिविनोदमात्रं प्राप्तेषुकालेषुनतैश्चकिंचित् ॥
चिकित्सितज्योतिषमंत्रवादाः पदेपदेप्रत्ययमावहंति ॥ ९४ ॥

---

१ भर्य. २ वाग्मी. ३ शर्व. ४ आगंतुकः ५ अश्वव्यवहारः ६ जारणमारणादि.

अधरस्यमधुरिमाणं कुचकाठिन्यंदृशोस्तथातैक्ष्ण्यं ॥
कवितायाःपरिपाकाननुभवरसिकोविजानाति ॥ ९५ ॥
परिच्छिन्नःस्वादोऽमृतगुडमधुक्षौद्रपयसां
कदाचिद्वाऽभ्यासाद्भजतिखलुवैरस्यमधिकं ॥
भियाबिंबोष्ठिवारुचिरकविवाक्येष्वनवधि
र्नेवाऽऽनंदःकोऽपिस्फुरतितुरसोऽसौनिरुपमः ॥ ९६ ॥
संगीतमपिसाहित्यं सरस्वत्याःस्तनद्वयं ॥
एकमापातमधुर मन्यदालोचनामृतं ॥ ९७ ॥
संचित्यसंचित्यजगत्समस्तं त्रयःपदार्थात्हृदयंप्रविष्टाः ॥
इक्षोर्विकाराःकृतयःकवीनां मुग्धांगनाऽपांगतरंगितानि ॥९८॥
नारीपरमुखद्रष्ट्री कविरव्यवहारवित् ॥
अपथ्यसेवीरोगीच कियद्भिर्नोपहस्यते ॥ ९९ ॥

मिश्रप्रकरणं

कलिविडंबनात्

नभेतव्यंनबोद्धव्यं नश्राव्यंवादिनोवचः ॥
झटितिप्रतिवक्तव्यं सभासुविजिगीषुभिः ॥ १ ॥
उच्चैरुद्घुष्यजेतव्यं मध्यस्थश्चेदपंडितः ॥
पंडितायदितत्रैव पक्षपातोऽधिरोप्यतां ॥ २ ॥
स्तोतारःकेभविष्यंति मूर्खस्यजगतीतले ॥
नस्तौतिचेत्स्वयंचत्वं कदातस्याऽस्तुनिर्वृतिः ॥ ३ ॥
वाच्यतांसमयोऽतीतः स्पष्टमग्रेभविष्यति ॥
इतिपाठयतांग्रंथे काठिन्यंकुत्रवर्तते ॥ ४ ॥
अगतित्वमतिश्रद्धा ज्ञानाभ्यासेनतृप्तता ॥
त्रयःशिष्यगुणाह्येते मूर्खाचार्यस्यभाग्यजाः ॥ ५ ॥
यदिनकाऽपिविद्यायां सर्वथाकृतेर्मतिः ॥
मांत्रिकास्तुभविष्यामो योगिनोयतयोऽपिवा ॥ ६ ॥
अविलंबेनसंसिद्धौ मांत्रिकैराप्यतेयशः ॥
विलंबेकर्मबाहुल्यं विख्याप्याऽवाप्यतेधनं ॥ ७ ॥

चारान्नविचार्यदैवज्ञैः वक्तव्यंभूभुजांफलं ॥
गृहाचारपरिज्ञानं तेषामावश्यकंयतः ॥ ८ ॥
पुत्रइत्येवपितरि कन्यकेत्येवमातरि ॥
गर्भप्रश्नेषुकथयन् दैवज्ञोविजयीभवेत् ॥ ९ ॥
आयुःप्रश्नेदीर्घमायु र्वाच्यंमौहूर्तिकैर्द्विजैः ॥
जीवंतोबहुमन्यंते मृताःप्रक्ष्यंतिकंपुनः ॥ १० ॥
निर्धनानांधनाऽवाप्ति र्धनिनामधिकंधनं ॥
ब्रुवाणाःसर्वथाग्राह्या लोकेज्योतिषिकानराः ॥ ११ ॥
अपिसागरपर्यंता विचेतव्यावसुंधरा ॥
देशोऽप्यरत्निमात्रोऽपि नाऽस्तिदैवज्ञवर्जितः ॥ १२ ॥
स्वस्थैरसाध्यरोगैश्च जंतुभिर्नाऽस्तिकिंचन ॥
कातरादीर्घरोगाश्च भिषजांभाग्यहेतवः ॥ १३ ॥
नाऽतिधैर्यप्रदातव्यं नाऽतिभीतिश्चरोगिणां ॥
नैश्चित्यादादिमेदानं नैराश्यादेवनाऽतिमे ॥ १४ ॥
भैषज्यंतुयथाकामं पथ्यंतुकठिनंवदेत ॥
आरोग्यंवैद्यमाहात्म्या दन्यथात्वमपथ्यतः ॥ १५ ॥
निदानंरोगनामानि साध्यासाध्यंचिकित्सितं ॥
सर्वमप्युपदेक्ष्यंति रोगिणःसदनेस्त्रियः ॥ १६ ॥
प्रवर्तनार्थमारंभे मध्येत्वौषधहेतवे ॥
बहुमानार्थमंतेच जिहीर्षंतिचिकित्सकाः ॥ १७ ॥
रोगस्योपक्रमेसांत्वं मध्येकिंचिद्धनव्ययः ॥
शनैरनादरःशांतौ स्नातोवैद्यंनपश्यति ॥ १८ ॥
दैवज्ञत्वंमांत्रिकता भैषज्यंचाटुकौशलं ॥
एकैकमर्थलाभाय द्वित्रियोगास्तुदुर्लभाः ॥ १९ ॥
नकारणमपेक्षंते कवयःस्तोतुमुद्यताः ॥
किंचिदस्तुवतांतेषां जिह्वाफुरफुरायते ॥ २० ॥
एकैवकवितापुंसां ग्रामायाऽश्वायहस्तिने ॥
अंततोऽन्नायवस्त्राय तांबूलायचकल्पते ॥ २१ ॥
मातुलस्यबलंमाता जामातुर्दुहिताबलं ॥
श्वशुरस्यबलंभार्या स्वयमेवाऽतिथेर्बलं ॥ २२ ॥

भार्यैद्वेपुत्रशालिन्यौ भगिन्यःपतिवर्जिताः ॥
अशांतकलहोनाम योगोऽयंगृहमेधिनां ॥ २३ ॥
द्वेभार्येबहवःपुत्रा दारिद्र्यंरोगसंभवः ॥
जीर्णौचमातापितरा वेकैकंमरणाऽधिकं ॥ २४ ॥
अंतकोऽपिहिजंतूना मंतकालमुपेक्षते ॥
नकालनियमःकश्चि दुत्तमर्णस्यविद्यते ॥ २५ ॥
नपश्यामोमुखेदंष्ट्रां नपाशंवाकरांचले ॥
उत्तमर्णमवेक्ष्यैव तथाऽप्युद्विजतेजनः॥ २६ ॥
शत्रौसांत्वंप्रतीकारः सर्वरोगेषुभेषजं ॥
मृत्यौमृत्युंजयध्यानं दारिद्र्येनतुकिंचन ॥ २७ ॥
शक्तिंकरोतिसंचारे शीतोष्णेमर्षयत्यपि ॥
दीपयत्युदरेवह्निं दारिद्र्यंपरमौषधं ॥ २८ ॥
मामाप्यबुद्धिःस्तोत्रेषु देवताबुद्धिरात्मनि ॥
कीटबुद्धिर्मनुष्येषु नूतनायाःश्रियःफलं ॥ २९ ॥
क्षणमात्रग्रहाऽऽवेशो याममात्रंसुरामदः ॥
लक्ष्मीमदस्तुमूर्खाणा मादेहमनुवर्तते ॥ ३० ॥
अध्यापयंतिशास्त्राणि तृणीकुर्वंतिपंडितान् ॥
विस्मारयंतिजातिस्वां वराटाःपंचषाःकरे ॥ ३१ ॥
कौपीनंभस्मनालेपो दर्भारुद्राक्षमालिका ॥
मौनमेकांतिकाचेति मूर्खसंजीवनानिषट् ॥ ३२ ॥
आनंदबाष्परोमांचो यस्यस्वेच्छावशंवदौ ॥
किंतस्यसाधकैरन्यैः किंकराःसर्वपार्थिवाः ॥ ३३ ।
सदाजपपटोहस्ते मध्येमध्येऽक्षिमीलनं ॥
सर्वंब्रह्मेतिवादश्च सद्यःप्रत्ययहेतवः ॥ ३४ ॥
आमध्यान्हंनदीवासः समाजेदेवताऽर्चनं ॥
सततंशुचिवेषश्च एततस्म्यस्यजीवनं ॥ ३५ ॥
तावद्दीर्घंनित्यकर्म यावत्स्याद्द्रष्टृमेलनं ॥
तावत्संक्षिप्यतेसर्वं यावद्द्रष्टानविद्यते ॥३६॥
यत्रभार्यागिरोवेदा यत्रधर्मोऽर्थसाधनं ॥
यत्तस्यप्रतिभामानं तस्मैश्रीकलयेनमः ॥ ३७ ॥

अथरंभाशुकसंवादः

रंभोवाच मार्गेमार्गेनूतनंचूतखंड खंडेखंडेकोकिलानांविरावः ॥
रावेरावेमानिनीमानभंगो भंगेभंगेमन्मथःपंचबाणः ॥

शुकउ० मार्गेमार्गेजायतेसाधुसंगः संगेसंगेश्रूयतेकृष्णकीर्तिः ॥
कीर्तौकीर्तौनस्तदाकारवृत्ति वृत्तौवृत्तौसच्चिदानंदभासः ॥ २ ॥

शु० तीर्थेतीर्थेनिर्मलंब्रह्मवृंद वृंदेवृंदेतत्त्वचिंतानुवादः ॥
वादेवादेजायतेतत्त्वबोधो बोधेबोधेभासतेचंद्रचूडः ॥ ३ ॥

रं० गेहेगेहेजंगमाहेमवल्ली वल्ल्यांवल्ल्यांपार्वणंचंद्रबिंबं ॥
बिंबेबिंबेदृश्यतेमीनयुग्मं युग्मेयुग्मेपंचबाणप्रचारः ॥ ४ ॥

शु० स्थानेस्थानेदृश्यतेरत्नवेदी वेद्यांवेद्यांसिद्धगंधर्वगोष्ठी ॥
गोष्ठ्यांगोष्ठ्यांकिंनरद्वंद्वगीत गीतेगीतेगीयतेरामचंद्रः ॥ ५ ॥

रं० पीनस्तनोचंदनचर्चितांऽगी विलोलनेत्रातरुणीसुशीला ॥
नाऽऽलिंगिताप्रेमभरेणयेन वृथागतंतस्यनरस्यजीवितं ॥ ६ ॥

शु० अचिंत्यरूपोभगवान्निरंजनो विश्वंभरोज्ञानमयश्चिदात्मा ॥
विशोधितोयेनहृदिक्षणंनो वृथागतंतस्यनरस्यजीवितं ॥ ७ ॥

रं० कामातुरापूर्णशशांकवक्त्रा बिंबाधराकोमलनालगोरा ॥
नाऽऽदोलितास्वेन्हृदयेभुजाभ्यां वृथाग० ॥ ८ ॥

शु० चतुर्भुजश्चक्रधरोगदायुधः पीतांबरःकौस्तुभमालयालसन् ॥
ध्यानेधृतोयेननबोधकाले वृथागतं० ॥ ९ ॥

रं० विचित्रवेषानवयौवनाढ्या लवंगकर्पूरसुवासिदेहा ॥
नाऽऽलिंगितायेनदृढंभुजाभ्यां वृथागतं० ॥ १० ॥

शु० नारायणःपंकजलोचनःप्रभुः केयूरवान्कुंडलमंडिताऽऽननः ॥
भक्त्यास्तुतोयेनसमाधितोनो वृथागतं० ॥ ११ ॥

रं० प्रियंवदाचंपकहेमवर्णा हारावलीमंडितनाभिदेशा ॥
संभोगशीलारमितानयेन वृथा० ॥ १२ ॥

शु० श्रीवत्सलक्ष्मांकितवत्सदेश स्तार्क्ष्यध्वजःशार्ङ्गधरःपरात्मा ॥
नसेवितोयेननृजन्मनाऽपि वृथागतं० ॥ १३ ॥

---

१ आम्रवृक्षः २ संचारिणी.

रं० चलत्कटीनूपुरमंजुघोषा नासाऽग्रमुक्तानयनाऽभिरामा ॥
नसेवितायेनभुजंगवेणी वृथागतं० ॥ १४ ॥

शु० विश्वंभरोज्ञानमयःपरेशो जगन्मयोऽनंतगुणप्रकाशी ॥
नाऽऽराधितोनाऽपिधृतोनयोगे वृथागतं० ॥ १५ ॥

रं० तांबूलरागैःकुसुमप्रकर्षैः सुगंधतैलेनचवासितायाः ॥
नोमर्दितौयेनकुचौनिशायां वृ० ॥ १६ ॥

शु० ब्रह्मादिदेवोऽखिलविश्वदेवो मोक्षप्रदोऽतीतगुणःप्रशांतः ॥
धृतोनयोगेनन्हृदिस्वकीये वृथागतं० ॥ १७ ॥

रं० कस्तूरिकाकुंकुमचंदनैश्च सुर्चाचतायाऽगुरुधूपितांबरा ॥
उरःस्थलेनोलुठितानिशायां वृ० ॥ १८ ॥

शु० आनंदरूपोनिजबोधरूपो दिव्यस्वरूपोबहुनामरूपः ॥
तपःसमाधौकलितोनयेन वृथा० ॥ १९ ॥

रं० कठोरपीनस्तनभारनम्रा सुमध्यमाचंचलखंजनाक्षी ॥
हेमंतकालेरमितानयन वृथा० ॥ २० ॥

शु० तपोमयोज्ञानमयोविजन्मा विद्यामयोयोगमयःपरात्मा ॥
चित्तेधृतोनोतपसिस्थितेन वृथा० ॥ २१ ॥

रं० सुलक्षणामानवनीगुणाढ्या प्रसन्नवक्त्राम्रृदुभाषिणीया ॥
नोचुंबितायेनसुनाभिदेशे वृथा० ॥ २२ ॥

शु० पन्न्यार्जितसर्वसुखंविनश्वरं दुःखप्रदंकामिनिभोगसेवितं ॥
एवंविदित्वानधृतोहियोगी वृथा० ॥ २३ ॥

रं० विशालवेणीनयनाऽभिरामा कंदर्पसंपूर्णनिधानरूपा ॥
भुक्तानयेनैववसंतकाले वृथागतं० ॥ २४ ॥

शु० मायाकरंडीनरकस्यहंडी तपोविखंडीसुकृतस्यभंडी ॥
नृणांविखंडीचिरसेविनाचे वृथा० ॥ २५ ॥

रं० समस्तशृंगारविनोदशीला लीलावतीकोकिलकंठनाला ॥
विलासितानोनवयौवनेन वृथा० ॥ २६ ॥

शु० समाधिहंत्रीजनमोहयित्री धर्मकुमंत्रीकपटस्यतंत्री ॥
सत्कर्महंत्रीकलिताचयेन वृथा० ॥ २७ ॥

रं० बिल्वस्तनीकोमलितासुशीला सुगंधकुंतालकिताचगौरा ॥
नाऽऽश्लेषितायेनचकंठदेशे वृथा० ॥ २८ ॥

शु० चिंताव्यथादुःखमयीसदोषा संसारपाशाजनमोहकर्त्री ॥
संतापकोशाभजिताचयेन वृथा० ॥ २९ ॥

रं० आनंदकंदर्पनिधानरूपा झणत्कणत्कंकणनूपुराऽऽढ्या ॥
नाऽऽस्वादितायेनसुधाऽधरस्था वृथागतं० ॥ ३० ॥

शु० कापट्यवेषाजनवंचिकासा विण्मूत्रदुर्गंधदरीदुराशा ॥
संसेवितायेनसदामलाढ्या वृथागतं० ॥ ३१ ॥

रं० चंद्राऽऽननासुंदरगौरवर्णा व्यक्तस्तनीभोगविलासदक्षा ॥
नाऽऽदोलितावैशयनेषुयेन वृथा० ॥ ३२ ॥

शु० उन्मत्तवेषामदिरासुमत्ता पापप्रदालोकविडंबनीया ॥
योगच्छलायेनविभाजिताच वृथा० ॥ ३३ ॥

रं० आनंदरूपातरुणीनतांगी सद्धर्मसंसाधनसृष्टिरूपा ॥
कामार्थदायस्यगृहेननारी वृथा० ॥ ३४ ॥

शु० अशौचदेहापतितस्वभावा वपुःप्रगल्भाबललोभशीला ॥
मृषावदंतीकलिताचयेन वृथागत ॥ ३५ ॥

रं० क्षामोदरीहंसगतिःप्रमत्ता सौंदर्यसौभाग्यवतीप्रलोला ॥
निष्पीडितायैनंस्तौयथेच्छं वृथा० ॥ ३६ ॥

शु० संसारसद्भावनभक्तिहीना चित्तस्यचोरान्हृदिनिर्दयाच ॥
विहाययोगंकलितानरेण वृथागतंतस्यनरस्यजीवितं ॥३७॥

रं० सुगंधैसुपुष्पैःसुशय्यासुकांता वसंतोऋतुःपूर्णिमापूर्णचंद्रः ॥
यदानाऽस्तिपुंस्त्वंनरस्यप्रभुनं ततःकिंततःकिंततःकिंततःकिं ३८

शु० सुरूपंशरीरंनवीनकलत्रं धनंमेरुतुल्यंवचश्चारुचित्रं ॥
हरेरंघ्रियुग्मेमनश्चेदलग्न ततःकिं० ॥ ३९ ॥

इतिरंभाशुकसंवादेशृंगारज्ञाननिर्णयः ॥

राधाकृष्णसंवादः

कासुंदरीबल्लववल्लभासु त्वच्चित्तभित्तौवदशालभंजी ॥
त्वंमालतीमंडितकेशपाशे मच्चित्तभित्तौकिलशालभंजी ॥१॥
पुरातनस्याऽपिचनिर्जरत्वे कोनामहेतुर्वदसत्यमेव ॥
लावण्यधन्येवृषभानुकन्ये तवाऽधरोत्थाऽमृतपानमेव ॥२॥
पयोधरैर्विद्युदभून्मुरारे पयोधरोविद्युतिनैवदृष्टः ॥
राधेस्थितायांत्वयिविद्युतीह पयोधरद्वंद्वमिदंप्रलोकि ॥३॥
दातुंशरीरंपरपूरुषाय नैवोत्सहेऽहंनरकाद्बिभेमि ॥
दत्तेशरीरेनरकस्यहंत्रे कानामभीतिर्नरकाद्गत्याः ॥ ४ ॥
त्वांबल्लवीजारमहर्निशंया सीमंतिनीगायतिकिंफलंसा ॥
सामं।।तराधेव्यभिचारदोषा न्मुच्येत्तथाऽसौभवनागपाशात् ॥ ५ ॥
निशाऽवसानेतवविप्रयोगा त्प्राणामदीयाविकलीभवंति ॥
राधेत्वदप्राणपतेर्वियोगे प्राणाःकथंनोविकलीभवेयः॥ ६ ॥
निर्मासिचित्तेव्रजसुंदरीणां कामंविलोचनगोचरस्त्वं ॥
किमत्रचित्रंतवभातिचित्ते कामस्यगाथेजनकोऽहमस्मि ॥७॥
जनाजगत्यांजगदीशशश्वत्त्वांराधिकाजारमुदाहरंति ॥
निंदंतुलोकायदिवास्तुवंतु प्राणेश्वरींत्वांनपरित्यजामि ॥८॥
कलानिधिंगोकुलराजमानं श्यामाप्रियंत्वांविधुमेवमन्ये ॥
त्वदुक्तरीत्याविधुशब्दवाच्यं राधाधवंमांनकथंब्रवीषि ॥९॥
भक्तिर्मयामाकतमाविधेया ययाप्रसादोभवतोमुरारे ॥

१ गोपस्त्रीषु. २ चित्तमेवभित्ति कुड्यंतस्यां. ३ पुत्तलिका (पुतळीतिलोके) ४ जीर्णस्यापि. ५ जरारहितत्वे देवत्वेच. ६ अमृतपानेनहिनिर्जरत्वंप्रसिद्धं. ७ मेघे. ८ स्त्री. ९ भवःसंसारएवनागपाशस्तस्मात्. १० व्याकुलाभवंति. ११ उत्पादयसि. १२ दृष्टिविषयीभूतः १३ निरंतरं. १४ कलानांचतःषष्टिमितानांनिधिं. पक्षे कलानां-षोडशानांनिधिं. १५ गोकुलेव्रजे. पक्षे गोकुलैःकिरणसमूहैःशोभमानं. १६ श्यामा-षोडशवार्षिकी पक्षे श्यामारात्रिः १७ चंद्रं.

ममप्रसादायविधेहिराधे भक्तिपरामात्मनिवेदनाख्यां ॥१०॥
विधिंसमुल्लंघ्यपरांगनासु प्रसंगमंगीकुरुषेकथंनु ॥
विधेर्विधातुर्विधिलंघनेमे कानामभीतिर्भणभामिनीह ॥११॥
उदीर्यमाणेऽपिचमांविवादे मानाऽपनोदोनहिराधिकायाः॥
मानोऽस्तुतेयद्यपराधिकःस्यां स्वमेऽपिनैवाऽस्म्यपराधिकोऽहं॥१२॥
मुक्तिंसमीयुर्भवभीतिभाजो भवत्पदांभोजरजोजुषतः ॥
बद्धस्त्वयाऽहंभुजवल्लरीभ्यां राधेनिकुंजेमधुमाधवीनां ॥ १३ ॥
आभीरनार्याःकरमादधानो नशंकसेमाधवकिंब्रवीषि ॥
पल्लीपतिर्बल्लववल्लभायाः करग्रहेकिंविदधीतशंकां ॥ १४ ॥

अथाश्वधाटीकाव्यं.

श्रो० ॥ अंकादृतक्षितिजमंकाऽनभिज्ञशशिशंकाकराऽऽस्यसुषमं
टंकारिचापमनुलंकाऽऽशरक्षतजपंकाऽवरूषितशरं ॥
स्वंकामदांविहितरंकाऽवनंदनुजकंकालनोदनमना
तंकायवत्सभजतंकालमेघरुगहंकारहारिवपुषं ॥ १ ॥

१ नवविधभक्तिष्वात्मनिवेदनरूपाभक्तिःपुराणप्रसिद्धा. अत्रतुआत्मनिवेदनंस्वदेहार्पणमित्यर्थः २ शास्त्रं ३ ब्रह्मणः ४ कथय. ५ उच्चार्यमाणे. ६ प्रेमपरसभाषण. ७ अभिमानदूरीकरणं, ८ अपराधयुक्तः स्वार्थेकप्रत्ययः ९ अपगताराधिकायस्मात्सः १० मोक्षं. मोचनंच. ११ प्रापुः १२ सेवमानाः

अंकेति. हेवत्सत्वंअनातंकायआतंकोभवरोगस्तन्निवृत्त्यर्थंअंकेआदृताक्षितिजासीतायेनैवंविधंतंरामंभजेत्यन्वयः॥ कीदृशंतं अंकोलांछनंतदनभिज्ञोयःशशीतस्यशंकाकराआस्यसुषमामुखकांतिर्यस्यैवंभूत पुनःकी० टंकारःप्रत्यंचाशब्दस्तद्विशिष्टश्चापोधनुर्यस्यतं. अनुपश्चात्. पु०की०लंकासंबंधिनोयेआशाराराक्षसास्तेषांरक्तकर्दमेनलिप्तःशरोयस्य. पु०की०कामानभक्तमनोरथान्ददातिसःएवंभूत. पु० की०विहितंरंकाणांदीनानामवनंरक्षणंयेनतं. पु० की० दनुजोदुंदुभिनामादानवस्तस्ययःकंकालःअस्थिपंजरस्तंनुदतिक्षिपतीत्येवंभूतं. सुग्रीवायस्वबलंप्रदर्शयितुंवाछितस्यकस्यचिद्दानवस्यास्थिपंजरंरामोवामपादांगुष्ठेनसलीलंचिक्षेपेतिरामायणेप्रसिद्धं. पु० की० नीलमेघस्यकांतिविषयेयोहंकारःमत्सदृशमन्यन्नीलंनास्तीत्येवंरूपस्तंहरतीत्येवंभूतंवपुःशरीरंयस्य अतिनीलवपुषमित्यर्थः ॥ १ ॥

मागामनस्त्वमनुरागाऽतिभूमिमुपभोगानवामुमनसा
माऽऽगारदारसुतयोगानकिंवतवियोगात्मकाःपरिणतौ ॥
यागादिजन्यपरभागाअविग्रहविभागार्हशैलतनयं
वेगादुपास्वभवरोगाऽपहंविधूतनागाऽजिनंपुररिपुं ॥ २ ॥
वाचामरंदमधुमोचासुधामधुरिमाऽऽचामदक्षरसया
हाचापलान्नरपिशाचानुपासितुमनाचारकिंनुयतसे ॥
काचायमाविनटसाचाऽऽपदन्ननसुमोचाग्रिमाकमपितं
माचामुपास्यमभियाचाऽपवर्गसुखमाचार्यमाश्रितवटं ॥ ३ ॥

संप्रतिस्वमनउपदिशति हेमनःत्वंउपभोगान्स्रक्चंदनादिविषयान् अवामुं मामुं अनसारथेन अनुरागातिभूमिपरांकाष्ठांमागाःमागच्छ ननुकिमर्थंमांवारयसी तिचेत्तत्राह मागारदारसुतयोगाः मालक्ष्मीः आगारंगृहं दाराःस्त्री सुताश्च एषांसंयो गाःपरिणामेवियोगात्मकाःनकिं अपितथैव. बतेतिखेदे स्वर्गसुखमपितथैवेत्या ह यागादिनाज्योतिष्टोमादिनाउत्पन्नायेपराउत्कृष्टाभागाःपीयूषाप्सर आदिरूपास्तेपि अवसानेवियोगात्मकाएवेतिपूर्वेणसंबंधः परभागाइतिपाठेस्वर्गादयः तर्हिकिमस्मा भिःकर्तव्यमित्यपेक्षायामाह पुररिपुंशिववेगाच्छीघ्रमुपास्वभज. कीदृशंपु० अविग्र हविभागार्हशैलतनयंविग्रहंणदेहनयोर्विभागोभेदस्तमर्हतीतिविग्रहविभागार्हातथान- भवतीत्येवंविधाशैलतनयायस्यतं. अत्यंतानुरागवशादर्धांगीकृतदारमित्यर्थः पु० की० भवएवरोगस्तमपहंतीतितथाभूत पु०को० विधूतंनागस्यअजिनंचर्मये नतंगजकृत्तिवाससमित्यर्थः ॥ २ ॥

पूर्वश्लोकान्मनइत्यनुमधेय हेअनाचारमनः. अथवा जीवसामान्येनायमुपदे शः. हेअनाचारजीव, त्वंमरंदःपुष्परसः, मधुक्षौद्रं, मोचाकदलीफलं, सुधाअमृतं, एतत्सबधीयोमधुरिमामाधुर्यंतस्याचामभक्षणेदक्षोरसोयस्यास्तयाविधया. तुच्छीकृ तमकरंदादिरसमाधुर्ययेत्यर्थ. एतादृशावाचावाण्या. हाइतिखेदे. चापलान्मौर्ख्या द्धेतोर्नरपिशाचान्नररूपान्पिशाचान् पिशाचतुल्यानधमान्नरानित्यर्थः उपासितुंत न्मनोरंजयितुंकिंनुयतसेकिमर्थंयत्नंकरोषि नन्वापत्परिहारायतथाकरोमीतिचेद्य थाकार्यंचित्द्रव्यादिलाभेनैतादृशान्यापत्परिहारेपिमरणादिपरंपरारूपमहापदोविद्य मानत्वेनतस्याकिंचित्करत्वाद्विफलोयमुद्यमस्तव. उक्तमहापत्परिहारस्तुतेभ्योनरपि शाचेभ्योदुर्घटइत्याक्षिप्यसर्वापत्परिहारोपायमुपदेष्टुमाह. काचायकाचवत्तुच्छंध नादिलब्धुमाविनटनरपिशाचानामग्रेनृत्यमाकुर्वित्यर्थः यतोऽग्रिमाअग्रतःस्थितासा

खंजायितोऽधिमतिगंजापरोपि बतसंजायतेत्र धनदः
संजाघटीतिगुणपुंजायितस्यनतुगुंजामितंचकनकं ॥
किंजाग्रतीजयसिकिंजानतीत्वपिषिंसिंजाननूपुरपदे
तंजापुरंशिनवकंजाक्षिसाधुतदिदंजातुवाकिमुशिवे ॥ ४ ॥
आटीकसेऽगकरिघोटीपदातिजुषवाटीभुविक्षितिभुजां
चेटीभवंस्तदपिशाटीनतेवपुषवीटीनवाऽधिवदनं ॥
कोटीररत्नपरिपाटीभृशाऽरुणितजूटीविधुंतनुलस
त्पाटीरलिप्तमिभघाटीजुषंसुरवधूटीनुतांभजशिवां ॥ ५ ॥

निरतिशयदुःखप्रदत्वेनप्रसिद्धा आपत्मरणादिरूपा आपत्तिः अत्र अस्मिन्नरपिशाचा नुसरणे सति नसुमाचामोचयितुमशक्यमित्यर्थः तर्हिकिंकर्तव्यमित्यपेक्षायामेवंकुर्वि त्याह. कमपि अनिर्वचनीयंप्राचां ब्रह्मादीनामुपास्यं आश्रितवटमाचार्यश्रीदक्षिणामू र्तिमति अपवर्गसुखमभियाचप र्थय. ॥ ३ ॥

अधिमति मतौ खंजायितः खंजवदाचरितः कुंठितमतिर्मूढइत्यर्थः तथैवगंजाप रोपिमदिरागृहासक्तोपिनरः धनदः सजायते कुबेरतुल्यधनवान्भवतीत्यर्थः गुणपुंजा यितस्यगुणनिधेर्नरस्यगुंजामितमपिकनकनसंजाघटीतिनलभ्यतेइत्यर्थः हेशिवेत्वं जाग्रतीसतीकिंजयसि, जानतीत्वस्वपिषिकिं, तदिदपूर्वाधोक्तंसाधुशोभनंकि मुवा सिंजानौशब्दायमानौनूपुरौययोरेवंभूतेपदेचरणेयस्याः तंजापुरंतंजौरइतिप्रसि द्धं कश्चित्तुळजापुरमितिवदति. तस्यस्वामिनी नवीनंयत्कंजकमलंतद्वदक्षिणीय स्याः ॥ ४ ॥

एवंस्वकीयमनसः समाधानंकृत्वान्यमपदिशति आटीकसेइति हेअंगत्वंचेटी भवन्दासः सन्करिघोटीपदातिजुषहस्त्यश्वपदातिसेवितायांक्षितिभुजांराज्ञांवाटी भुविउद्यानभूमौआटीकसेपरिभ्रमणंकरोषि तदपितयानितेनववपुषिशाटीशरीरप रिधानार्थवस्त्रंनास्ति परचअधिवदनंवदनेवीटीतांबूलंनास्ति एवंचव्यर्थभ्रमका रीत्वमतीवमूर्खोऽसीतिभावः तर्हिमयाकिंकार्यमितितत्राह कोटीरोमुकुटस्तस्ययारत्नपरिपाटीमाणिक्यपंक्तिस्तयाभृशमत्यंतमरुणितोरक्तोजूटीविधुःकेशपाशसमीपव र्तीबालचंद्रोयस्यास्तामेवंभूतां तनौलसंतोशोभमानापाटीरलिप्तंचंदनलेपोयस्यास्तां तथाइभोगजस्तस्यघाटीगतिस्तांभजंतीं सुराणांवधूवधूः स्त्रियस्ताभिर्नुतांस्तुतांशिवां पार्वतींभज ॥ ५ ॥

पंडावदग्रिमपिचंडाऽवपूर्तिमनुरंडाविधेयकुटिलो
दंडाविवेकधनिचंडालगेहभुविदंडाऽऽहर्तिकिमयसे ॥
खंडाऽमृतद्युतिशिखंडामुपास्वसुरखंडाऽर्चिताऽङ्घ्रिकमलां
भंडासुरद्रुहमचंडात्मिकांचितिमखंडांजडात्मसुखदां ॥६॥
गाढात्वयासपदिराढापुरीवसुनिधाढाऽवबद्धरतिना
सोढातथातपनगाढाऽऽतपमसररूढाऽनिवृष्टिविततिः ॥
मूढाऽपिकिंफलमगूढाजरैवशिरसोढाकुतोनविनुतो
द्रोढाजनोऽजनितषोढामुखःसमितिवोढासहाटकगिरेः ॥ ७ ॥

पंडेति हे पंडावदग्रिमपंडितश्रेष्ठ. पिचंडस्योदरस्यावपूर्तिर्भरणंतामनुलक्षीकृत्य रंडानांपांसुलानांविधेयावचनग्राहिणआज्ञापालास्तेचतेकुटिलावक्राउद्दंडाउद्धताअविवेकिनोविवेकशून्याएतादृशायेधनिनस्तएव चंडालास्तद्गृहभुविदंडाऽऽहर्तिंदंडप्रहारंकिमयसेप्राप्नोषि उद्धताःपुरुषागृहमागतंयाचकंदंडेनताडयंतीति सर्वेषांविदितमेव तस्मात्हेजडपठनमुखं खंडामृतद्युतिःअर्धचंद्रःशिखंडःशिरोभूषणंयस्यास्तां सुराणांदेवानांखंडःसमूहस्तेनार्चितंपूजितंअंघ्रिकमलपादपद्मंयस्यास्तां अखंडामिति अखंडचिद्रूपिणींअचंडात्मिकां अचंडःअकोपनःआत्मास्वभावोमनोवायस्यास्तां भंडासुरद्रुहंभंडासुरघातिनींअंबांउपास्व. तस्याउपासनांकुर्वित्यर्थः ॥ ६ ॥

गाढेति वसुनिधनेबाढावबद्धरतिना बाढंदृढंअवबद्धारतिःप्रीतिर्येनतादृशेनत्वयाराढापुरीनगरीविशेषःगाढाप्रविष्टा. तथातपनःसूर्यस्तस्यगाढोऽत्युग्रोयआतपप्रसरस्तेनरूढाप्रकर्षेणोद्भूतासाचासावतिवृष्टिस्तस्याविततिर्विस्तारःसोढा त्वयेतिशेषः षट्कर्मप्रसंगे. रंगूढअगूढाव्यक्ताजरैवशिरसाऊढाधृता. एवंकृत्वापिकिंफलंत्वयाप्रंनकिंचिदपीत्यर्थः अतःक्लेशमात्रफलदमुद्यमंत्यक्त्वासमासिद्धःपरमेश्वरस्त्वयाकुतःकारणान्नविनुतोविशेषेणस्तुतः कोसावितिचेत्तत्राह जनितःषोढामुखःषण्मुखोयेन. षडाननस्यपितेतियावत्. जनोजन्मनःभवस्येतियावत्. उपलक्षणमिदंजन्ममृतिमरणादिदुःखसंघस्य द्रोढादोहकृत्नाशकइत्यर्थः समितित्रिपुरवधसंग्रामेहाटकगिरेःस्वर्णपर्वतस्यमेरोरित्यर्थः वोढावहनकर्ता. त्रिपुरासुरवधकालेकधंवकःपृथ्वीरथंब्रह्माणंसारथिमेरुंधनुर्विष्णुंशरंचंद्राकौरथचक्रेकृत्वात्रिपुरंहतवानितिपुराणेषुप्रसिद्धं ॥ ७ ॥

दंतावलाऽश्वभृतिचिंतापरोऽसि बत किं तावता वद फलं
हंताखिलं क्वचन गंता तदेतदथ संतापमंचसि परं ॥
त्वं तात भावय दुरंतारमानवरनंतामसः स्वपि हिमा
संतारकं विनतसंतानकं सपदि तं तावदाश्रय शिवं ॥ ८ ॥
वंदारुलोकततिमंदारपादपममंदायमानकरुणं
वृंदावनोढपशुवृंदाऽवनं प्रणतवृंदारकं चरणयोः ॥
नंदाऽऽदनं कुशलमंदायि तात्विकमपि कंदायितं श्रुतिगिरां
कुंदाभकीर्तिमुचुकुंदार्चितं त्वदिमकुंदाह्वयं स्मर महः ॥ ९ ॥
क्रोधाऽऽकुलो विगतबोधाऽन्वयोऽमदनुगाधाऽनुगो न भव भोः
साधारणी नखलु बाधा भवस्य भुवि गाधा न मोहवसतिः ॥

दंतावलेति हे मदांध त्वं गजाश्वभरणचिंतापरः असि तावता तवेति शेषः किंफल मस्तीति वद कथय. ननु गजाश्वादिभिः काष्ठुरभोगेन मनसः परमाल्हादरूपं फलमिति चेदुक्तोसि इत्याह हंतेति खेदे तदेतत् गजाश्वप्रभृति सर्वं कुत्राऽपि गंता गमिष्यति त्वमौ बलीयासंप्रतीति भावः अथ अनंतरपरं संतापं अंचसि प्राप्नोषि. तस्मात् हे तात रमा लक्ष्मीः दुरंता दुष्परिणामा इति त्वं भावय विचारय परं चानवरतं सततं तामसः स न् तमोगुणाभिनिविष्टः सन् मा स्वपि हिमाशायीथाः अज्ञानाधीनो माभूरित्यर्थः तर्हि विनतसंतानकं भक्तकामकल्पद्रुमं तं शिवं तावन्निश्चयेन सपदि सत्वरं आश्रय आश्रयं कुरुते न तवाखिलं हितं कल्याणं स्यादिति भावः ॥ ८ ॥

अथवा विष्णुभक्तिं कुर्वित्याह वंदारुलोकेति वंदनशीललोकानां या ततिः परंपरा तस्या मंदारपादपः कल्पवृक्षस्तत् अमंदायमानकरुणं अनल्पदयावत् वृंदावने व्रजे ऊढा वृद्धिंगता ये पशवो गोमहिष्यादयस्तेषां वृंदसमूहस्तस्य रक्षकं प्रणतानमा वृंदारकादेवा यस्य तत् नंदन गोपन आदनं सत्कुलं कुशलं कल्याणं ददातीत्येवंशालं श्रुतिगिरा वेदवाणीनां कंदायितं मूलभूतं कुंदपुष्पवदुज्वला कीर्तिर्यस्य तत् मुचुकुंदाभिधेन राज्ञा अर्चितं पूजितं मुकुंदसंज्ञकं मुक्तिदायकं महस्तेजः स्मर स्मृतिपथमानय ॥ ९ ॥

उपदेशांतरमाह क्रोधेति भो पौत्र मदीयं वचनं प्रतिकूलं मत्वा त्वं क्रोधाकुलः क्रोधव्याप्तः विगतः बोधान्वयो ज्ञानानुवृत्तिर्यस्य तथाभूतः सन् असतां दुष्टानामनुरोधे आनुकूल्यं तदनुगच्छतीति तथाविधो माभूः कुतः भवस्य संसृतेर्बाधा पीडा साधारणी सामान्या न खलु भुवि मोहवसतिः मोहस्थानं गाधा उत्तानाऽस्वल्पेत्यर्थः न भवति किं

वेधागुरुश्चपटुमेधाविभुर्नहिनिषेधायकर्मवितते
राधायतात्त्वहृदिराधाविटांऽघ्रियुगमाधारतांव्रजमुदां ॥१०॥
नानाविधेजनुषिकानामसौख्ययुजिरानाकपृष्ठमपिवा
जानासियद्विषयसूनारुचिर्भवसिदूनाऽऽशयोभृशतरं ॥
मानाऽतिगोविहितदानाध्वरादिरिहकीनाशभीतिरहितो
मीनायताक्षमधिगानादरंकलयसूनास्त्रजीवनहरं ॥११॥

च पटुःसमर्थामेधाबुद्धिर्यस्यतथाभूतोवेधा ब्रह्मा चपरं गुरुराचार्यः कर्मविततेःप्राक्तनकर्मविस्ताररूपिणःसुखदुःखदसंसारस्यनिषेधायनाशायविभुःसमर्थोनभवति हीतिनिश्चयेन अतःहेतात. राधाविटोराधिकाजारःश्रीकृष्णस्तस्यांऽघ्रियुगंचरणद्वंद्वंहृदिमनसिआधायध्यात्वामुदांमोक्षसुखानांआधारतांपात्रतांव्रजगच्छेति ॥१०॥

नानाविधेति हेतातेत्यनपंजनीयं नान विधे अनेकप्रकारेनृदेवतिर्यगादिरूपेजनुषिजन्मनिसौख्ययुजिःसौख्ययोगः आनाकपृष्ठंस्वर्गलोकमभिव्याप्यापिकानामास्ति. स्वर्गादीनामपिक्षयिष्णुत्वेननकाप्यस्तीत्यर्थः इहैर्ष्याद्वेषादिजन्यक्लेशवत्स्वर्गादिलोकेष्वपिपुण्यतारतम्येनभोगेषूत्कर्षापकर्षयोःसत्वेनपुण्यपरिक्षयेपतनभयेनचेतोप्यधिकतरक्लेशसत्वादितिभावः एतदहमवकथयामीतिमामन्यस्वकिंनुस्वयमेवाग्रेत्वंज्ञास्यसीत्याह जानासीति यत्तुयदात्वंविषयमनोरुचिःविषयेषुनत्पूर्तयेसूनायायागीयायारागप्राप्तायावारुचिरभिलाषोयस्यैवंविधं भवसितदाभृशतरमत्यंतदूनाशयःक्लेशादिबाहुल्येनापन्नमानःकरणःसन्जानासि मयाबोधितमिहामुत्रसुखाभावंज्ञास्यसीत्यर्थः उभयत्रवर्तमानसामीप्येवर्तमानवद्वेतिलट् तस्मादुभयत्रनिरवधिसुखकामनाचेदेवंकुर्वित्याह मानातिगइति मानंप्रमाणमत्यगच्छतीतिमानातिगः एतावंतएवदानयागादयोमयाकर्तव्याइत्येवमियत्तांविहायेत्यर्थः विहितदानाध्वरादिःकृतदानयजनादिः अतएवकीनाशभीतिरहितोयमभयरहितःसन्मीनायताक्षंमत्स्यसदृशदीर्घनयनं अधिगानादरंअधिअधिकोगानविषयेआदरोयस्यतंगानप्रियमित्यर्थः सूनास्त्रःकुसुमायुधःकामस्तस्यजीवनंहरतीतितथाविधस्तंस्मरहरंसदाशिवमित्यर्थः भजसेवस्व इहदानयजनादिजन्यपुण्यबलाद्यमभयनिवृत्त्याचित्तस्वास्थ्येनाक्षय्यानंदरूपतावाप्तयेविषयविरक्तिपूर्वकंस्मरहरमेवसंवस्वेतिभावः ॥११॥

सापायमेष्यवपुरापातरम्यमनुतापादतेसकुतुकं
द्वीपानगाहिषिसमीपाऽनिगानकृतभीपातखेदगणनः ॥
भूपानसेविषिसुरूपाकृतेऽहहनतूपागमंसुखलवं
गोपायमांसपदिगोपालधुर्यतवकोपायनाऽस्मिविषयः॥१२॥
किंबालनस्फुरतिसंबाधकंभृशविडंबाऽऽस्पदंपरिणतौ
निबादितिक्करससंबाधमत्रननुबिंबाऽधराविलसितं ॥
लंबाऽलकांधुतविलंबादरांघुसृणजंबालजालविलस
द्विंबामनूनशशिबिंबाऽऽननांमततमंबामुपास्वसदयां ॥१३॥
रंभादिगाढपरिरंभाऽऽदरेणसुचिरंभावतोऽत्रयजसे
त्वंभावयस्वकिमुशंभाव्यनेनजडसंभावितक्षयमिदं ॥

सापायेति सापायंनाशयुक्तं आपातरम्येपतनंमर्यादाकृत्यरमणीयं पतनेसत्य लीबानद्यःदृशंवपुःशरीरंत्वयमत्यनकृतःभियःभयस्यपातस्यचखेदानांगणनायेनतादृशोहंसमीपानिगान् दूरानित्यर्थः द्वीपान्देशविशेषानगाहिषिधनेच्छयाप्रोषितवानस्मि हेसुरूपाकृतेभूपानसंविपिसेवितवानस्मि एवंकृत्वापिसुखलवंसुखलेशंननु उपागमंनप्राप्तवानस्मि अतोहेगोपालधुर्यश्रीकृष्णसपदिमांगोपायपालयेत्यर्थः तवकोपायाहंविषये नास्मि मयिपरिकोपंमाकुर्वित्यर्थः ॥ १२॥

किमिति हे बालमूढअत्रा...मनुलेके बिंबाधराविलसितं बिंबंपक्वतुंडिकेरीफलंतद्वद्रक्तोऽधरोयास्यांतासाविलासतंविलासः संबाधकअत्यंतंबाधकं तथाभृशविडंबास्पदंअत्यंतंवतारणात्मकं तथापरिणतोपरिपाकावस्थायानिभादितिक्करससंबाधं निगादितिक्तरसेनव्याप्तंईदृशंनस्फुरतिकिं अपितुभासतएवेत्यर्थः अतस्तदनुरागंपरित्यज्यअंबाप्रार्थितांजगन्मातरमित्यर्थः उपास्वभज कीदृशीं-लंबालकांदीर्घकेशीं पु० की० धुतविलंबादरांधुतस्तिरस्कृतोविलंबोभक्तरक्षणविषयस्तस्मिन्आदरोययातां पु०की० घुसृणकुंकुमस्यपज्जंबालजालंपंकजालतद्विलसद्बिंबंसत्सदृशओष्ठोयस्यास्तांमारक्तोष्ठामित्यर्थः पुनःकी० अनूनशशिबिंबाननांपूर्णचंद्रमंडलमुखीं तथासदयां ॥ १३ ॥

रंभदीति रंभादीनांस्वर्वेश्यानां गाढपरिरंभोगाढालिंगनंतस्यआदरेणलोलुपतयासुचिरंबहुकालंभावतःश्रद्धयाअत्रइहलोकेयजसेज्योतिष्टोमादीन्करोषि अनेनक्रतुयजनेनशंसुखंकिंभाविभविष्यतिइतित्वंभावयस्वविचारंकुरु रेजडमूर्खेइदंयागार्जितंस्वर्गसुखंसंभावितक्षयंअवश्यंक्षयशीलं तस्मात्अदंभाकुलःदंभोगर्वःसोम

स्तंभादुदित्वरमहंभावतःकलयजंभारिसंस्तुतपदं
तंभावुकमदमदंभाकुलीनखरसंभारदारितरिपुं ॥ १४ ॥
रामाऽर्चिताऽङ्घ्रिरभिरामाऽऽकृतिःकृतविरामासुपर्वविपदां
कामाऽतिहृत्सफलकामानिदेशरतकामादिनिर्जरवधूः॥
भामाहरस्यनुतभामाजपासदृशभामाननीयचरिता
सामामवत्वखिलसामादृतस्तुतिरसामान्यमुक्तिसुखदा॥१५॥
मायातवेयमुरुगायाऽविवेकनिधिमायामिनीकिमपिमा
मायासयत्यकृतजायातनूजधनकायादिदोषकलनं ॥
सायातनातुनिरपायामताजगतिहायामिकंनुशरणं
मायानिवासपरिपायानवांबुधरदायाददेहभगवन् ॥ १६ ॥

याज्यहमितितेन आकुलोऽव्यामोनभवतीतितथाभूतःसन् अहंभावतःसोऽहंभावेनतदाकारवृत्त्येतिभावः स्तंभान्उदित्वरंप्रादुर्भूतंनृसिंहमित्यर्थः तंकलयचिंतयतस्यध्यानं कुर्वितियावत् कीदृशं जंभारिसंस्तुतपदं जंभारिणाइंद्रेणसंस्तुतंपदंयस्य.पु० की० भावुकमदं क्षेमदातारं, पु० की० नखरसंभारदारितरिपुंनखरसंभारेणनखसमूहेनदारितःविदारितःरिपुःहिरण्यकशिपुर्येनेवंभूतं ॥ १४ ॥

रामेति रामार्चिताङ्घ्रिःरामवंदितपदा अभिरामामनोहराआकृतिर्यस्याः सुपर्वविपदांदित्यकृतदेवविपत्तीनांकृतविरामा विरामोनाशः कामातिहृत्कामपीडानाशिका सफलकामाअवंध्यमनोरथा निदेशःआज्ञातस्मिन्रतास्तत्पराःकामादिनिर्जराणांवध्वोरत्यादयोयस्याःसा हरस्यशिवस्यभामास्त्री नुतःभामःक्रोधःअसुरवधकालोत्पन्नोयस्याःसा अतएवजपासदृशाभाकांतिर्यस्या अरुणेत्यर्थः माननीयंपूजनीयंचरितंयस्याःसाईदृशीसाप्रसिद्धादेवी भवानीत्यर्थः माअवतुरक्षतु शेषंस्पष्टं ॥१५॥

मायेति हेउरुगायपुरुष्टुतआयामिनीविस्तारवतीतवेयंमाया अविद्याअविवेकनिधिअतएवाकृतंनकृतंजायाभार्यातनूजःपुत्रःधनंस्वर्णादिकायोदेहःएषांदोषकलनं दोषचिंतनंयेनतंतथाविधंमांकिमपिअनिर्वाच्यंयथास्यात्तथाआयासयतिखिन्नंकरोति कीदृशोऽसावायासइत्याह साप्रसिद्धायातनामरणकालजन्यातुनिरपायादुश्चिकित्स्यासर्वैर्मता हाइतिखेदे जगतिमरणधर्मविशिष्टेकंनुशरणंयामि सर्वेपिमत्समामरणधर्माणोनकोपिशरण्यइतिभावः अतोहेमायानिवास नवांबुधरोनूतनमेघःतद्दायादोबांधवस्तत्सदृशइत्यर्थः देहोयस्यहेभगवन्षड्गुणैश्वर्यसंपन्नपरिपायास्त्वंमांपाहीतिभावः ॥१६॥

हारंवदासिकुचभारंजिघृक्षसिचसारंगचंचलदृशः
सारंतुमिच्छतिहिजारंनिषेव्यतवकारंजनेहघटतां ॥
स्मारंविहायमदमारंभरम्यमनुवारंभजश्रुतिगिरां
सारंमहेशमविकारंजनुर्विलयपारंप्रयास्यसिसखे ॥ १७ ॥
नीलाऽलकानयनलीलाविमोहमयकीलालराशिजठरे
वेलातिलघमनुवेलावमज्जिरिहनेलाघवायनहिकिं ॥
कालाभएषइतिकोलायितोजयसिहालासमस्थितवयः
कालाऽहितंशमितहालाहलंसततमालानयाऽऽत्ममनसा ॥१८॥
दावाऽनलार्चिरिवतावानयंतपतिहावाम्यकृत्कलिरहो
कावाऽपरस्त्वादिहभोवासुदेवममयावारयेततमिमं ॥

हारमिति हेसखेत्वंसारंगचंचलदृशःकुरंगाक्ष्याःकुचभारंजिघृक्षसिग्रहीतुमिच्छसि अनएननस्यैहारंमुक्ताहारंददामि सात्वहं नमुक्ताहारविलसत्कुचकुंभाजारंनिषेव्यअत्यंतंप्रसाद्यरंतुमिच्छति हिइतिनिश्चये मद्वाक्यंमासंशयंकुर्वित्यर्थः इहईदृशे कपटव्यवहारेतवकारंजनाघटतां नेवत्यर्थः तर्हिकिंकरोमीतिचेदेवंकुर्याः आरंभरम्यंप्रारंभकालेरमणीय परिणामेत्वतीवगर्ह्यमित्यर्थः स्मारंस्मरसंबंधिनंमदंविहाय श्रुतिगिरांवेदवाक्यानांसार अविकारंविकृतिरहितं कालत्रयाबाध्यमित्यर्थः महेशमनुवारंभज किंतेनस्यादितिचेच्छृणु जनुर्विलययोर्जन्ममरणयोःपारंमोक्षंप्रयास्यसिगमिष्यसि ॥ १७ ॥

नीलालकेति नीलालकायानीलकुंतलायानयनलीलाकटाक्षविसर्पणंसएवमोहस्तन्मयोयःकीलालराशिःसमुद्रःसंभोगशृंगाररसस्तस्यजठरेमध्येवेलीतिलंघंअतिकालअनुवेलंवारंवारंअवमज्जिःप्रतिक्षणमवमज्जननेनवलाघवायलघुत्वायनहिकिंअपितुसर्वथैवलघुत्वजनिकास्यात् कएषलाभोनकोपीत्यर्थः अमुमेवलाभंमन्यसेचेत्तत्राहहेहालासमस्थितवयः हालासमंमदिरासमस्थितंवयस्तारुण्यरूपंयस्य यथाहालामादयतिज्ञानावरणंचकरोतितथातारुण्यमपि कोलायितःसूकरवदाचरितोजयसिनृपशुरूपेणोत्कर्षमावहसीतिभावः तर्ह्येवंकुर्वित्याह शमितंहालाहलंविषंयेनतंकालस्यमृत्योरहितंद्वेष्टारं मृत्युंजयमितियावत् सततंआत्ममनसाआलानयबधानसेवनेनमृत्युंजयंवशीकुर्वित्यर्थः ॥ १८ ॥

दावानलेति तावानतावत्परिमाणः वाम्यंकौटिल्यंकरोतीतिवाम्यकृत्अयंकलिःदावानलार्चिरिवदावाग्निज्वालेवनपतिसंतापयति हाइतिखेदे अहोइत्याश्चर्ये भोवासुदेवइहामुष्मिन्लोकेत्वदपरःत्वत्तोन्यस्तमिममकलिकोवारयेतनकोपीत्यर्थः

सेवाविधानभृशहेवाकसिद्धमुनिदेवाऽधुनाचरणयो
र्भावाऽऽननायशिशुभावाऽऽश्रितायवितराऽऽवासतांनिजमुदां १९
आशाभरेणनिखिलाऽऽशासुधावनमथाऽऽशातकुंभगिरिवा
क्लेशाऽऽवहंविविधदेशाऽटनंद्रविणलेशायनाऽपिववृते ॥
आशाऽनिदामवितुमाशास्वपाणिधृतपाशामनेकजगता
मीशामुपासितगिरीशामिहांऽगदिगधीशाऽर्चिताऽघ्रिनलिनां॥२०
एषाजराशिरसिवेषाऽन्यभावकृदशेषाऽऽमयैकवसति
स्तोषायसौम्यनहिदोषाऽऽलयामृशमपोषाऽऽस्पदीकृतगुणा ॥
शेषाऽऽयुषःकुरुविशेषाऽर्हमेतदिहशेषाऽहिकॢप्तधनुषो
रोषाद्यपास्यतनुशोषावहंकलययोषामनंगजयिनः ॥ २१ ॥

त्वयातुनंदव्रजेवत्सागोपाश्चदावानलाद्रक्षिताइतिश्रीमद्भागवतेप्रसिद्धमेवतस्मात् सेवाविधानेसेवाकरणेभृशंहेवाका.स्पर्धायुक्ताएवंभूताःसिद्धाःनारदादयोदेवयोनिविशेषावामुनयःकपिलादय.देवाइंद्रादयःयस्मिंस्तथाभूतहेभगवन्चरणयोर्भवत्पदयोर्भावेनशुद्धांत.करणेनआननायनम्रायशिशुभावाश्रितायमह्यंमितिशेषःनिजमुदांस्वस्वरूपानंदानांआवासतावितरदेहीत्यर्थः ॥ १९ ॥

आशाभरेणेति आशाभरेणद्रव्यालिप्साभरेण आशातकुंभगिरिस्वर्णपर्वतमभिव्याप्यमेरुगिरिपर्यंतमित्यर्थः निखिलाशासुसर्वासुदिक्षुधावनमटनंतथाचविविधदेशानामटनंक्लेशावहंक्लेशमात्रफलकजातमितिशेषः तद्भ्रमणंद्रविणलेशायापिनववृतेनाभूत् अतोहेतोःहेअंगइहलोकेआशानिदांआशामतिक्रम्ययाददातिभगवतीतामाशास्वउपास्वेतिभावः कुतःअवितुंदारिद्र्यादिदुःखात्त्रातुंआत्मानंरक्षितुमित्यर्थःआन्यत्स्पष्टं ॥ २० ॥

एषेति हेसौम्यवेषान्यभावकृत् वेषस्यकृष्णकेशत्वादिरूपस्यअन्यभावोवैपरीत्यंवलीपलितत्वादिरूपंकरोतीतितथा चपरं, अशेषामयैकवसतिःसर्वरोगाणामुख्यस्थानं, अतएवदोषालयाअनेकदोषस्थानभूता तथाभृशमधिकं अपोषास्पदीकृताःगुणाःविद्याभ्यासादयोययाएवंभूताएषाजराशिरसिआगतातोषायनहिसंतोषंजनयितुंनप्रभवतीत्यर्थः तस्मात् तनुशोषावहंशरीरशोषकारिरोषाद्यपास्यक्रोधादीन्हित्वाशेषायुषःअवशिष्टस्यायुषःविशेषार्हंविशेषयोग्यमेतत्कुरु किंतदित्याह इहास्मिन्संसारे शेषाहिकॢप्तधनुषः शेषाख्यपन्नगेनकॢप्तंधनुर्येनतथाभूतस्यानंगजयिनः कामजेतुः शिवस्येत्यर्थः योषांस्त्रियंभवानींकलयआश्रयेत्यर्थः ॥ २१ ॥

संसारधन्वभुवि किंसारमाशृणासि शंसाऽधुनाशुभमते
त्वंसाधुसंतनु हितंसाहसेनतु नृशंसाऽऽदृतेन किमहो ॥
हंसाऽऽशयस्थमतिहंसात्मभासमथ तंसामभिः परिगृणन्
कंसारिवंद्यमवतंसायितेंदुमिह संसाधयाऽर्थमखिलं ॥ २२ ॥
गेहाऽऽत्मजद्रविणदेहादिकंजनितमोहाऽनुबंधमवितुं
भोहानिरापि कियतीहाऽपि सुस्थितिमतीहाननेनिजहिते ॥
वाहायितोक्षभवदाहाऽपहंसलिलवाहाऽभकंठसुषमं
बाहालसन्मृगमनाहार्यसौख्यकरमाहात्म्यमाभजमहः ॥२३ ॥

संसारेति संसारधन्वभुवितापादिजनकत्वान्मरुभूमितुल्येसंसारेकिंसारंआमृशसिजानासिनकिमपीत्यर्थः जानासिचेदिदंतावदत्रसारमितिशंसकथय हेशुभमतेअधुनात्वंसाधुहितंसंतनु. आत्महितंकुर्विति भावः नृशंसादृतेनघातुकपुरुषैःस्वीकृतेनसाहसेनपरधनपरस्त्रीहरणप्राणिवधादिकेन अहोकष्टंकिंस्यात् नकिंचित्कल्याणंस्यादित्यर्थः तस्मात्हंसाशयस्थंयोगिहृदयस्थं अतिहंसात्मभासंसूर्यमतिक्रांताआत्मभाःस्वकांतिर्यस्यतं. सूर्यातिशायितेजसमित्यर्थः कंसारिवंद्यंविष्णुपूज्यं अवतंसायितेंदुंचंद्रशेखरंभगवतंसामभिःप्रमगीतैःसामवेदस्थैर्मंत्रैर्वागृणन् कीर्तयन्अखिलमर्थंचतुर्विधपुरुषार्थरूपंसंसाधयसंपादय ॥ २२ ॥

गेहेति जनितःउत्पादितःमोहानुबधःअज्ञानसंबंधोयेनतादृशंगेहात्मजद्रविणदेहादिकं गेहंगृहं, आत्मजःपुत्र,: द्रविणंद्रव्यं, तद्देहादिकंअवितुंरक्षितुंभोःइहापि अस्मिन्लोकेकियतीकिंपरिमाणाहानिःअनेकदुःखसहनरूपास्वार्थोन्मूलनरूपाच आपिमामानयापितनवनिजहितस्वहितेसुस्थितिमतीयातायातनिवृत्तिविषयिणी ईहाइच्छानभवतिइतिशेषः स्वहितंतुईश्वरभजनंविनानभविष्यतीत्यतस्तदेवकुर्वित्याह वाहायितोक्षवाहनीकृतबलीवर्दं भवदाहापहंसंसारतापनाशकं तथासलिलवाहोमेघस्तस्येवाभाकांतिर्यस्यास्तयाविधाकंठसुषमाकंठशोभायस्यतत् बाहायांहस्तेलसन्मृगोयस्यतत्. अनाहार्यंत्रिकालाबाध्यंमोक्षाख्यंसुखंतस्यकरंतत्यकं माहात्म्यंयस्यतथाभूतंनीलकंठाख्यंमहस्तेजोभज ॥२३ ॥

वालीयुतश्रवणपालीयुगालळितचूलीविराजिबकुला
केलीगतानुगमरालीकुलामधुरमालीभिराहतकथा ॥
नालीकदकुसुमनालीकपाणिरिहकालीयशासिसहजा
तालीदलाभतनुमालीसदाभवतुकालीशुभायममसा ॥ २४ ॥
दक्षाऽध्वरमशमदक्षाऽऽग्रहंविबुधपक्षाऽभिपालनपरं
लक्षाऽमृतद्युतिवलक्षात्मकंन्दतविपक्षाऽऽत्तविस्मयकथं ॥
उक्षाऽधिरोहिहतलक्षाऽसुरमकरमक्षामताश्रयदय
स्यक्षाऽऽह्वयंप्रणतरक्षामणिप्रणयियक्षाऽधिपंस्मरमहः ॥ २५ ॥

वालीति साकालीममशुभायभवतु कीदृशीसा-वालीयुतश्रवणपालीयुगा वा-लीकेशगुच्छः अथवाबवयोःसावर्ण्यात्बालीकर्णभूषणविशेषःतयायुतश्रवणपालीयु-गंयस्याःसा. पु० की० ललितारम्यायाचूलीकर्णमूलंतस्यांविराजमानबकुलपुष्पं यस्याःसा. तथाकेल्याक्रीडयायत्गतंगमनंतदनुगंतदनुगामिमरालीकुलंहंसीसंघोय स्याः. यद्गतिसदृशगतिशालीहंसीसमूहःसेत्यर्थः तथाआलीभिःसखीभिर्मधुरंयथा स्यात्तथाआदृताकथायस्याः अलीकाअनृतान अलीकानालीकासफलेत्यर्थः तादृ शीदृक्यस्याःसा अमोघदर्शनेत्यर्थः कुसुमसहितंनालीकंइतरपुष्पसहितंकमलंपा णौयस्याः तथाकालीयःयमुनाह्रदस्थःकृष्णसर्पस्तंशास्तीतिकालीयशासीकृष्णस्त त्सहजातद्भगिनी यशोदोदरेदुर्गाप्रादुर्भावस्यभागवतेप्रसिद्धत्वात् तथातालीदलस्ये वाभायस्याएतादृशीयातनुस्तयामालतेसाश्यामवर्णेत्यर्थः ॥ २४ ॥

दक्षेति हेवत्सऽयक्षाऽऽह्वयंत्रिलोचनाख्यंमहःशिवाख्यंतेजःस्मरार्चितय की दृशंतत्-दक्षयज्ञध्वंसनेदक्षःपटुःआग्रहोयस्य. पु० की० विबुधानांदेवानांविदुषांवा पक्षस्तत्पालनपरं देवपक्षपातीत्यर्थः पु० की० लक्षसंख्याकायेअमृतद्युतयश्चंद्रा स्तेषामिवबलक्षोधवलआत्मादेहोयस्य पु० की० न्दताःपराजितायेविपक्षाःशत्रव स्त्रिपुरादयस्तैःआत्तःप्राप्तःविस्मयःआश्चर्यंयस्यांतयाविधाकथायस्य पु० की० उक्षाधिरोहिनंदिकेश्वराधिरूढं पु०की० हतोलक्षसंख्याकानामसुराणांप्रकरःसमू होयेन पु०की० अक्षामतांपुष्टिंआश्रयतीत्यक्षामताश्रयाविपुलेतियावत्एतादृशीद या यस्य पु०की० प्रणतानांनम्राणांभक्तानांरक्षामणिपालकमित्यर्थः पु०की० प्रण यीप्रणयसंपन्नोमित्रमितियावत्एवंभूतोयक्षाधिपःकुबेरोयस्यतत्तादृशं ॥ २५ ॥

रामनाम्नःस्वपौत्रस्य कामनापूरणोत्सुकः ॥
अश्वधाटींजगन्नाथो विश्वस्त्दथामरीरचत् ॥ २६ ॥
इतिपंडितेंद्रजगन्नाथविरचितमश्वधाटीकाव्यं संपूर्ण ॥

अथनवरसाः

तत्रादौशृंगारः

अथबालायाः सामान्यतःस्तुतिः

श्री ॥ दृशादग्धंमनसिजं जीवयंतिदृशैवयाः ॥
विरूपाक्षस्यजयिनी स्ताःस्तुवेवामलोचनाः ॥ १ ॥
एकांतमुंदर्गविधानजडःकवेर्धाः सर्वांगकांतिरुचिरंकचरूपमस्याः॥
मन्येमहेश्वरभयान्मकरध्वजेन माणार्थिनायुवतिरूपमिदंगृहीतं॥२॥
अमृतस्येवकुंडानिरत्नानामिवराशयः ॥
रतेरिवनिधानानि योषितःकेननिर्मिताः ॥ ३ ॥
अस्याःसर्गविधौमजापतिरभूच्चंद्रोनुकांतिमदः
शृंगारैकरसःस्वयंनुमदनोमासोनुपुष्पाऽऽकरः ॥
वेदाऽभ्यासजडःकथंनुविषयव्यावृत्तकौतूहलो
निर्मातुंमभवेन्मनोहरमिदंरूपंपुराणोमुनिः ॥ ४ ॥
नदेवकन्यकानाऽपि गंधर्वकुलसंभवा ॥
तथाऽप्येषातपोभंगं विधातुंवेधसोऽप्यलं ॥ ५ ॥
भ्रूचातुर्याऽऽकुंचिताक्षाःकटाक्षाः स्निग्धावाचोलज्जिताश्चैवहासाः ॥
लीलामंदंमस्थितंचस्थितंच स्त्रीणामेतद्भूषणंचाऽऽयुधंच ॥ ६ ॥

रामेति ॥ रमयतीतिरामःविद्याविनयादिगुणैःसर्वेषांमनोरमइत्यन्वर्थेरामइतिनामयस्यतस्यस्वपुत्रपुत्रस्यकामनापूरणोत्सुकोमनोरथपूरणोत्कंठितोजगन्नाथाभिधःपंडितोविश्वस्त्दथापंडितरंजनींअश्वधाटींअरीरचत्रचयामास ॥२६॥
गुणरत्नर्षिभूयुक्तेमजापतिसमाव्हये शाकेधिमासेभाद्राख्येगोष्पतौमतिपत्तिथौ
अश्वधाटचादर्पणाख्याव्याख्याकृष्णेननिर्मिता ॥

---

१ कामं २ उत्पादयंति. ३शिवस्य. ४मत्वा. ५स्त्रीरूपं. ६ उत्पत्तिविधाने. ७ जीर्णः

अधरेमधुरासरस्वती ननुकर्णेमणिकर्णिकामवाहः ॥
शिरसिमतिभातिचारुवेणी कथमेणीनयनानतीर्थराजः ॥ ७ ॥
बाहूद्वौचमृणालमास्यकमलंलावण्यलीलाजलं
श्रोणीतीर्थशिलाचनेत्रशफरीधम्मिल्लशैवालकं ॥
कांतायास्तनचक्रवाकयुगलंकंदर्पबाणाऽनलै
र्दग्धानामवगाहनार्थविधिनारम्यंसरोनिर्मितं ॥ ८ ॥
स्मितेनभावेनचलज्जयाभियां पराङ्मुखैरर्धकटाक्षवीक्षणैः॥
वचोभिरीर्ष्याकलहेनलीलया समस्तभावैःखलुबंधनंस्त्रियः ॥ ९ ॥
लीलावतीनांसहजाविलासा स्तएवमूढस्यहृदिस्फुरंति ॥
रागोनलिन्याहिनिसर्गसिद्ध स्तत्रभ्रमत्येवमुधाषडंघ्रिः ॥१०॥
कुंकुमपंकेनांऽकितदेहा गौरपयोधरकंपितहारा ॥
नूपुरहंसरणत्पदपद्मा कंनवशीकुरुतेभुविरामा ॥ ११ ॥
द्रष्टव्येषुकिमुत्तममृगदृशःप्रेमप्रसन्नंमुखं
घ्रातव्येष्वपिकिंतदास्यपवनःश्राव्येषुकिंतद्वचः ॥
किंस्वाद्येषुतदोष्ठपल्लवरसःस्पृश्येषुकिंतत्तनु
र्ध्येयंकिंनवयौवनंसहृदयैःसर्वत्रतद्विभ्रमः ॥ १२ ॥
इयमुत्तनोमस्तकन्यस्तकुंभा कुसुंभारुणंचारुवासोवसाना ॥
समस्तस्यलोकस्यचेतःप्रवृत्तिं गृहीत्वाघटेन्यस्ययातीवभाति ॥१५॥
नेदमुखंमृगवियुक्तशशांकाबिंबं नेमौस्तनावमृतपूरितहेमकुंभौ ॥
नैवालकावलिरियंमदनास्त्रशाला नेवंदृशाक्षियुगलंनिगडंहियूनां॥१६
वक्त्रंचंद्रविकासिपंकजपरीहासक्षमेलोचने
वर्णःस्वर्णमपाकरिष्णुरलिनीजिष्णुःकचानांचयः ॥
वक्षोजाविभकुंभविभ्रमहरौगुर्वीनितंबस्थली
वाचांहारिचमार्दवंयुवतिषुस्वाभाविकंमंडनं ॥ १७ ॥
गुरुणास्तनभारेण मुखचंद्रेणभास्वता ॥
शनैश्चराभ्यांपादाभ्यां रेजेग्रहमयीवसा ॥ १८ ॥

---

१ हरिणलोचना. २ बिसं. ३ मत्स्यी. ४ भयेन. ५ प्रणयप्रकोपेन. ६ स्वभावसिद्धः ७ व्यर्थं. ८भ्रमरः ९ वस्त्रं. १० मनोवृत्ति ११ शृंखला (बेडीतिलोके) १२ तुच्छंकुर्वन् १३ जयशीलः १४ मनोहर.

मुखेनचंद्रकांतिन महानीलैःशिरोरुहैः ॥
पाणिभ्यांपद्मरागाभ्यां रेजेरत्नमयीवसा ॥ १९ ॥
नूनंहितेकविवराविपरीतबोधा
येनित्यमाहुरबलाइतिकामिनीस्ताः ॥
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोऽपिविजितास्त्वबलाःकथंताः ॥ २० ॥
सौधेस्थितामरभसंनिजमुत्तरीयं धर्तुंपुनस्तनतटात्पतितंप्रवृत्ता ॥
वाचंनिशम्यनयनंनयनंममेति किंचित्तदैवमकरोत्स्मितमायताक्षी ॥२१॥
इदंपरमसुंदरंतनुपुरःकुरंगीदृशां
निवार्यरवलुशैशवंत्वयमनेननीतंबलात् ॥
तदागमनशंकयामकरकेतुनांकितं
पयोधरधराधरैस्त्रिवलिवाहिनीदुस्तरा ॥ २२ ॥
इयंसुरतरंगिणीनपुनरत्रनौसंगमो
भवेत्तरणिमज्जनंपथिकनैवपांथाऽऽगमः ॥
निधायत्द्दयेसदाविपुलचारुकुंभद्वयं
सखेघनघनाऽऽगमेधनरसस्यपारंव्रज ॥ २३ ॥
मीनवतीनयनाभ्यां चरणाभ्यांमफुल्लकमलवती ॥
शैवालिनीचकेशैः सुरभेयंसुंदरीसरसी ॥ २४ ॥
अस्याश्चेद्गतिसौकमार्यमधुनाहंसस्यगर्वैरलं
संलापोयदिधार्यतांपरभृतैर्वाचंयमत्वव्रतं ॥
अंगानामकठोरतायदिदृषत्प्रायेवसामालती
कांतिश्चेत्कमलाकिमत्रबहुनाकाषायमालंब्यतां ॥ २५ ॥
अपांगतरलेदृशौतरलवक्रवर्णागिरो
विलासभरमंथरागतिरतीवकांतमुखं ॥
इतिस्फुरितमंगकेमृगदृशांस्वतोलीलया
तदत्रनमदोदयःकृतपदोऽपिसंलक्ष्यते ॥ २६ ॥
निर्मित्सुःसुदतीमजोविरचितेवक्त्रेशशिभ्रांततः

१ सुरतातरंगिणीनद्यित्यर्थः २ उदकस्य, ३ मिथोभाषणं ४ पाषाणरूपा, ५ काषायवस्त्रं. ६ नेत्रप्रांतचंचले, ७ विलासभरेणमंथरामंदागतिः ८ निर्मातुमिच्छुः ९ब्रह्मा,

कोशीभूतनिजाऽबुजासनमपिधातुंनशक्तोविधिः ॥
मध्यंविस्तृतवान्कुचौचकठिनौपीनौनितंबौकथान्
वक्रान्निर्मितवान्मतिःस्फुरतिहिस्वस्थेनृणांचेतसि ॥ २७ ॥
अधरेनववीटिकाऽनुरागो नयनेकज्जलमुज्ज्वलंदुकूलं ॥
इदमाभरणंनितंबिनीना मितरद्भूषणमंगदूषणाय ॥ २८ ॥
आस्यंसहास्यंनयनंसलास्यं सिंदूरबिंदूदयशोभिभालं ॥
नवाचवेणीहरिणीदृशश्चे दन्यैरगण्यैरपिभूषणैःकिं ॥ २९ ॥

अथबालावयववर्णनं

केशवर्णनं

चिकुरप्रकराजयंतितेविदुषीमूर्धनियान्बिभर्तिसा ॥
पशुनाऽप्यपुरस्कृतेनत तुलनामिच्छतिचामरेणकः ॥ १ ॥
एणीदृशःपाणिपुटेनिरुद्धा वेणीविरेजेशयनोत्थितायाः ॥
सरोजकोशादिवनिष्पतंती श्रेणीघनीभूयमधुव्रतानां ॥ २ ॥
अस्यामनोहराऽऽकार कबरीभारनिर्जिताः ॥
लज्जयेववनेवासं चक्रुश्चमरबर्हिणः ॥ ३ ॥
मलिनाअपिसंयमना त्कुटिलाअपिसुमनसांसमागमतः ॥
बालाअपिमुक्तानामनुषंगान्निर्जरत्वमुपयांति ॥ ४ ॥
स्तनाऽऽभोगेपतन्भाति कपोलात्कुटिलोऽलकः ॥
शशांकबिंबतोमेरौ लंबमानइवोरगः ॥ ५ ॥

सीमंतरचनं

जानुस्थापितदर्पणंपरिणमद्ग्रीवंसमुद्यद्भुजं
न्यंचत्कूर्परमुन्नमद्भुजलसत्कक्षांतरोद्यत्कुचं ॥

---

१ मुकुलीभूतस्वकीयकमलासनं. २ स्वच्छं ३ हासपूर्वकंमुखं. ४ केशकलापाः ५ पश्चात्कृतेन. ६ कमलकुड्मलात् ७ पंक्तिः ८ भ्रमराणां. ९ बंधनात्इंद्रियनिग्रहाच. १० पुष्पाणां देवानांच. ११ केशाःअर्भकाश्च. १२ मौक्तिकानां पक्षेजीवन्मुक्तानां. १३ जरारहितत्वं पक्षेदेवत्वं. १४ केशवेशः (भांगइतिलो०)

पाणिभ्यांमविभज्यकेशनिचयंसीमंतकर्मोद्यता
चेतःकस्यवशीकरोतिनवरणद्बालाविलोलेक्षणा ॥ १ ॥
केशान्वामकराऽवलंबितशिखानभूयोरणत्कंकणं
व्याधूयाऽथकनिष्ठिकानखमुखेनाऽऽकुंचिताऽन्यांगुलि ॥
सीमंतंविरचय्यतस्यकरभेणोन्मृज्यपार्श्वद्वयं
तानूपश्चाद्युगपत्मणीयकरयोर्युग्मेनबध्नात्यसौ ॥ २ ॥
आभुग्नांऽगुलिपल्लवौकचभरेव्यापारयंतीकरौ
बंधोत्कर्षनिबध्यमानसतयाशून्यांदधानादृशं ॥
बाहूत्क्षेपसमुन्नतेकुचतटेपर्यस्तचोलांऽशुका
न्हीसंकोचितबाहुमूलसुभगंबध्नातिजूटीवधूः ॥ ३ ॥
यथायथायोवलतेभुजोऽस्या उदंचितःसंयमनेकचानां ॥
तथातथावल्गतिकाममंकः सएववक्षोरुहउत्पलाक्ष्याः ॥ ४ ॥
स्नेहसंवर्धितानबालान् दृढंबध्नातिसुंदरी ॥
करुणाहरिणाक्षीणां कुतःकठिनचेतसां ॥ ५ ॥
संभ्रामश्चिकुरभावः कचनिचयांवायुनाकेरलम्रः ॥
स्त्रीभिर्दृढंनिबध्यो नोचेत्परकलत्रमनुसरति ॥ ६ ॥

अभ्यंगारंभः

वक्षोजौनिबिडंनिरुध्यसिचयेनाऽऽकुंच्यमध्यंशनैः
कृत्वाचंपकतैलसेकमबलासंपीड्यमंदंशिरः ॥
पाणिभ्यांचलकंकणोद्यतझणत्कारोत्तराभ्यांकरो
त्यभ्यंगंपरिपश्यतःप्रकृतुकंदोरतरंभेयमः ॥ १ ॥
जानुभ्यामुपपीड्यपार्ष्णिनिहितश्रोणीभरामोन्नम
द्दोर्वल्लीनमदुन्नमत्कुचतटीदीव्यन्नखांकावलिः ॥
पाणिभ्यामवधूयकंकणझणत्काराऽवतारोत्तरं
बालानंक्षतिकिंनिजालकभरंकिंवामदीयंमनः ॥ २ ॥
अभ्यांतंदृढयंत्रणेनकुचयोरत्यक्तकाठिन्ययो
रावद्धस्फुटमंडलोन्नतिमितश्चोलंविमुच्योरसः ॥

---

१ करपृष्ठेन २ कलत्रंश्रोणिभार्ययोः ३ वस्त्रमात्रेन. ४ बध्नाति. ५ संततं.

नीवींविमुच्य रतिविघायतमिमंवासस्तनालंबिनी
वेणीपाणिनखांऽपलैःशिथिलयन्प्राकम्पपीठंपदा ॥ ३ ॥
आवर्त्यंकंठसिचयेनसम्य गाबध्यवक्षोरुहकुंभयुग्मं ॥
काऽसौकराऽऽलंबिततैलपात्रा मंदंसमासीदतिसुंदरींतां ॥४॥
अस्याःपीठोपविष्टाया अभ्यंगंवितनोत्यसौ ॥
ललच्छ्रोणिचलद्वेणि नटद्गुरुपयोधरं ॥ ५ ॥

कुंकुमादितिलकः

बालेललामलेखेयं भालेभल्लीवराजते ॥
भ्रूलताचापमाकृष्य नजानेकंहनिष्यति ॥ १ ॥
विराजतेऽस्यास्तिलकोयमचितो विकुंचितभ्रूलतिकाद्वयांतरे ॥
विजित्यलोकत्रितयंदिवंमति स्मरणबाणोधनुषीवयोजितः ॥ २ ॥
कस्तूरीतिलकंबाले भालेमाकुरुमाकुरु ॥
अद्यसाम्यंभजामीति जृंभतेशशलांछनः ॥ ३ ॥
श्यामलेनांऽकितंभाले बालेकेनाऽपिलक्ष्मणा ॥
मुखंतवांऽतरासुप्त भृंगफुल्लांबुजायते ॥ ४ ॥
लोचनफुल्लांभोज द्वयलोभाऽऽदालितैकमनाः ॥
कस्तूरीतिलकमिषा दयमलिकेऽलिःसमुल्लसति ॥ ५ ॥

अथभ्रुवौ

स्मरकल्पद्रुमोबाले तवभालेद्विपत्रकः ॥
पत्रयोरनयोश्छाया भ्रुवोर्व्याजादुदंचति ॥ १ ॥

अथनेत्रे

नूनमाज्ञाकरस्तस्याः सुभ्रुवोमकरध्वजः ॥
यतस्तन्नेत्रसंचार सूचितेषुप्रवर्तते ॥ १ ॥
लोचनेहरिणगर्वमोचने माविदूषयनतांगिकज्जलैः ॥

---

१ वसनग्रंथिसंनिहितंकृत्वा. २ (बरचीतिलो०) ३ निष्कलंकमुखस्यकस्तूरीतिलकेमलांछनवत्त्वाचंद्रःसाम्यंभजेदितिभावः ४ श्यामवर्णेन. ५ चिन्हेन (गोंदणें इतिलो०).

सायकःसपदिजीवहारकः किंपुनर्हिगरलेनलेपितः ॥२॥
कामिनीनयनकज्जलपंका दुग्धितोमदनमत्तवराहः ॥
कामिमानसवनांतरचारी मूलमुत्खनतिमानलतायाः ॥३॥
निःसीमशोभासौभाग्यं नतांग्यानयनद्वयं ॥
अन्योन्याऽऽलोकनाऽऽनंद विरहादिवचंचलं ॥ ४ ॥
रामाविलोलनयनेकिमुमीनबाणौ नीलोत्पलेकिमथवाकिमुखंजरीटौ ॥
किंवाजगत्त्रयजयायकृतिर्नजाने कंदर्पभूपरचितानवकार्मणस्य ॥ ५॥

अथकटाक्षः

यत्रयत्रवलते शनैःशनैः सुभ्रुवोनयनकोणविभ्रमः ॥
तत्रतत्रशतपत्रधोरणी तोरणीभवतिपुष्पधन्वनः ॥ १ ॥
यासांकटाक्षविशिखैः स्मरचोरेणताडिताः ॥
त्द्दतचैतन्यसर्वस्वा मुग्धामुह्यंतिकामुकाः ॥ २ ॥
सन्मार्गेतावदास्तेप्रभवतिपुरुषस्तावदेवेंद्रियाणां
लज्जांतावद्विधत्तेविनयमपिसमालंबतेतावदेव ॥
भ्रूचापाऽऽकृष्टमुक्ताःश्रवणपथजुषोनीलपक्ष्माणएते
यावल्लीलावतीनांत्द्दिनधृतिमुषोदृष्टिबाणाःपतंति ॥ ३ ॥
तावदेवकृतिनामपिस्फुरत्येषनिर्मलविवेकदीपकः ॥
यावदेवनकुरंगचक्षुषां ताड्यतेचपललोचनांऽचलैः ॥ ४ ॥
प्रभवतिमनसिविवेको विदुषामपिशास्त्रसंभवस्तावत् ॥
निपतंतिनेत्रविशिखा यावन्नेंदीवराक्षीणां ॥ ५ ॥
हृत्वालोचनविशिखै र्गत्वाकतिचित्पदानिपद्माक्षी ॥
जीवतियुवानवाकिं भूयोभूयोविलोकयति ॥ ६ ॥
यांतीगुरुजनैःसार्धं स्मयमानमुखांबुजा ॥
तिर्यग्ग्रीवंयदद्राक्षी त्तन्निष्पत्राकरोज्जगत् ॥ ७ ॥
क्वचित्कृष्णाऽर्जुनगुणा क्वचित्कर्णांतगामिनी ॥
अपांगश्रीस्तवाऽऽभाति सुभ्रूर्भारतगीरिव ॥ ८ ॥

---

१ विषेण २ धैर्यहारिणः ३ पंडितानां. ४ बाणैः ५ व्यथयामास. सपत्रनिष्पत्रा ६ तिव्यथने.

रैरैवेरष्टमारोवी: कंकंनवामयंत्यमू: ॥
कथाक्षवीक्षणादेव कराऽऽकृष्टस्यकाकथा ॥ १ ॥

अथनासा

पुराणबाणत्यागाय नूतनाऽऽस्रकुतूहलात ॥
तन्नासाभातिकामेन तूणीवाऽधोमुखीकृता ॥ १ ॥

नासामौक्तिकं

नासामौक्तिकमबले किमधरबिंबेनविद्रुमंकुरुषे ॥
दृष्ट्वागुंजाबीजं शिवशिवभूयस्तदेवहसितेन ॥ १ ॥
सुधामयोऽपिक्षयरोगशांत्यै नासाऽग्रमुक्ताफलकच्छलेन ॥
अनंगसंजीवनदृष्टशक्ति मुखाऽमृतंतेपिबतीवचंद्रः ॥ २ ॥

अथकर्णौ

सौंदर्यपात्रेवक्त्रेंदौ कुरंगाऽऽसंगभीतया ॥
सूचितौश्रोत्रपाशाभ्यां पाशाविवमृगीदृशा ॥ १ ॥

अथकपोलौ

कपोलपालीतवतन्विमन्ये लावण्यधन्येदिशमुत्तराख्यां ॥
विभातियस्यांललिताऽलकायां मनोहरावैश्रवणस्यलक्ष्मी ॥१॥
द्विधाविधायशीतांशुं कपोलौकृतवानविधिः ॥
तन्व्यास्तद्रसनिष्पंद बिंदवोरदनावलिः ॥ २ ॥

अथाधरः

तवैषविद्रुमच्छायो मरुमार्गइवाऽधरः ॥
करोतिकस्यनोबाले पिपासाऽऽकुलितंमनः ॥ १ ॥
त्वंपीयूषदिवोऽपिभूषणमसिद्राक्षेपरीक्षेतको
माधुर्यंतवविश्वतोऽपिविदितंमाध्वीकमाध्वीकता ॥

१(जाति इ०को.) २ अलकाः केशाः पक्षे कुबेरनगरी. ३ वैश्रवणस्यकुबेरस्य. पक्षे वेदलिपठच्छेदः श्रवणस्यकर्णस्य. ४ प्रवालकांतिः पक्षेविगताद्रुमच्छायायस्मात् ५ मरु देशस्थमार्गः (मारवाडृतिलो०)

एतत्किंतुमनागहंतुबमिकमूभोनचेत्कुप्यति
यःकांताधरपल्लवेपधुरिमानाऽस्मत्कुलाऽपिसः ॥ २ ॥
सर्वेषामेवरत्नानां व्रणेऽर्घःपरिहीयते ॥
दयिताधररत्नंतु व्रणितंयात्यनर्घतां ॥ ३ ॥

अथमुखं

यदमरशतैःसिंधोरंतःकथंचिदुपाऽर्जितं
सकलमपितद्धात्राकांतामुखेविनिवेशितं ॥
सुरसुमनसःश्वासाऽऽमोदेशशीचकपोलयो
रमृतमधरेनिर्यग्भूतेविषंचविलोचने ॥ १ ॥
तस्यामुखस्याऽतिमनोहरस्य कर्तुनशक्तःसदृशंप्रियायाः ॥
अद्याऽपिशीतद्युतिरात्मबिंबं निर्मायनिर्मायपुनर्भिनत्ति॥२॥
अनेनरंभोरुभवाऽऽननेन पीयूषभानोस्तुलयाधृतस्य॥
ऊनस्यनूनंपरिपूरणाय ताराःस्फुरंतिप्रतिमानखंडाः ॥ ३ ॥
धिक्तस्यमंदमनसःकुकवेःकवित्वं यःस्त्रीमुखंतुहिनबिंबसमंकरोति ॥
भ्रूभंगविभ्रमकटाक्षनिरीक्षणानि कोपप्रसादहसितानिकुतःशशांके॥४॥
प्रविशद्भर्तिरिगेहंमार्गहिस्तिष्ठकांते ग्रहणसमयवेलावर्ततेशीतरश्मेः ॥
तवमुखमकलंकंवीक्ष्यराहुःसनूनं ग्रसतितवमुखेंदुंचंद्रबिंबंविहाय॥५॥
वामांऽचलाऽऽच्छादितमर्धभागं सौधस्थराधावदनंसमीक्ष्य ॥
सर्वेऽपिवृंदावनवासिनस्ते चक्रुश्चतुर्थीव्रतपारणानि ॥ ६ ॥
विश्वामित्रपराशरप्रभृतयोवाताऽम्बुपर्णाशना
स्तेऽपिस्त्रीमुखपंकजंसुललितंदृष्ट्वैवमोहंगताः ॥
शाल्यन्नसघृतंपयोदधियुतंभुंजंतियेमानवा
स्तेषामिंद्रियनिग्रहोयदिभवेद्विंध्यस्तरेत्सागरं ॥ ७ ॥
अबलेसलिलेतपस्यता मुखभावंगमितोनपंकजेन ॥
कथमादिमवर्णताऽंत्यजस्य द्विजराजेनकृतोरुनिग्रहस्य ॥८॥

---

१ मर्मस्पृक्. २ छिद्रे. जातेसतीत्यध्याहार्यं. ३ मूल्यं. ४ संजातव्रणं ५ अमूल्यतां. ६ तुल्यं ७ मुखत्वं. मुखसाम्यमित्यर्थः ८ आद्योमवर्णोयस्यतस्यभावस्तत्तां. पकारादेः पकजस्यमकारादित्वंकथमित्यर्थः पक्षेब्राह्मणत्वं ९ अंत्येजकारोयस्य एतादृशस्य पंक-जस्य पक्षेअतिशूद्रस्य. १० चंद्रेण. ब्राह्मणश्रेष्ठेन. ११ कृतःउरुःमहान्निग्रहोदंडोयस्य.

चलद्भृंगबिंबांभोज मन्मीलयनमुखं ॥
तदीयं बदिदृश्येत कामकुम्भोऽलुकिततः ॥ ९ ॥
ननुनीलांचलसंवृत माननमाभातिहरिणनयनायाः ॥
मलिबिंबितइवयमुना गभीरनीरांतरेणांऽकः ॥ १० ॥
ओंसायसलिलभरे सवितारमुपास्यसादरंतपसा ॥
अधुनाऽब्जेनमनाकृनव मानिनितुलनामुखस्याऽऽप्ता ॥११॥
विलसत्याननंतस्या नासाऽग्रस्थितमौक्तिकं ॥
आश्लिष्तबुधाऽऽश्लेषं राकेंदोरिवमंडलं ॥ १२ ॥
सुविरलमौक्तिकतारे धवलांऽशुकचंद्रिकाचमत्कारे ॥
वदनपरिपूर्णचंद्रे सुंदरिराकाऽसनाऽत्रसंदेहः ॥ १३ ॥

कंठः

मातंगकुंभसंसर्ग जातपातकशंकया ॥
स्नातीवमुक्ताहारोऽस्याः स्फुरत्कांतिगलेजले॥१॥

बाहू

दयिताबाहुपाशस्य कुतोऽयमपरोविधिः ॥
जीवयत्यर्पितःकंठे मारयत्यपवर्जितः ॥ १ ॥
शब्दवद्भिरलंकारैः रूपेनमतिकोमलं ॥
सुवृत्तकाव्यवद्भेजे तस्याबाहुलताद्वय ॥ २ ॥

अंगुल्यः

सुदीर्घारागशालिन्यो बहुपर्वमनोहराः ॥
तस्यावरजुरंगुल्यः कामिनांसकथाइव ॥

अथस्तनौ

पुष्पेषोरभिषेकहेमकलशौहारप्रभावाहिनी
चंक्राव्हौमदनोन्मदद्विपपतेः कुंभौरतेःकंदुकौ ॥
कंदौबाहुमृणालिकायुगलयोर्लीलालतासत्फले
नव्यौरत्नसमुद्गकौवहतिसालावण्यपूर्णौस्तनौ ॥ १ ॥

---

१ सायंकालपर्यंतं. २ अंत्यजः प्रदोषजः ३ त्यक्तः ४ चक्रवाकौ. ५ संपुटौ.

मृद्वंगिकठिनीतन्वि पीनौहनुमिदुर्मुखौ ॥
अतएवबहिर्यातौ त्वदयातिपयोधरौ॥ २ ॥
स्वयंभूःशंमुरंभोज लोचनेन्वत्पयोधरः ॥
नत्वेनकस्यधन्यस्य चंद्रचूडोभविष्यति॥ ३ ॥
अविवेकिकुचद्वंद्वं हंतुनामजगत्त्रयं ॥
श्रतिमर्णायनोरक्ष्णो रयुक्तंजनमारणं ॥ ४ ॥
मोर्याश्वितंनगृण्हीत स्तन्वंग्याःपेतितौस्तनौ ॥
अतएवतयोःस्पर्शौ लोकोऽयंशिथिलाऽऽदरः ॥ ५ ॥
दीपोवातभयान्मीतः कामिन्यावसनांतरे ॥
दृष्टातुकुचसौंदर्यं शिरःकंपयतेमुहुः ॥ ६ ॥
पयोधरघनीभाव स्तावदंबरमध्यग ॥
आश्लेषोपगमस्तत्र यावन्नैवप्रवर्तते॥ ७ ॥
बदराऽमलकाऽऽम्रदाडिमाना मपन्हत्यश्रियमुन्नतौक्रमेण ॥
अधुनाहरणेकुचौयतेते दयितेतेकरिशावकुंभलक्ष्म्याः ॥८॥
जंबीरश्रियमतिलंघ्यलीलयेव व्यानम्रीकृतकमनीयहेमकुंभौ ॥
नीलांऽभोरुहनयनेऽधुनाकुचौते स्पर्धेतेकिलकनकाऽचलेनसार्धं ॥९॥
पटविघटितमपिकुचतट मकपटमनसःकुरंगनयनायाः ॥
मणिभवमयूखपटली पटलीनतयानसम्यगालोचि ॥ १० ॥
प्रतिपक्षोयदिवसो रुहपरिणाहःकुरंगनयनायाः॥
आकाशवासतपसः श्रीफलविफलस्तवाऽऽयासः॥ ११ ॥
दिवानिशंवारिणिकंठदघ्ने दिवाकराऽऽराधनमाचरंती ॥
वक्षोजताप्त्यैकिमुपक्ष्मलाक्ष्या स्तपश्चरत्यंबुजपंक्तिरेषा॥१२॥
कुचावस्याःकामद्विपकलभकुंभावितिपरे
वदंत्यन्येवक्षःसरसिकमलेकांचनघटौ ॥
ममाऽयंसिद्धांतःस्फुरतिमदनेनत्रिजगतीं
विनिर्जित्यन्युब्जीकृतमिवनिजंदुंदुभियुगं ॥ १३ ॥

---

१ पापनिष्कृतिं पक्षेभापःबाहुल्येन विलंस्थानं. २ पालकिनौ, पक्षेनष्ठितौ. ३ पयोधराणांमेघानांघनीभावःप्राचुर्यं ४ आकाशमध्यवर्तिन्. ५ आश्लेषागमनक्षत्रो-दयः पक्षे सुगमं. ६ कंठप्रमाणे. ७ सूर्याराधन.

अथमध्यः

वयःप्रकर्षादुपचीयमान स्तनद्वयस्योद्वहनश्रमेण ॥
अत्यंतकार्श्यवनजायताक्ष्या मध्योजगामेतिममैषतर्कः॥१॥
स्फुटमसदवलग्नंतन्विनिश्चिन्वतेते तदनुपलभमानास्तर्कयंतोऽपिलोकाः॥
कुचगिरिवरयुग्मंयद्विनाधारमास्ते तदिहमकरकेतोरिंद्रजालंमतीमः ॥२॥

वलित्रयं

एकमेववलिंबध्वा जगामहरिरुन्नतिं ॥
तन्मध्यास्त्रिवलिबंधेऽपि सैवमध्यस्यनम्रता ॥ १ ॥

अथरोमावलिः

गंभीरनाभिन्हदसन्निवेशे रराजनीलानवरोमराजिः ॥
मुखेंदुभीतस्तनचक्रवाक चंचुच्युताशैवलमंजरीव ॥ १ ॥
दत्तमयापदमिदंनवयौवनाय त्वसम्वरंक्षचनशैशवसाधयेति ॥
कामस्यहस्तलिखिताऽक्षरमालिकेव रोमावलीविजयतेजलजेक्षणायाः २
पयोधरस्तावदयंसमुन्नतो रसस्यवृष्टिःसविधेभविष्यति ॥
अतःसमुद्गच्छतिनाभिरंध्रतो विसारिरोमालिपिपीलिकाऽऽवलिः॥३॥
उत्तुंगस्तनपर्वतादवतरद्गंगेवहारावली
रोमालीनवनीलनीरजरुचिःसेयंकलिंदाऽऽत्मजा ॥
जातंतीर्थमिदंसुपुण्यजनकंयत्राऽनयोःसंगम
श्चंद्रोमज्जतिलांछनाऽपत्हतयेनूनंनखांकच्छलात ॥ ४ ॥

अथनाभिः

मन्येऽसमाप्तलावण्ये सारसर्गेमृगीदृशः ॥
अपूरयित्वैवगतो नाभिरंध्रंचतुर्मुखः ॥ १ ॥

---

१ पुष्यमाणः २ मध्यं. ३ गारुडं. ४ बलिनामानंदैत्यं. पक्षेवलिं. ५ रोमाव
लिरेवपिपीलिकापंक्तिः. ६ यमुना. ७ नखक्षणच्छलेन.

अथनितंबः

सकर्षनस्पृहणीयो विषयरतैस्तन्नितंबविन्यासः ॥
शांतात्मनाऽपिविहितं विश्वसृजागौरवंयत्र ॥ १ ॥

अथजघनं

वपुरनुपमंनाभेरूर्ध्वंविधायमृगीदृशां
ललितललितैरंगन्यासैःपुरारभसादिव ॥
तदनुसहसाखिन्नेनेवप्रजापतिनाभृशं
पृथुलपृथुलास्थूलस्थूलाकृताजघनस्थली ॥ १ ॥

अथजंघे

जंघेयदीयेसंतापं यज्जनस्याऽनुरागिणः ॥
जनयांचक्रतुस्तत्र व्रीडाहेतुर्विलोमता ॥ १ ॥

चरणौ

अमूल्यस्यममस्वर्ण तुलाकोटिद्वयंकियत् ॥
इतिकोपादिवाऽऽताम्रं पादयुग्मंमृगीदृशः ॥ १ ॥

अथनखाः

चरणाऽब्जनखश्रेणी राजतेहरिणीदृशः ॥
रत्नावलीवलावण्य रत्नाकरसमुद्गता ॥ १ ॥

अथसखीकर्तृकउपदेशः

मुग्धेमुग्धतयैवनेतुमखिलःकालःकिमारभ्यते
मानंधत्स्वधृतिंबधानऋजुतांदूरेकुरुप्रेयसि ॥
सख्यैवंप्रतिबोधितामतिवचस्तामाहभीतानना
नीचैःशंसत्दृदिस्थितोहिननुमेप्राणेश्वरःश्रोष्यति ॥ १ ॥

---

१ प्रशांतमनसा. २ ब्रह्मणा. ३ अत्यंतसुंदरैः ४ आतिनेव. ५ सुवर्णस्यार्विंशतिपला त्मकतुलाकोटिद्वयं अथचपादांगदद्वयं. (तोरडीतिलो०) ६ सरलत्वं. ७ कथय.

सखींप्रतिबालावाक्यं

भ्रूभंगेरचितेऽपिदृष्टिरधिकंसोत्कंठमुद्वीक्षते
रुंधायामपिवाचिसस्मितमिदंदग्धाऽननंजायते ॥
कार्कश्यंगमितेऽपिचेतसितनूरोमांचमालंबते
दृष्टेनिर्वहणंभविष्यतिकथंमानस्यतस्मिन्जने ॥ २ ॥
तद्वक्त्राऽभिमुखंमुखंविनमितंदृष्टिःकृतापादयो
स्तस्याऽऽलापकुतूहलाऽऽकुलतरेश्रोत्रेनिरुंधेमया ॥
पाणिभ्यांचतिरस्कृतःसपुलकःस्वेदोद्गमोगंडयोः
सख्यःकिंकरवाणियांतिशतधायत्कंचुकीसंधयः ॥ ३ ॥

अथसखीकर्तृकमानाऽपनोदः

मुग्धेमानंनतेकर्तुं युक्तंमाणाऽधिकेप्रिये ॥
धत्तेमत्सीकियत्कालं जीवितंजीवनंविना ॥ १ ॥
लिखन्नास्तेभूमिंबहिरवनतःप्राणदयितो
निराहाराःसख्यःसततरुदितोच्छूननयनाः ॥
परित्यक्तंसर्वंहसितपठितंपंजरशुकै
स्तवाऽवस्थाचेयंविसृजकठिनेमानमधुना ॥ २ ॥
संत्येवाऽत्रगृहेगृहेयुवतयस्ताःपृच्छगत्वाऽधुना
प्रेयांसःप्रणमंतिकिंतवपुनर्दासोयथावर्तते ॥
आत्मद्रोहिणिदुर्जनप्रलपितंकर्णेऽनिशंमाकृथा
श्छिन्नस्नेहरसाभवंतिपुरुषादुःखाऽनुवृत्यापुनः ॥ ३ ॥
स्निग्धेयत्परुषाऽसियत्प्रणमतिस्तब्धाऽसियद्रागिणि
द्वेषस्थाऽसियदुन्मुखेविमुखतांयाताऽसितस्मिन्प्रिये ॥
तन्मुग्धेविपरीतकारिणितवश्रीखंडचर्चाविषं
शीतांशुस्तपनोहिमंहुतवहःक्रीडामुदोयातनाः ॥ ४ ॥
असद्वृत्तोनाऽयंनचखलुगुणैरवरहितः

---

१ कलशं. २ नम्रः ३ कपोलस्थलीः ४ संततरोदनेनशोथयुक्तानिनयनानियासां ताः ५ पाषाणहृदये. ६ प्रियाः

मियोमुक्ताहारस्तवचरणमूलेनिपतितः ॥
गृहाणैनंमुग्धेव्रजतुतवकंठमणयिता
मुपायोनाऽस्त्यन्यस्तवहृदयदाहोपशमने ॥ ५ ॥

अथनायककलंकमानाऽपनोदः॥

इंदीवरेणनयनंमुखमंबुजेन कुंदेनदंतमधरंनवपल्लवेन ॥
अंगानिचंपकदलैःसविधायवेधाः कांतेकथंघटितवानुपलेनचेतः॥१॥
आक्षिपसिकेणमक्ष्णा बालैरपिबद्धस्त्वयात्रिधामध्ये ॥
इतिजितसकलवृंदान्धे तनुदामेलज्जसेसुतनु ॥ २ ॥
सुतनुर्जहिहिमौनंपश्यपादाऽऽनतंमां
नखलुतवकदाचित्कोपएवंविधोऽभूत ॥
इतिनिगदतिनाथेतिर्यगामीलिताक्ष्या
नयनजलमनल्पंमुक्तमुक्तंनाकिंत ॥ ३ ॥
बालेनाथविमुंचमानिनिरुषंरोषान्मयाकिंकृतं
खेदोऽस्मासुनमेऽपराध्यतिभवान्सर्वेऽपराधामयि ॥
तत्किंरोदिषिगद्गदेनवचसाकस्याऽग्रतोरुद्यते
नन्वेतन्ममकातवाऽस्मिदयितानाऽस्मीत्यतोरुद्यते ॥ ४ ॥
नयनविपातेऽकुरितः पल्लवितोवचसिपुष्पितोहसिते ॥
फलतुकृशांगितवांग स्पर्शनमात्रेमनोरथाऽऽख्यतरुः ॥ ५ ॥
सुतनुत्वदयानुमत्यादेशव्यलीकमपैतुते
किमपिमनसःसंमोहोमेतदाबलवानभूत ॥
मबलतममामेवंमायाःशुभेर्गुहिवृत्तयः
स्रजमपिशिरस्यंधःक्षिप्तांधुनोत्यहिशंकया ॥ ६ ॥
मोहान्मयासुतनुपूर्वमुपेक्षितस्ते योबाष्पबिंदुरधरंपरिबाधमानः ॥
तंतावदाकुटिलपक्ष्मविलग्नमद्य कांतेप्रमृज्यविगताऽनुशयोभवामि ॥७॥

---

१ मौक्तिकानांहारः पक्षे मुक्तस्त्यक्तःआहारःअशनंयेनप्रियेणेत्यर्थः २ हृदयदाहशान्त्यै ३ नीलोत्पलेन, ४ पाषाणेन तत्सदृशकठिनत्वात्. ५ मोघंअंगाविपेष ६ बलिनामादित्यः बलयोःलावण्योत्बालिःबलिभिर्नयं. ७ जितसर्वदानवौघे. ८ त्यज, ९ नकिंचिदपिउक्तं १० क्रोधं ११ निराकृतिदुःखं, १२ मालां, १३ सर्पभ्रान्त्या.

अथप्रियनर्मोक्तयः

अपूर्वचौर्यमभ्यस्तं त्वयाचंचललोचने ॥
दिवैवजाग्रतांपुंसां चेतोहरसिदूरतः ॥ १ ॥
उचितंगोपनमनयोः कुचयोःकनकाऽद्रिकांतितस्करयोः ॥
अवधीरितविधुमंडल मुखमंडलगोपनंकिमिति ॥ २ ॥
केशाःसंयमिनःश्रुतेरपिपरंपारंगतेलोचने
ह्यंतर्वक्त्रमपिस्वभावशुचिभिःकीर्णंद्विजानांगणैः ॥
मुक्तानांसततंनिवासरुचिरंवक्षोजकुंभद्वय
मित्थंतन्विवपुःप्रशांतमपितेरागंकरोत्येवनः ॥ ३ ॥
बालेतवाऽधरसुधारसपानकाले चेतोमदीयमभिवांछतिशेषभावं॥
आलिंगनेतवविरोचनपौत्रभाव माखंडलत्वमखिलांऽगनिरीक्षणेते ॥४॥
भ्रूचापेनिहितःकटाक्षविशिखोनिर्मातुमर्मव्यथां
श्यामाऽऽत्माकुटिलःकरोतुकबरीभारोऽपिमारोद्यमं ॥
मोहंतावदयंचतन्वितनुतांबिंबाधरोरागवान्
सद्वृत्तंस्तनमंडलंनवकथंप्राणैर्ममक्रीडति ॥ ५ ॥
कमलाक्षिविलंब्यतांक्षणं कमनीयेकचभारबंधने ॥
द्वयमिदंदृशोर्युग शनकैरद्यममुद्भ्राम्यहं ॥ ६ ॥
कुतःकुवलयंकर्णे करोषिकलभाषिणि ॥
किमपांगमपर्याप्त मस्मिन्कर्मणिमन्यसे ॥ ७ ॥

अथवयःसंधिवर्णनं

मंदंमंदंश्रवणपुटकोपांतगंतादृगंत:
किंचित्किंचित्त्विरमतिमनोधूलिकेलीरसेभ्यः ॥
आविर्भावस्तनमुकुलयोःकाऽपिकांतिःसमंता
दद्यश्वोवाकुसुमधनुषांयौवराज्याऽभिषेकः ॥ १ ॥
स्मितंकिंचिद्वक्त्रेसरलतरलोदृष्टिविभवः

---

१ बंधनयुक्ताःनियमवंतश्च. २ कर्णस्यवेदस्यच, ३ दंतानांब्राह्मणानांच. ४ मौक्तिकानांजीवन्मुक्तानांच. ५ अनुरागंकोधंच. ६ शैवत्वं. जिह्वासहस्रवत्वात्, ७ सहस्राक्षत्वं. ८ इंद्रत्वं. ९ भ्रूरेवचापस्तस्मिन्. १० कटाक्षएवविशिखोबाणः ११ मलिनस्वभावः

परिस्पंदोवाचामभिनवविलासोक्तिसरसः ॥
गतीनामारंभःकिसलयितलीलापरिकरः
स्पृशंत्यास्तारुण्यंकिमिहनहिरम्यंमृगदृशः ॥ २ ॥
श्रोणीबंधस्त्यजतितनुतांसेवतेमध्यभागः
पद्भ्यांमुक्तास्तरलगतयःसंश्रितालोचनाभ्यां ॥
धत्तेवक्षःकुचसचिवतामद्वितीयंनुवक्त्रं
स्वद्गात्राणांगुणविनिमयःकल्पितोयौवनेन ॥ ३ ॥
बिंबोष्ठएवरागस्ते तन्विपूर्वमदृश्यत ॥
अधुनाहृदयेप्येष मृगशावाक्षिदृश्यते ॥ ४ ॥
स्थैर्यंविनिवर्यमिमशमे समुदंचातितरुणिमनिसुदृशः ॥
दधनिम्नमधुरिमाणं वाचोगतयश्चविभ्रमाश्चभृशं ॥ ५ ॥
यदवधिविलासभवनं यौवनमुदियायचंद्रवदनायाः ॥
दहनंविनैवतदवधि यूनांहृदयानिदह्यंते ॥ ६ ॥
अधरःकिसलयरागः कोमलविटपानुकारिणौबाहू ॥
कुसुममिवलोभनीयं यौवनमंगेषुसन्नद्धं ॥ ७ ॥
अनाघ्रातंपुष्पंकिसलयमलूनंकररुहै
रनाविद्धंरत्नंमधुनवमनास्वादितरसं ॥
अखंडंपुण्यानांफलमिवचतद्रूपमनघं
नजानेभोक्तारंकमिहसमुपस्थास्यतिभुवि ॥ ८ ॥
अत्युन्नतस्तनमुरोनयनेसुदीर्घे वक्रेभ्रुवावतितरांवचनंततोऽपि ॥
मध्योऽधिकंतनुरनूनगुरुर्नितंबो मंदागतिःकिमपिचाद्भुतयौवनायाः॥९॥
दृश्यदृशामहमस्मै मनसामपुनैर्विभावनीयंच ॥
सुकृतशतकोटिभोग्यं किमपिवयःसुभ्रुवोजयंति ॥ १० ॥
मृदुलवलिललितमध्यं पृथुलकुचंचोरुविपुलभूजघनं ॥

१ सूक्ष्मता. २ चंचलगमनानि ३ विपर्ययः (बदल) इतिलो० ४ गच्छतिसति. ५ उदयंप्राप. ६ स्पृहणीयं. ७ अच्छिन्नं. ८ वेधरहितं. ९ ध्येयं. १० मृद्वीयालघलिर्वृक्षविशेषःतेनललितःमध्यभागोयस्यतत्. पक्षेमृदुलाःयाःवलयःवलित्रितयंतेनललितःमध्योयस्मिन् ११ पृथवःस्थूलाः लकुचाः पनसाःयस्मिन्. पक्षे पृथुलौकुचौयस्मिन्.१२सुंदरं. १३ विपुलाः येभूजाः वृक्षास्तैर्घननिबिडं. पक्षे विपुलाभूर्येषांतेविपुलभुवः एताहृशाःजघनाः यस्मिन्तत्. बहुप्रदेशव्यापकजघनमित्यर्थः विपुलभूसदृशंजघनंयस्मिन्नितिवा.

पुन्नागस्पृहणीयं स्फुरतिवनंयौवनंचनारीणां ॥ ११ ॥

अथप्रणयकलहांतरितनायिकानुनयः

गतमायारात्रिःशशिमुखिशशीशीर्यतइव
प्रदीपोऽयंनिद्रावशमुपगतोघूर्णतइव ॥
प्रणामांतोमानस्तदपिनजहासिक्रुधमहो
कुचप्रत्यासत्त्याहृदयमपितेचंडिकठिनं ॥ १ ॥
क्षीणांऽशुःशशलांछनःसखिपुनःक्षीणोनमानस्तव
स्मेरंपद्मवनंमनागपिनतेस्मेरंमुखांऽभोरुहं ॥
पीतंश्रोत्रयुगेनषट्पदरुतंपीतंनतेजल्पितं
रक्ताशैकदिगंगनार्रविकरैर्नाऽद्यापिरक्ताऽसिकिं ॥ २ ॥
पुरोदिगनुरागिणीनदपिनाऽनुरागोदयः
कृशोदरिनिशाकृशातदपितेनमानःकृशः ॥
प्रसन्नमिदमंबरंतदपिनप्रसन्नंमनो
ननादचरणायुधस्तदपिमौनमालंबसे ॥ ३ ॥
आविर्भवेनशशिनिनमसामच्यमानेवरात्रि
नैशस्याचिर्हुतभुजइवाच्छिन्नभूयिष्ठधूमा ॥
मोहेनांऽतर्वरतनुरियंलक्ष्यतेमुक्तकल्पा
गंगारोधःपतनकलुषागृण्हतीवप्रसादं ॥ ४ ॥

वीररसः

भूमात्रंकियदेतदर्णवमितंतत्साधितंहार्यते
यद्वीरेणभवादृशेनवदतित्रिःसमकृत्वोजयः ॥
डिंभोऽयंनवबाहुरीदृशामिदंघोरंचवीरव्रतं
तत्क्रोधाद्विरमप्रसीदभगवन्जात्यैवपूज्योऽसिनः ॥ १ ॥
त्रैलोक्यत्राणशौंडःसगसिजवसतेर्यःप्रसूतोभुजाभ्यां
सक्षत्रंनामवर्ण.कुलिशकठिनयोर्यस्यदोर्ष्णोर्विलीनः ॥

१ पुन्नागैःकेसरवृक्षैःस्पृहणीयं. पक्षे पुरुषश्रेष्ठैःस्पृहणीयं. २ अत्यंतकोपने. ३ विकासिनी. ४भ्रमरशब्दः ५ प्राची. ६ तीरपातेनमृदाविला. ७ नैर्मल्यं. ८ रक्षणे. ९ ब्राह्मणः १० बाह्वोः

ज्वालाजिह्वाल्लकालानलकवलभयभ्रांतदेवासुराणि
व्यात्तास्यानोमरगंतिज्वलतिपुनिरयंपार्वतीधर्मपुत्रः ॥ २ ॥
पुरोजन्मानाऽथनप्रभृतिममरामःस्वयमहं
नपुत्रःपौत्रोवारघुकुलभुवांचक्षितिभुजां ॥
अधीरंधीरंवाकलयतुजनोमामयमयं
मयाबद्धोदुष्टद्विजदमनदीक्षापरिकरः ॥ ३ ॥
चत्वारोवयमृत्विजःसभगवान्कर्मोपदेष्टाहरिः
संग्रामाध्वरदीक्षितोनरपतिःपत्नीगृहीतव्रता ॥
कौरव्याःपशवःप्रियापरिभवक्लेशोपशांतिःफलं
राजन्योपनिमंत्रणायरसनिस्फीतंयशोदुंदुभिः ॥ ४ ॥

करुणरसः

सद्यःपुरीपरिसरेऽपिशिरीषमृद्वी
गत्वाजवात्त्रिचतुराणिपदानिसीता ॥
गंतव्यमस्तिकियदित्यसकृद्ब्रुवाणा
रामाऽश्रुणःकृतवतीप्रथमाऽवताऽरं ॥ १ ॥
अथेदंरक्षोभिःकनकहरिणच्छद्मविधिना
तथावृत्तंपापैर्व्यथयतियथाक्षालितमपि ॥
जनस्थानेशून्येविकरुणकरुणैरार्यचरितै
रपिग्रावारोदित्यपिदलतिवज्रस्यहृदयं ॥ २ ॥
अविशीर्णकांतपात्रे नव्यदशेसुमुखिसंभृतस्नेहे ॥
मद्गेहदीपकलिके कथमुपयाताऽसिनिर्वाणं ॥ ३ ॥
यास्यत्यद्यशकुंतलेतिहृदयंसंस्पृष्टमुत्कंठया
अंतर्बाष्पभरोपरोधिगदितंचिंताजडंदर्शनं ॥
वैक्लव्यंममतावदीदृशमपिस्नेहादरण्यौकसः
पीड्यंतेगृहिणःकथंनुतनयाविश्लेषदुःखैर्नवैः ॥ ४ ॥

---

१ भार्गवः २ युधिष्ठिरः ३ द्रौपदी. ४ शब्दंकरोति. ५ अयोध्यासमीपदेशे. ६ शिरीषकुसुमवत्कोमला. ७ वारंवारं. ८ कपटं. ९ आचरितं. १० दुष्टैः ११ अत्यंतकरुणैः १२ पाषाणः १३ शीर्यति. १४ अरण्यवासिनः १५ गृहस्थाश्रमिणः १६ कन्यावियोगदुःखैः

पातुंनप्रथमंव्यवस्यतिजलंयुष्मास्वपीतेषुया
नाऽऽदत्तेप्रियमंडनाऽपिभवतांस्नेहेनयापल्लवं ॥
आद्येवःकुसुमप्रवृत्तिसमयेयस्याभवत्युत्सवः
सेयंयातिशकुंतलापतिगृहंसर्वैरनुज्ञायतां ॥ ५ ॥
यस्यत्वयाव्रणविरोहणमिंगुदीनां तैलंन्यषिच्यतमुखेकुशसूचिविद्धे ॥
श्यामाकमुष्टिपरिवर्धितकोजहाति सोऽयंनपुत्रकृतकःपदवींमृगस्ते ॥ ६ ॥
अर्थोहिकन्यापरकीयएव तामद्यसंप्रेष्यपरिग्रहीतुः ॥
जातोऽस्मिसद्योविशदांतरात्मा चिरस्यनिक्षेपमिवाऽर्पयित्वा ॥ ७ ॥
जातेतिकन्यामहतीहिचिंता कस्मैप्रदेयेतिमहान्वितर्कः ॥
दत्तासुखंयास्यतिवानवेति कन्यापितृत्वंखलुनामकष्टं ॥ ८ ॥
दैवेपराग्वदनशालिनिहंतजाते
यातेचसंप्रतिदिवंप्रतिबंधुरत्ने ॥
कस्मैमनःकथयितासिनिजामवस्थां
कःशीतलैःशमयितावचनैस्तवाऽऽधिं ॥ ९ ॥
सर्वेऽपिविस्मृतिपथंविषयाःप्रयाता
विद्याऽपिखेदकलिताविमुखीप्रभूत ॥
साकेवलंहरिणशावकलोचनामे
नैवाऽपयातिहृदयादधिदेवतेव ॥ १० ॥
धृत्वापदस्खलनभीतिवशात्करंमे
याऽऽरूढवत्यसिशिलाशकलंविवाहे ॥
सामांविहायकथमद्यविलासिनिद्यां
मारोहसीतिहृदयंशतधाप्रयाति ॥ ११ ॥
भूमौस्थितारमणनाथमनोहरेति
संबोधनैर्यमधिरोपितवत्यसित्वां ॥
स्वर्गंगताकथमिवाक्षिपसित्वमेण
शावाक्षितंधरणिधूलिषुमामिदानीं ॥ १२ ॥

---

१ पुष्पाण्यवचिनोतिपुष्पेष्विति पाठः २ पराङ्मुखे. ३ खेदे. ४ मनोव्यथां. ५ [illegible]-
[illegible] ६ [illegible].

ध्रुवंध्वंसोभावीजलनिधिमहीशैलसरितां
मतोमृत्योःशीर्यत्कणलघुर्षकाजंतुषुकथा ॥
तथाऽप्युच्चैर्बंधुव्यसनजनितःकोऽपिविषमो
विवेकैमोन्माथीदहतिन्हृदयंशोकदहनः ॥ १३ ॥
निकृंततीवमर्माणि देहंशोषयतीवमे ॥
दहतीवांतरात्मानं क्रूरःशोकाऽग्निरुत्थितः ॥१४

अद्भुतरसः

किंब्रूमोहरिमस्यविश्वमुदरेकिंवाफणानूभोगिनः
शेतेयत्रहरिःस्वयंजलनिधेःसोऽप्येकदेशेस्थितः ॥
आश्चर्यंकलशोद्भवोमुनिरसौयस्यैकहस्तेऽबुधि
र्गंडूषीयतिपंकजीयतिफणीभृंगीयतिश्रीपतिः ॥ १ ॥
कस्मैकिंकथनीयं कस्यमनःस्थैर्यंभवति ॥
रमयतिगोपवधूटी कुंजकुटीरेपरंब्रह्म ॥ २ ॥
आदायचापमचलं कृत्वाहीनंगुणंविषमदृष्टिः ॥
यश्चित्रमच्युतशरो लक्ष्यमभांक्षीन्नमस्तस्मै ॥ ३ ॥
चित्रंकनकलतायां शरदिंदुस्तत्रखंजनद्वितयं ॥
तत्रचमनोजधनुषी तदुपरिगाढांऽधकाराणि ॥ ४ ॥
कृष्णेनांऽबगतेनरंतुमनसामृद्भक्षितास्वेच्छया
सत्यंकृष्णकएवमाहमुसलीमिथ्यांऽबपश्याऽऽननं ॥
व्यादेहीतिविकासितेऽथवदनेमातासमस्तंजग
द्दृष्ट्वायस्यजगामविस्मयपदंपायात्सवःकेशवः ॥ ५ ॥

हास्यरसः

श्री० ॥ अत्तुंवांछतिवाहनंगणपतेराखुंक्षुधार्तःफणी
तंचक्रौंचपतेःशिखीचगिरिजासिंहोऽपिनागाननं ॥

---

१ नाशः २ विवेकोन्मूलनः ३ अगस्त्यः ४ विश्वासः ५ स्त्री. ६ स्थिरं. पक्षेपर्वतं ७ गुणरहितं. पक्षे अहीनमितिपदच्छेदः सर्पराजंगुणंकृत्वेत्यर्थः ८ असमदृक्. पक्षेत्रिलोचनत्वात्विषमदृष्टिः ९ नच्युतःशरोयस्य. पक्षे अच्युतःविष्णुःसएवशरोयस्य. १० तस्मैत्रिपुरभिन्यर्थः ११ बभंज. १२ बलरामः १३ विकासय. १४ मूषिकं. १५ कार्तिकेयस्य. १६ मयूरः १७ गजवदन.

गौरीजन्हुसुतामसूयतिकलानाथंकपालाऽनलो
निर्विण्णःसपर्पौकुटुंबककलहादीशोऽपिहालाहलं ॥ १ ॥
दृष्ट्वाषडाननजनुर्मुदिताऽन्तरेण पंचाननेनसहसाचतुराननाय ॥
शार्दूलचर्मभुजगाभरणंसभस्म दत्तंनिशम्यगिरिजाहसितंपुनातु ॥२॥
रामाद्याचयमेदिनींधनपतेर्बीजंबलाल्लांगलं
प्रेतेशान्महिषंतवाऽस्तिवृषभःफालंत्रिशूलादपि ॥
शक्ताऽहंतवचान्नदानकरणेस्कंदोऽस्तिगोरक्षणे
खिन्नाऽहंतवयाचनात्कुरुकृषिंभिक्षाटनंमाकृथाः ॥ ३ ॥
विष्णोश्वाऽऽगमनंनिशम्यसहसाकृत्वाफणींद्रंगुणं
कौपीनंपरिधायचर्मकरिणःशंभुःपुरोधावति ॥
दृष्ट्वाविष्णुरथंसकंपहृदयःसर्पोऽपतद्भूतले
कृत्तिर्विस्खलितान्हियानतमुखोनग्नोहरःपातुवः ॥ ४ ॥
उदरद्वयभरणभया दर्धांगीकृतदारः ॥
यदिनैवंतस्यैकसुतः कथमद्याऽपिकुमारः ॥ ५ ॥
किंगोत्रंकिमुजीवनंकिमुधनंकाजन्मभूःकिंवयः
किंचारिज्यममुष्यकेसहचराःकेवंशजाःप्राक्तनाः ॥
कामाताजनकःशिवस्यकइतिप्रह्वेणपृथ्वीभृता
पृष्टाःसस्मितनम्रमूकवदनाःसप्तर्षयःपांतुवः ॥ ६ ॥
भस्मांऽघोरगफूत्कृतिस्फुटभवद्भालस्थवैश्वानर
ज्वालाखिन्नसुधांशुमंडलगलत्पीयूषधारारसैः ॥
संजीवद्गजचर्मगर्जितभयभ्राम्यद्वृषाऽऽकर्षण
व्यासक्तःसहसाऽद्रिजोपहसितोनग्नोहरःपातुवः ॥ ७ ॥
हेहेरंबकिमंबरोदिषिकथंकर्णौलुठत्येग्निभूः
किंतेस्कंदविचेष्टितंममपुरासंख्याकृताचक्षुषां ॥
नैतत्तेप्युचितंगजाऽऽस्यचरितंनासाममीनाचमे
तावेवंसहसाविलोक्यहसितव्यग्राशिवापातुवः ॥ ८ ॥
कृष्णोगोरसचौर्यमेवकुरुतेकिंकृष्णमातःसुरा

---

१ हेरि. २ भार्गवात्. ३ कुबेरात्. ४ बलभद्रात्. ५ यमात्. ६ सूर्य. ७ गरुड. ८ गजचर्म. ९ स्कंदः

पानंनमकरोमिरामकिमिदंनाऽहंपरक्षीरतः ॥
किंगोविंदवदत्यमौहलधरोपिब्येतितंब्याहरन्
गोपीगोपकदंबकंविहसयन्मुग्धोमुकुंदोऽवतु ॥ ९ ॥
परान्नंप्राप्यदुर्बुद्धे माप्राणेषुदयांकुरु ॥
परान्नंदुर्लभंलोके प्राणाजन्मनिजन्मनि ॥ १० ॥
उपभुक्तखदिरवीटक निजाधरजरागभंगभयात् ॥
पितरिमृतेऽपिहिवेश्या रोदितिहातातताततेति ॥११ ॥
चितांप्रज्वलितांदृष्ट्वा वैद्योविस्मयमागतः ॥
नाऽहंगतोनमेभ्राता कस्येदंहस्तलाघवं ॥ २ ॥
वैद्यराजनमस्तुभ्यं क्षपिताशेषमानव ॥
त्वयिविन्यस्तभारोऽयं कृतांतःसुखमेधते ॥ ४ ॥
सामगायनपूतंमे नोच्छिष्टमधरंकुरु ॥
उत्कंठिताऽसिचेद्भद्रे वामंकर्णंदशस्वमे ॥ ५ ॥
आदौवेश्यापुनर्दासी पश्चाद्भवतिकुट्टिनी ॥
सर्वोपायपरिक्षीणा बृन्धानारीपतिव्रता ॥ ६ ॥

भयानकरसः

ग्रीवाभंगाऽभिरामंमुहुरनुपततिस्यंदनेदत्तदृष्टिः
पश्चार्धेनप्रविष्टःशरपतनभयाद्भूयसापूर्वकायं ॥
दर्भैरर्धाऽवलीढैःश्रमविवृतमुखभ्रंशिभिःकीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियतिबहुतरंस्तोकमुर्व्यांप्रयाति ॥ १ ॥
निर्मज्जच्चक्षुरंतर्भ्रमदतिकपिलक्रूरतारानराऽस्थि
ग्रंथिदंतांऽतरालग्रथितमविरतंजिव्हयाघट्टयंती ॥
ध्वांतेऽपिव्यात्तवक्त्रज्वलदनलशिखाजर्जरेव्यक्तकर्मा
निर्मातीगृध्ररौद्रींदिवमुपरिपरिक्रीडतेताडकेयं ॥ २ ॥
अंत्राऽऽकल्पचलत्पयोधरभरव्याविद्धमेघच्छटा
सृक्कस्थामिषगृध्नुगृध्रगर्दास्फालोच्चलन्मूर्धजा ॥
व्यादायाननमट्टहासविकटंदूरेणतारापथा
त्रस्यन्सिद्धपुरंध्रिवृंदरभसोन्मुक्तादुपक्रामति ॥ ३ ॥

---

१ ओष्ठप्रांतः २ लालसाः ३ पक्षाः ४ स्त्री.

बीभत्सरसः

उत्कृत्योत्कृत्यकृत्तिंप्रथममथपृथूत्सेधभूयांसिमांसा
न्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनिजग्ध्वा ॥
आर्तःपर्यस्तनेत्रःप्रकटितदशनःप्रेतरंकःकरंका
दंकस्थादस्थिसंस्थंस्थपुटगतमपिक्रव्यमव्यग्रमत्ति ॥ १ ॥
अंत्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कंकण
प्रायप्रेंखितभूरिभूषणरवैराघोषयंत्यंबरं ॥
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लल
द्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतंधावति ॥ २ ॥
रक्तंनक्तंचरौघैःपिबतिचवमतिव्यग्रकंतःशकुंतः
क्रव्यंनव्यंगृहीत्वाप्रणर्दतिमुदितोमत्तवेतालबालः ॥
क्रीडत्यत्रोडमस्मिन्रुधिरमधुवशात्पूतनानूतनांगी
योगिन्योमांसमेदःप्रमुदितमनसःशूरशक्तिस्तुवंति ॥ ३ ॥

रौद्ररसः

येनस्वांविनिहत्यमातरमपिक्षत्त्राऽस्त्रंमध्वासव
स्वादाऽभज्ञपरश्वधेनविदधेनिःक्षत्रियामेदिनी ॥
यद्बाणव्रणवर्त्मनाशिखरिणःक्रौंचस्यहंसच्छला
द्याप्यस्थिकणाःपतंतिसपुनःक्रुद्धोमुनिर्भार्गवः ॥ १ ॥
राज्ञोमानधनस्यकार्मुकभृतोदुर्योधनस्याऽग्रतः
प्रत्यक्षंकुरुबांधवस्यचतथाकर्णस्यशल्यस्यच ॥
पीतंतस्यमयाद्यपांडववधूकेशांबराऽऽकर्षिणः
कोष्णंजीवतएवतीक्ष्णकरजक्षुण्णादसृग्वक्षसः ॥ २ ॥
स्पृष्टायेनशिरोरुहेनृपशुनापांचालराजात्मजा
येनाऽस्याःपरिधानमप्यपहृतंराज्ञांकुरूणांपुरः ॥
यस्योरःस्थलशोणिताऽऽसवमहंपातुंप्रतिज्ञातवान्
सोऽयंमद्भुजपंजरेनिपतितःसंरक्ष्यतांकौरवाः ॥ ३ ॥

---

१ चर्म २ कटिदेशस्थमांसपिंडः (कुले) ३ अत्यंतदुर्गंधीनि ४ भक्षयित्वा, ५ मांसं ६ रक्तं

योयःशस्त्रंबिभर्तिस्वभुजगुरुमदःपांडवीनांचमूनां
योयःपांचालगोत्रेशिशुरधिकवयागर्भशय्यागतोवा ॥
योयस्तत्कर्मसाक्षीचरतिमयिरणेयश्चयश्चप्रतीपः
क्रोधांधस्तस्यतस्यस्वयमिहजगतामंतकस्यांऽतकोऽहं ॥४॥

शांतरसः

गतःकामकथोन्मादो गलितोयौवनज्वरः ॥
गतोमोहश्च्युतातृष्णा कृतंपुण्याऽऽश्रमेमनः ॥ १ ॥
वनान्यमूनिनगृहा ण्येतानद्योनयोषितः ॥
गृहाइमेनदायादा स्तन्मेनंदतिमानसं ॥ २ ॥
शांतिकंथालसत्कंठो मनःस्थालीमिलत्करः
त्रिपुरारिपुरद्वारि कदाऽहंमोक्षभिक्षुकः ॥ ३ ॥
संध्यावंदनभद्रमस्तुभवतेभोस्नानतुभ्यंनमो
भोदेवाःपितरश्चतर्पणविधौनाऽहंक्षमःक्षम्यतां ॥
यत्रक्वाऽपिनिषद्ययादवकुलोत्तंसस्यकंसद्विषः
स्मारंस्मारमघंहरामिनदलंमन्येकिमन्येनमे ॥ ४ ॥
अतिक्रांतःकालोललितललनाभोगसुखदो
भ्रमंतःशांताःस्मःसुचिरमिहसंसारसरणौ ॥
इदानींस्वःसिंधोस्तटभुविसमाक्रंदनगिरः
सुतारैःफूत्कारैःशिवशिवशिवेतिप्रतनुमः ॥ ५ ॥
उद्घाटितनवद्वारे पंजरेविहगोऽनिलः ॥
यत्तिष्ठतितदाश्चर्यं प्रयाणेविस्मयःकुतः ॥ ६ ॥
एणाक्षीस्पृहयालुतानकथमप्यास्तेविवेकोदया
न्नित्यंप्रच्युतिशंकयाक्षणमपिस्वर्गेनमोदामहे ॥
अप्यन्येषुविनाशिभोगविषयाभोगेषुतृष्णानमे
स्वर्णद्याःपुलिनेपरंहरिपदध्यानंमनोवांछति ॥ ७ ॥
ॐकारेसत्प्रदीपेमृगयगृहपतिंसूक्ष्ममेवांऽऽतरस्थं
संयम्यद्वारबाह्यंपवनमविरतंनायकंचेंद्रियाणां ॥

---

१ प्रव्रज्यायां. २ पद्धतौ. ३ स्वर्णद्याः ४ प्राणवायुः ५ सद्वस्तुप्रकाशके. ६ प्रोधय
७ आत्मानं.

वाग्जालंकस्यहेतोर्विरचयसिगिराबध्यतेनैवकिंचि
देहस्थंपश्यनाथंभ्रमसिकिमपरंशास्त्रमोहांऽधकारे ॥ ८ ॥
कामक्रोधपाहवती पंचेंद्रियजलानदी ॥
नावधृतिमयींकृत्वा जन्मदुर्गाणिसंतर ॥ ९ ॥
वपुःकुब्जीभूतंगतिरपितथायष्टिशरणा
विशीर्णादंतालिःश्रवणविकलंश्रोत्रयुगलं ॥
शिरःशुक्लंचक्षुस्तिमिरपटलैरावृतमहो
मनोमेनिर्लज्जंतदपिविषयेभ्यःस्पृहयति ॥ १० ॥
समारंभाभग्नाःकतिकतिनवारास्तवपशो
पिपासोस्तुच्छेऽस्मिन्द्रविणमृगतृष्णाऽर्णवजले ॥
तथाऽपित्याशाविरमतिनतेमूढशतधा
नदीर्णयच्चेतोनियतमशनिग्रावघटितं ॥ ११ ॥
अजानन्दाहाऽतिपततिशलभोदीपदहनं
समीनोप्यज्ञानाद्बडिशयुतमश्नातिपिशितं ॥
विजानंतोप्येतेवयमिहविपज्जालजटिला
न्नमुंचामःकामानहहगहनोमोहमहिमा ॥ १२ ॥
कदाभिक्षाभक्तैःकरकलितगंगांबुतरलैः
शरीरंमेस्थास्यत्युपरतसमस्तेंद्रियसुखं ॥
कदाब्रह्माभ्यासस्थिरतनुतयाऽरण्यविहगाः
पतिष्यंतिस्थाणुभ्रमहतधियःस्कंधशिरसि ॥ १३ ॥
समाश्लिष्यत्युच्चैर्घनपिशितपिंडंस्तनधिया
मुखंलालाकीर्णंपिबतिचषकंसाऽसवमिव ॥
अमेध्यक्लेदाऽर्द्रेपथिचरमतेस्पर्शरसिको
महामोहांधानांकिमिहरमणीयंनभवति ॥ १४ ॥
मातर्मायेभगिनिकुमतेहेपितर्मोहजाल
व्यावर्तध्वंभवतुभवतामेषदीर्घोवियोगः ॥

१ मकरः २ धैर्यरूपां. ३ यष्ट्यधीना. ४ वज्रपाषाणघटित ५ मत्स्यवेधनं. ६ मांसपिंडं, ७ ८ मद्यपुरुषानपात्रं.

सखीलक्ष्मीरमन्नचरमभवत्संगामवाह
स्यामिमायांदवदिपरमन्नसदृहि भैवामि ॥ १५ ॥
मातर्मैदिनितातमारुतसखेज्योतिःसुबंधोजल
भ्रातर्व्योमनिबद्धएषभवतामंत्यःप्रणामांजलिः ॥
युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मल
ज्ञानाऽपास्तसमस्तमोहमहिमालीयेपरेब्रह्मणि ॥ १६ ॥
महाशय्याभूमिर्मसृणमुपधानंभुजलता
वितानंचाऽऽकाशंव्यजनमनुकूलोऽयमनिलः ॥
स्फुरच्चंद्रोदीपःस्वैधृतिवनितासंगमुदितः
सुखंशांतःशेतेविगतभवभीतिर्नृपइव ॥ १७ ॥
निर्विवेकतयाबाल्यं कोपोन्मादेनयौवनं
वृद्धत्वंविकलत्वेन सदासोपद्रवंनृणां ॥ १८ ॥
प्रातर्मूत्रपुरीषाभ्यां मध्यान्हेक्षुत्पिपासया ॥
तृष्णाकामेनबाध्यंते प्राणिनोनिशिनिद्रया ॥ १९ ॥
गतसारेऽत्रसंसारे सुखभ्रांतिःशरीरिणां ॥
लालापानमिवांऽगुष्ठे बालानांस्तन्यविभ्रमः ॥ २० ॥
दिनमेकंशशीपूर्णः क्षीणस्तुबहुवासरान् ॥
सुखाद्दुःखसुराणाम प्यधिकंकाकथानृणां ॥ २१ ॥
किंनिःशंकंशेषे शेषेवयसःसमागतोमृत्युः ॥
अथवासुखंशयीथा निकटेजागर्तिजान्हवीभवतः ॥ २२ ॥
प्रतिपलमखिलाँल्लोकान मृत्युमुखंनिविशतोनिरीक्ष्याऽपि ॥
हाहंतचित्तमेत द्विरमतिनाऽद्यापिविषयेभ्यः ॥ २३ ॥
निखिलंजगदेवनश्वरं पुनरस्मिन्नितरांकलेवरं ॥
अथतस्यकृतेकियानयं क्रियतेहंतजनैःपरिश्रमः ॥ २४ ॥
मलयानिलकालकूटयो रमणीकुंतलभोगिभोगयोः ॥
श्वपचाऽऽत्मभुवोःकिमंतरं ममभूयात्परमात्मनिस्थितिः ॥ २५ ॥

---

१ पर्यंकः २ मृदु ३ (उशीतिलोके) ४ उल्लोचः (छतइतिलो०) ५ स्वधृतिः स्वीयधैर्यंतदेववनितास्त्रीतस्याःसंगेनमुदितोल्हृष्टःसन्. ६ विचारशून्यत्वेन ७ शैशवं. ८ निःसारे ९ संपूर्ण १० नाशवत् ११ शरीरं १२ चांडालः १३ पुत्रःब्रह्मा

कदावृंदाऽरण्येविमलयमुनातीरपुलिने
चरंतंगोविंदंहलधरसुदामादिसहितं ॥
अयेकृष्णस्वामिन्मधुरमुरलीवादनविभो
प्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान् ॥ २६ ॥
कदावासाकेते[1]विमलशरयूतीरपुलिने
चरंतंश्रीरामंजनकतनयालक्ष्मणयुतं ॥
अयेरामस्वामिन्जनकतनयावल्लभविभो
प्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान् ॥ २७ ॥
कदावाराणस्याममरतटिनी[2]रोधसिवसन्
वसानःकौपीनंशिरसिनिदधानोऽजलिपुटं ॥
अयेगौरीनाथत्रिपुरहरशंभोत्रियन
प्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान् ॥ २८ ॥

नानाप्रकरणैर्युक्तं संगृहीतंमनोरमं ॥
आनंदायसतांभूया त्सुभाषितमिदंमम ॥

---

१ अयोध्यायां. २ भागीरथीतीरे.

॥समाप्तोऽयंग्रंथः॥

सूचीपत्रं.

ग्रंथनाम.	संक्षेप.
अनर्घ्यराघव.	अ. रा.
अश्वधाटी.	अ. धा.
अच्युतरायजी.	अ. रा.
इंदिरेशप्रभुवि.	इ. प्र.
उत्तररामचरित्र.	उ. रा.
कर्णामृत.	क.
कलिविडंबन.	क. वि.
कल्पतरु.	क. त.
काव्यसंग्रह.	का. सं.
काव्यादर्श.	का.
कुमारसंभव.	कु. सं.
कुवलयानंद.	कु. नं.
गीतगोविंद.	गी. गो.
गोवर्धनसप्तशती.	गो. स.
चर्पटपंजरी.	च. पं.
जानकीपरिणय.	जा. प.
जिनधर्मविवेक.	जि. वि.
धनंजयव्यायोग.	ध. व्या.
नलचंपू.	न. च.
नैषध.	नै.
पंचायुधप्रपंचभाण.	पं. भा.
पद्यतरंगिणी.	प. त.
प्रबोधचंद्रोदय.	प्र. चं.
प्रसंगरत्नावली.	प्र. र.
प्रसंगाभरण.	प्र.
भर्तृहरी.	भ.
भामिनीविलास.	भा. वि.
भारतचंपू.	भा. चं.
माघ.	मा.
मालविकाग्निमित्र.	मा. मि.
मालतीमाधव.	मा. मा.
मुकुंदानंदभाण.	मु. भा.
मोहमुद्गर.	मो. मु.
रंभाशुकसंवाद.	रं. शु.
रसिकजीवन.	र. जी.
राधाकृष्णसंवाद.	रा. कृ.
लटकमेलन.	ल. मे.
वाग्भट.	वाग्.
विक्रमोर्वशी.	वि.
विठोबाअण्णा.	वि. अ.
विदग्धमुखमंडन.	वि. मं.
विद्वद्भूषण.	वि. भू.
विश्वगुणादर्श.	वि. गु.
वेणीसंहार.	वे. सं.
वैद्यजीवन.	वै. जी.
शाकुंतल.	शाकुं.
शार्ङ्गधर.	शा.
सभातरंग.	स. त.
सूक्तिसंग्रह.	सू.
स्फुटश्लोक.	स्फु.
हनुमन्नाटक.	ह.
हितोपदेश.	हि.

सूचीपत्रं.

अ.